Sri Vani Vilas Sanskrit Series

No. 6.

Achyutarayabhyudayam

OF

Sri Rajanatha

with a commentary

BY

Pandit R. V. KRISHNAMACHARIAR,

(Abhinava Bhatta Bana)

PART I

Cantos 1—6

Srirangam:

SRI VANI VILAS PRESS

1907.

॥ श्रीः ॥

॥ अच्युतरायाभ्युदयम् ॥

श्रीराजनाथमहाकविकृतम् ।

" अभिनवभट्टबाण' शब्दतर्कालङ्कारविद्याभूषण " बिरुद-
भाजा वात्स्यचक्रवर्तिना श्रीकृष्णसूरिणा
विरचितया लघुपञ्जिकया
समेतम् ।

श्रीरङ्गनगरे
श्रीवाणीविलास मुद्राक्षरशालायां
समुद्रितम् ।
१९०७.

PREFACE

This is a rare historical Kavya not published hitherto It consists of twelve cantos and is composed by the poet Sri Rajanatha, the son of Arunagirinatha, who lived in the 16th century The work treats of the exploits of Achyuta Raya, one of the emperors of the "Never to be forgotten" empire of Vijayanagar Achyuta Raya was the son of Narasimha and succeeded to the throne, his brother Krishna Raya, in the year 1529—30 More than one Epigraphical record contains the following geneology.

Timma
(M Devaki)
|
Iswara
(M Bukkamma)
|
Narasa or Narasimha
(Three wives)
(Usurped the throne about A.D 1498)

(By Tippamba)	(By Nagamba)	(By Obamamba)
Vira Nrisimharaya	Krishna Raya	Achyuta Raya (M Varadamba) King A D 1530—42
		Chinna Venkata

There was once a king named Timma among the Tuluva Dynasty of kings in Vijayanagar. His wife was

Devaki Their son was Iswara whose wife was Bukkamma They had two issues Narasimha and Timman The former became the Emperor and captured the fort of Manavadurga and on the Nizam of that place craving his pardon, he gave back the fort to the Nizam, and then subdued Seringapatam He then overcame the Marawas and took hold of Madura and vanquished Konetiraja Finally he made Vijayanagar his capital He had three queens each of whom gave birth to a son These three sons became kings one after another and the last was Achyuta Raya whose queen was Varadambal Achyuta Raya was crowned as king with his son Chinna Venkatadri as Yuvaraja After he ascended the throne the Prime Minister one day reported to him, that the Chola king had decamped from his kingdom and sought refuge of the king of Chera who had deprived the Pandyan king of his legitimate dominions The Emperor got enraged on hearing this and immediately ordered his forces On an auspicious day he started towards the South and reached Chandragiri Thence he went to Tirupati where he stayed for some time From there he went to Kalahasti and Vishnukanchi Tiruvannamalai was next reached and finally Srirangam Here he halted and sent his brother in law to punish the Chera king Accordingly his brother in law, the son of Salagaraja went through Madura to the shores of the Tambraparni From there he sent his commander in chief against the Chera king Meanwhile the King of Travancore who was

known by the title of "Tiruvadi, hearing of the expedition of the emperor of Vijayanagar, collected his forces and took his stand on the shores of the Tambraparni A regular battle ensued between the two opposing forces with the result that the Vijayanagar army was victorious Immediately, the Chera king handed over the Chola king to Prince Salagaraja and took refuge under him Prince Salagaraja recognised the Chera king and gave back to the Pandyan Chief the dominions that were once his Then desiring to worship God Anantapadmanabha on his return way, he reached the Malaya Mountain and the sea

Such is the history narrated in the first six cantos We have several accounts of the reign of Krishna Raya when the Empire of Vijayanagar was at its zenith but of Achyuta Raya the existing records are very few Hence this Mahakavya is very valuable as a contribution to History When the other six cantos also are published Professor M Rangachariar M A has kindly undertaken to write a critical introduction to the whole work Meanwhile we commend this Part to the critical study of all Sanskrit Scholars

We take this opportunity to thank Pandit T S Kuppuswamy Sastriar who first suggested to us the publication of this work In the preparation of this edition we had the help of six manuscripts, four from Tanjore, one from Adyar and another from the Government Oriental Mss library Being the fist edition the commentator ex

perienced some difficulty in choosing the best readings from the different manuscripts and it is quite probable that with all his care some mistakes might still have crept in These we hope to rectify in the second edition

Srirangam
15th March 1907

T K Balasubrahmanyam

॥ श्रीः ॥

श्रीराजनाथकविविरचित

॥ अच्युतरायाभ्युदयम् ॥

प्रथमः सर्गः ।

नालीकाक्षमलीकाक्षं नागेशयमगेशयम् ।
विपुगवध्वज धाम पुगवध्वजमाश्रये ॥

श्रीनिवासमनुस्मृत्य श्रीकृष्णो नव्यमार्गेण. ।
बालावबोधनकृते कुरुते लघुपञ्चिकाम् ॥

नालीकेति । नालीके कमले इव अक्षिणी यस्य तत् तथोक्तम् । अलीकाक्षभिन्न च । अलीके ललाटे अक्षि यस्य तत् तादृशम् । नागे आदिशेषे शेते इति तत् तादृशम् । अगेशयभिन्न च । अगे पर्वते शेत इति तादृशम् । वीना पक्षिणा पुगव श्रेष्ठ गरुड स ध्वजे यस्य तत् तथोक्तम् । पुगवध्वजभिन्न च । पुगव पुमान् गौ वृषभ ध्वजे यस्य तत् तादृशम् । धाम तेज विष्णु शिव चलर्थं । आश्रये भजे । **विरोधाभास.** ॥

अव्यादपूर्वो निधिरागमाना-
माद्यो वृषाद्रे पतिरच्युतेन्द्रम् ।
निरीक्षितु नि स्पृहकाङ्क्षित य
निरञ्जना एव जना क्षमन्ते ॥ १ ॥

अव्यादिति । अपूर्व निध्यन्तरविलक्षण । आगमाना शास्त्राणा वेदाना वा, धनागमनाना च । निधि शेवधि । आद्य सर्वजगतामादिम । आद्य इति निधिविशेषण वा । वृषाद्रे पति वृषशैलेश्वर श्रीनिवास । अच्युतेन्द्र एतत्काव्यनायक अच्युतरायम् । अव्यात् रक्षतु । नि स्पृहै अलिप्सुभि , वीतरागैश्च काङ्क्षित अभिलषितम् । य वृषाद्रिपतिनिधिम् । निरीक्षितु द्रष्टुम् । निरञ्जना निष्प्रञ्जनमितिप्रसिद्धाञ्जनशून्या , विषयलेप रहिताश्च । जना एव । क्षमन्ते शक्नुवन्ति । अन्ये निधय सस्पृहैरेव काङ्क्ष्यन्ते, दृश्यन्ते च साञ्जनैरेवात्यतोऽस्य निधेर्विलक्षणत्वमिति भाव ॥ **रूपक व्यतिरेकश्च ॥**

धम्मिल्लशैवालधरा विराज-
दपाङ्गमीनाधरविद्रुमाप्ता ।
धन्या पितृच्छायतयाब्धिकन्या
तन्यादवन्यां श्रियमच्युतेन्दो ॥ २ ॥

धम्मिल्लेति । धम्मिल्ल चिकुर एव शैवाल शैवल तस्य धरा धारयित्री । विराजन् शोभमान अपाङ्ग नेत्रान्त एव मीन यस्या सा तादृशी । अधर ओष्ठ एव विद्रुम प्रवाल त आप्ता प्राप्ता । अत एव, पितृच्छायतया पितु छायेव छाया यस्या तस्या भावेन पितृतुल्यतये त्यर्थ । धन्या कृतार्था, धनवती च । अब्धिकन्या लक्ष्मी । अवन्यां

भूमौ। अच्युतेन्दो अच्युतरायस्य, विष्णोश्च। श्रियं सम्पदं, शोभां च। तन्यान् करोतु। पितृच्छाया कन्या भाग्यवतीति पत्युरैश्वर्यपोषिणी चेति सामुद्रिकाः। रूपकं काव्यलिङ्गं च॥

सुवर्णरूपैः शुभनायकाङ्कै-
रौज्ज्वल्यवद्भिर्ध्वनिमश्नुवानैः।
परिष्कृतादिक्षितिपान्प्रबन्धैः
प्राचेतसादीन्प्रणुम कवीन्द्रान्॥ ३॥

सुवर्णेति। सुवर्णरूपैः शोभनवर्णात्मकैः, कनकमयैश्च। शुभनायकः नेता मध्यमणिश्च अङ्कः चिह्नं येषां तैः तथोक्तैः। औज्ज्वल्यवद्भिः कान्त्याद्यगुणविशिष्टैः, प्रकाशमानैश्च। ध्वनिं ध्वन्याख्योत्तमकाव्यतां व्यङ्ग्यमर्यादां वा, शब्दं च। अश्नुवानैः प्राप्तैः। प्रबन्धैः स्वस्वप्रबन्धैरेव भूषणैः। परिष्कृता अलङ्कृता आदिक्षितिपा रामाद्या नृपतयः यैस्तान् तादृशान्। प्राचेतसादीन् वाल्मीकिप्रमुखान्। कवीन्द्रान् कविश्रेष्ठान्। प्रणुम स्तुमः। णु स्तुतौ अदादिः। **समासोक्तिः**॥

कथं नु वर्ण्या भुवि कालिदास-
मयूरभट्टादिमहाकवीन्द्राः।
पुरातनी पूरुषभूमिका य-
द्रूपेण धृत्वा विननर्त वाणी॥ ४॥

कथमिति। कालिदासमयूरभट्टादिमहाकवीन्द्राः। भुवि। कथं नु केन प्रकारेण। वर्ण्याः वर्णयितुं शक्याः। वाणी सरस्वती। यद्रूपेण येषां कालिदासादीनां रूपेण। पुरातनी प्राचीना यशसा चिरावस्थायिनी वा। पूरुषभूमिकां पुरुषवेषं पुंस्त्वमित्यर्थः। धृत्वा। विननर्त नृत्यति स्म॥

अस्ति स्मरप्राभृतमक्षि शौरे
रदक्षिण शेखरपुष्पमैशम् ।
अपा निधेरद्भुतनाट्यविद्या
गुरुश्चकोरीकुलबन्धुरिन्दु ॥ ५ ॥

अस्तीति । स्मरस्य मन्मथस्य प्राभृत उपायनम् । शौरे विष्णा । अदाक्षिण अक्षि वाम चक्षु । एश शिवसबन्धि । शेखरपुष्प अवतस कुसुम शिवन शिरसि धार्यमाण इत्यर्थ । अपा निधे समुद्रस्य । अद्भुतकरी या नाट्यविद्या कल्लोलोल्ललनमित्यथ तस्या गुरु । चकोराणा कुलस्य समूहस्य बन्धु चकोरीणा कुलबन्धुरिति वा । इन्दु चन्द्र । अस्ति । **रूपकम्** ॥

प्रायेण य क्षोणिभृदुत्तमाङ्गे
पादार्पण सत्पथसेवन च ।
करोत्यरिश्रेणिकदर्थन च
कुर्वन्तु सर्वे कुलजा यमेति ॥ ६ ॥

प्रायेणेति । य चन्द्र । सव । मम । कुलजा वशजाता । कुर्वन्तु मया क्रियमाण स्वयमपि आचरन्तु । इति मत्वेव । क्षोणिभृतां पर्वताना राज्ञा च उत्तमाङ्गे शिखरे शिरसि च । पादानां किरणाना पादयो चरणयोश्च अर्पण न्यासम् । सत्पथस्य आकाशस्य सन्मार्गस्य च सेवन आश्रयण च । अरिश्रेण्या चक्रवाकसमूहस्य शत्रुगणस्य च कदथन उपद्रव च । प्रायण भूम्ना करोति । अरिशब्दस्य चक्रवाचितया चक्रपया याणा च चक्रवाकयोधकत्वन प्रकृते चक्रवाकपरत्वम् । **श्लेष उत्प्रेक्षा च** ॥

सरोजभद्रासनसौमनस्या-
त्सुधाप्रदानात्सुमनोजनानाम् ।
सदापि नाकाश्रयसौहृदाय
पुष्णाति चर्यां पुष्पत्रयीयाम् ॥ ७ ॥

सरोजेति । य । सरोजाना पद्माना भद्रस्य विकासरूपस्य मङ्गलस्य असने निरसने सौमनस्यात् प्रीत्या । पक्ष सरोजमेव भद्रासन सिंहासन तत्र सौमनस्यात् प्रियत्वात् । सुमनोजनाना देवानाम् । सुधाप्रदानात् अमृतप्रदानात् । उभयत्र तुल्यम् । सदा सर्वदापि । नाकस्य आकाशस्य आश्रये आश्रयेण सौहृदात् स्नेहात् । पक्ष सदा सर्वदा । पिनाकस्य तदा श्रयस्य शिवधनुष आश्रय सौहृदात् । पुष्पत्रयीया ब्रह्मविष्णुरुद्ररूपमूर्ति त्रयसधर्मिणाम् । चर्यां क्रियाम् । पुष्णाति करोति । **श्लेषनिदर्शने** ॥

वियुक्तवर्गे विहितप्रताप
सयुक्तलोके सरसप्रभाव ।
उदश्चितो राजपदानुकूल
यो मण्डल धारयतेऽनुरक्तम् ॥ ८ ॥

वियुक्तेति । य । वियुक्तवर्गे विरहिसमूहे, पक्षे अयुक्तकारिणा शत्रूणां वा गण । विहित कृत प्रताप प्रकृष्ट ताप , कोशदण्डज तेजश्च येन स तथोक्त । सयुक्तलोके परस्परसम्मिलितमिथुनजने, पक्षे युक्तकारिणि जने मित्रजने वा । सरस आर्द्र प्रभाव महिमा, प्रकृष्टा भाव आशयश्च यस्य स तादृश । उदश्चित उदयमापन्न, पूजितश्च सन् । राज पदस्य रञ्जयतीति व्युत्पत्त्या नृपतिवाचकस्य राजेति शब्दस्य राज

स्थानस्य वा अनुकूलं अनुगुणं यथा तथा । राजेति पदं चन्द्रनृपत्युभय वाचकम् । मण्डलं स्वबिम्बं, राष्ट्रं च । अनुरक्तं रक्तवर्णं, अनुराग विशिष्टं च । धारयते ' धारयते नु रक्तम् ' इति पाठान्तरम् ॥

आशाभिपूर्तेरनुरूपमेव
वर्षन्प्रकर्षाद्वसुमण्डलानि ।
औदार्यभाजामवनीरुहाणा
व्यनक्ति य सोदरताविलासम् ॥ ९ ॥

आशेति । य । आशाना दिशा, मनोरथानां च अभिपूर्तेः पूरणस्य । अनुरूपं अनुगुणमेव । वसुमण्डलानि किरणसमूहान्, धनराशीश्च । प्रकर्षात् आधिक्येन । वर्षन् सन् । औदार्यं दातृत्वं भजन्तीति तेषाम् । अवनीरुहाणा वृक्षाणां कल्पतरूणामित्यर्थः । सादरताया सहोदरत्वस्य विलास शोभाम् । कल्पकतरूणा चन्द्रस्य च समुद्रादुत्पन्नत्वादिति भाव । व्यनक्ति प्रकाशयति ॥

क्षेमकर कैरवससदा यो
वाम हरस्येक्षणमेव नैकम् ।
उदीर्यतेऽध्वन्यजनैर्द्वितीय
सचिन्त्यते चक्रकुलैस्तृतीयम् ॥ १० ॥

क्षेमकर इति । कैरवससदा कुमुदखण्डानाम् । क्षेमकर । य । हरस्य । एक वाम ईक्षण एव न । किं तु अध्वन्या पथिका य जना ते । हरस्य, द्वितीय ईक्षण सूर्यरूप चक्षु । उदीर्यते । चक्रकुलै चक्रवाक

समूहे । तृतीय अग्निरूप ईक्षण नेत्रम् । सचिन्त्यते विचार्यते । पथिकेषु चक्रवाकेषु च विषये चन्द्रस्य तापकरत्वादिति भाव । उल्लेख. ॥

कथ ब्रुवे यस्य कलासुपक्ता
आलोकमात्रादपि चञ्चरीका ।
व्याकुर्वते कैरवपीठिकासु
विद्याविशेषान्विषमायुधीयान् ॥ ११ ॥

कथमिति । कथ केन प्रकारेण । ब्रुवे वर्णयामि । चञ्चरीका भृङ्गा । यस्य चन्द्रस्य । आलोक प्रकाश दर्शन च । आलोक एव आलोकमात्र तस्मादपि । कलासुपक्ता कलासु विद्यासु अनुपक्ता सबद्धा । कलाभि विद्याभि अनुपक्ता युक्ता वा । पक्षे कले अव्यक्तमधुरध्वनौ अनुपक्ता सन्त । कैरवाण्येव पीठिका विद्यापीठानि तासु । स्थिता सन्त । विषमा *युधीयान् मन्मथसम्बन्धिन । विद्याविशेषान् विद्याभेदान् । व्याकुर्वते* विवृण्वन्ति । यस्य कलानिधत्वम् " इति पाठान्तरम् । **रूपकम्** ॥

विमोहिनीं यो विधुरेत्य मूर्तिं
सुधा ददान सुमनोजनाय ।
अस्वप्नवृत्त्याश्रयतोऽवतार
आलक्ष्यते यस्तमसो निहन्ता ॥ १२ ॥

विमोहिनीमिति । *य विधु* चन्द्र, विष्णुश्च । सुमनोजनाय देवेभ्य । सुधां अमृतम् । ददान प्रदिशन्, सुधाप्रादानायेत्यर्थ । विमोहिनीं विशेषेण मोहयति द्रष्टॄन् आश्चर्यपरवशान् करोतीति ता मोहिनीसंज्ञकस्त्रीरूपां च । मूर्ति स्वरूपम् । एत्य प्राप्य । अस्वप्नवृत्ते

प्रकाशदशाया आश्रयत आश्रयणात्, पक्षे अस्वप्रवृत्तीनां देवाना आश्रयत आश्रयणात् तद्रक्षणार्थमित्यर्थ । अवतार अपगतनक्षत्र विरलनक्षत्र इति यावत्, सुप्रसिद्ध अवतारश्च । आलक्ष्यते दृश्यते, अवतारत्वेन ज्ञायत इत्यर्थ । चन्द्रे प्रकाशमाने नक्षत्राणि नातीव सन्तीति स्थिति । तथा च मुरारि । 'भूयस्ताराणि यदुडूनि तमस्विनीषु ज्यौत्स्नीषु च प्रविरलानि तत प्रतीम ।' इति । यत् यस्मात्कारणात् । तमस अन्धकारस्य, राहोश्च । निहन्ता नाशक । 'अवतारमालक्ष्यते यस्तमसो नियन्ता ।' इति पाठान्तरम् । श्लेष, उत्प्रेक्षा रूपकं वा ॥

आचारतो धर्म इवावदाता-
दवाधितो हर्ष इवात्मवोधात् ।
ततो बुधाख्यस्तनयस्ततोऽभू-
च्छम श्रुतानामिव सम्प्रदायात् ॥ १३ ॥

आचारत इति । तत अनन्तरम् । अवदातात् परिशुद्धात् । आचारत आचारात् । धर्म इव । आत्मवोधात् आत्मज्ञानात् । अवाधित श्रेष्ठ । हर्ष आनन्द इव । श्रुताना शास्त्राणा श्रवणाना वा । सम्प्रदायात् । शम शान्तिरिव । तत तस्माच्चन्द्रात् । बुधाख्य बुधनामा । तनय पुत्र । अभूत् उत्पन्न । **मालोपमा** ॥

पुरूरवा पुण्यफलादतोऽभू
दभूतपूर्वाभ्युदयस्य यस्य ।
प्रशस्तिमुद्रालिखनाद्विशाल
प्रत्यर्थिवक्ष फलकं किलासीत् ॥ १४ ॥

पुरूरवा इति । अत अस्मात् बुधात् । पुण्यफलात् पुण्यफलेन ।

इद अत इत्यस्य विशेषण वा । पुरूरवा तन्नामा राजा । अभूत् । अभूतपूर्वं पूर्वं कस्याप्यजात अभ्युदयो यस्य तस्य तादृशस्य । यस्य पुरूरवस । प्रशस्तिमुद्राया प्रशस्तिचिह्नस्य ।ल्खनात् । विशालम् । प्रत्यर्थिना शत्रूणां वक्ष उर । फलकम् । आसीत् किल । तदेव हि फलक, यत्र लिख्यत इति भाव । अनेन शत्रूणा वक्षासि वाणे कीलितानीति परमार्थ । प्रशस्तिमुद्रालिखनात्, फलक फलकत्वेन सभाव्य मानम् । प्रत्यर्थिवक्ष । विशाल वीना पक्षिणा शाला । विभाषा सेनासुरेति नपुसकत्वमित्यये । लिखनमित्यत्र गुणाभावश्चिन्त्य । लिखतेरकुटादि त्वात् । उत्प्रेक्षा ॥

आयुस्ततोऽभूदधिभूरवन्या
प्रभिद्य शक्त्या परभूभृत य ।
हेतुर्यशोहसविजृम्भणाना
मेति प्रथा स्कन्द इवेन्दुमौले ॥ १५ ॥

आयुरिति । अवन्या भूम । अधिभू नायक । आयु तन्नामा राजा । इन्दुमौले परमेश्वरात् । स्कन्द सुब्रह्मण्य इव । तत पुरूरवस । अभूत् । य । शक्त्या बलेन तदाख्यायुधेन च । परभूभृत शत्रुनृपति उत्कृष्ट क्रौञ्चपर्वत च । प्रभिद्य भित्त्वा । यशांसि हसा इव यशास्येव हसा वा यशोहसा, पक्षे यशासीव हसा, तपा विजृम्भणाना विलासा नाम् । हेतु सन् । प्रथां विख्यातिम् । (स्कन्द इव) एति प्राप्नोति ॥

नाथ पृथिव्या नहुषाभिधोऽस्मा-
ज्जज्ञे यदाज्ञाजनितावतसा ।

वृन्दारका नो बहुमन्वते स्म
मन्दारमालां मधुपात्तगन्धाम् ॥ १६ ॥

नाथ इति। अस्मात् आयुषः। नहुषाभिधः नहुषनामा। पृथिव्याः नाथः राजा। जज्ञे जातः। वृन्दारकाः देवाः। यस्य नहुषस्य आज्ञया जनितः सपादितः अवतंसः शेखरः येषां ते तादृशाः सन्तः। मधुपैः भृङ्गैः, मद्यपायिभिश्च आत्तगन्धा गृहीतसौरभ्या, अभिभूता च। मन्दारमालाम्। न बहुमन्वते न गणयन्ति। नहुष इन्द्रपदं प्रापेति पुराणम् ॥

अस्माद्भूद्विस्मयभूर्ययाति-
र्भयातिरेकस्तिमिताभियातिः।
कुलाधिनाथस्य कला इवान्या
विधोर्व्यधाद्यो विशदैर्यशोभिः ॥ १७ ॥

अस्मादिति। अस्मात् नहुषात्। विस्मयभूः आश्चर्यभूमिः। भयातिरेकेण भयाधिक्येन स्तिमिताः स्तब्धीकृताः अभियातयः शत्रवः यस्य स तथोक्तः। ययातिः तन्नामा नृपतिः। अभूत्। यः ययातिः। विशदैः धवलैः। यशोभिः कीर्तिभिः। कुलाधिनाथस्य कूटस्थस्य। विधोः चन्द्रस्य। अन्याः। कलाः भागान्। व्यधात् उत्पादयामासेव ॥

अजायताव्याजसुहृत्प्रजानां
स धूर्वहस्तुर्वसुरुर्वरायाः।
अस्य प्रतापांशुमता विचित्र-
ममित्रकान्ता ज्वलिता यदन्तः ॥ १८ ॥

अजायतेति। जनानाम्। अव्याजसुहृत् अकृत्रिम मित्रम्। उर्व-

राया सवसस्याख्याया भूम । धूवह धुरन्धर । स प्रसिद्व । तुर्वसु । अनायत । अस्य तुवसो । प्रताप तेन एव अशुमान् सूर्य तेन । अमित्राणा शत्रूणा कान्ता स्त्रिय । पक्षे मित्रस्य सूयस्य कान्ता उपत्र मित्रकान्ता तादृशा अमित्रकान्ता चन्द्रकान्ता इत्यर्थ । अन्त हृदये । ज्वलिता उत्तप्ता प्रदाप्ताश्च । आसानति यत् तत्, चित्र आश्चय भूतम् । सूर्ये प्रकाशमान सूयकान्ता एव ज्वलन्तीति स्थिति । अमित्रकान्तोज्ज्वल्य तु विस्मयकरमिति भाव । **विभावना** ॥

सचारिण शौर्यरसा इवाग्रे
　नेत्राध्वनीना इव नीतिसारा ।
सजीवबन्धा इव सद्गुणौघा
　सौजन्यमुद्रा इव सप्रतीका ॥ १९ ॥

नाभागवीप्सा नहुपानुवादा
　निमेर्विभाषा नृगमूर्तिभेदा ।
द्विरुक्तयो दाशरथेर्दिलीप
　स्यावृत्तयो धर्मभुवो विकल्पा ॥ २० ॥

मदावला मासलदानकेल्या
　महीभृता पक्षहृतौ महेन्द्रा ।
ससत्त्वताया सरितामधीशा
　पडानना किं च सशक्तितायाम् ॥ २१ ॥

शेष इत्यर्थः। कुण्डलितः कुण्डलनाख्यचिह्नविशेषं प्रापितः, पक्षे मण्डलीकृतः कर्णवेष्टनं कृतो वा। आसीदिति यत्। तत्। युक्तम्। यत्र लिखितस्य ग्रन्थस्य वैयर्थ्यं तत्र कुण्डलना क्रियते इति सम्प्रदाय.। 'तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा। तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि॥' इति नैषधे। उत्प्रेक्षा॥

प्रतिक्ष्मापावलिं पर्यटन्त्या
वीरश्रियो विश्रमहेतुबाहुः।
श्रीतिम्मभूपाज्जितभूस्ततोऽभू-
द्यशोधनादीश्वरभूमिपालः॥ २५॥

प्रतिक्ष्मापेति। प्रतिक्ष्मापावलि प्रतिराजसमूहम्। पर्यटन्त्या भ्रमन्त्या.। वीरश्रियः वीरलक्ष्म्याः। विश्रमस्य विश्रान्तेः हेतुभूतौ बाहू यस्य स तथोक्तः। जिता भूः येन स तादृशः। ईश्वरभूमिपाल. ईश्वरनामा राजा। यशोधनात्। ततः तस्मात् तिम्मभूपात्। अभूत्॥

वृषाङ्कयोरीश्वरयोर्विभूति-
मुपेयुषोरेष परं विशेषः।
राजोत्तमाङ्गे रचिताङ्घ्रिरेक-
स्तत्पादधन्यस्वशिरा यदन्यः॥ २६॥

वृषेति। वृष धर्म. वृषभश्च अङ्कः भूषणं चिह्नं च ययोस्तयोः तथोक्तयो.। विभूतिं ऐश्वर्यं भस्म च। उपेयुषो. प्राप्तयोः। ईश्वरयोः ईश्वरराजस्य शिवस्य च। एष परं एष एव। विशेष. भेदः। एकः ईश्वरनृपतिः। राज्ञां उत्तमाङ्गे शिरसि। रचिताङ्घ्रि. न्यस्तपादः। अन्यः ईश्वरः शिवस्तु।

अपत्रपामंहतिवैभवेन
सुरद्रुमाणामपि सूचयन्तः ।
तदन्वये पुण्यफलादवन्यां
धन्या बभूवुर्धरणीभुजोऽन्ये ॥ २२ ॥

कलापकेन वर्णयति — **सञ्चारिण इत्यादिना**। अग्रे पुरस्तात्। सञ्चारिणः सञ्चरणशीलाः। शौर्यरसा इव। नेत्रयोः चक्षुषोः अध्वनीनाः पथिकाः नेत्रगोचरा इत्यर्थः दृश्यमाना इति यावत्। नीतिसारा इव। मर्जावबन्धाः सप्राणाः। सद्गुणानां ओघाः समूहा इव। सप्रतीकाः शरीरिणः। सौजन्यस्य सुजनतायाः मुद्राः स्वरूपाणीव (स्थिताः) नाभागस्य तदाख्यस्य नृपतेः वीप्साः। नहुषस्य अनुवादाः। निमेः विभाषा। नृगस्य मूर्तिभेदाः स्वरूपभेदा। दाशरथेः रामस्य। द्विरुक्तयः। दिलीपस्य आवृत्तयः। धर्मभुवः धर्मपुत्रस्य। विकल्पाः। अत्र वीप्सादिशब्दाः पर्यवसानगत्या सादृश्यगमकाः। तथा च प्रयुज्यते। 'द्विर्भावः पुष्पकेतोर्विबुधविटपिनां पौनरुक्त्यं विकल्पश्चिन्तारत्नस्य वीप्सा तपनतनुभुवो वासवस्य द्विरुक्तिः। द्वैतं देवस्य दैत्याधिपमथनकलाकेलिकारस्य कुर्वन्नानन्दं कोविदानां जगति विजयते श्रीनृसिंहक्षितीन्द्रः ॥' इति ॥ मासलं अधिकं यत् दानं वितरणमेव दानं मदजलं तस्य केल्यां लीलायाम्। मासलदानकेलिरिव मासलदानकेलिरिति विशिष्टं रूपकं वा। मदावलाः गजाः। महीभृतां राज्ञामेव पर्वतानाम्। पक्षाः सहाया एव पक्षाः गरुतः तेषां हृतौ नाशने छेदे इत्यर्थः। महेन्द्राः। सत्त्वं सत्त्वगुणः सत्त्वानि व्यवसाया वा तान्येव सत्त्वानि जन्तूनि तैः सह वर्तन्त इति ससत्त्वाः तेषां भावः ससत्त्वता तस्याम्। यद्वा ससत्त्वता गाम्भीर्यम्। सरितां अधीशाः समुद्राः। किं च। शक्तिः बलमेव शक्तिः आयुधविशेषः

तत्सहितता सशक्तिता तस्याम् । षडानना सुब्रह्मण्या । अहते दानस्य वैभवेन महिम्ना । सुरद्रुमाणा कल्पवृक्षाणामपि । अपत्रपा लज्जाम् । सूचयन्त उत्पादयन्त । धन्या सुकृतिन । अन्ये । धरणीभुज राजान । अवन्याम् । पुण्यफलात् । तस्य तुर्वसो अन्वये वशे । बभूवु जाता । क्रमेण **उत्प्रेक्षा, उपमा, रूपकं अतिशयोक्तिश्च** ॥

नालीकिनीनायकवद्ग्रहेषु
नीहारभूमीधरवन्नगेषु ।
वलासुहृद्वारणवद्गजेषु
तेषु प्रतीतोऽजनि तिम्मभूप ॥ २३ ॥

नालीकिनीति । ग्रहेषु चन्द्रादिषु । नालीकिन्या पद्मिन्या नायक सूर्य स इव । नगेषु पर्वतेषु । नीहारभूमीधरवत् हिमवत्पर्वत इव । गजेषु । वलस्य तदाख्यदानवस्य असुहृत् शत्रु इन्द्र तस्य वारण गज ऐरावत इत्यर्थ, स इव । तेषु तुर्वसुकुलोत्पन्नेषु राजसु । तिम्मभूप तिम्माख्यो राजा । प्रतीत विख्यात । अजनि बभूव ॥

निजेन दोष्णा निखिलां धरित्री-
मस्मिन्वहत्यङ्गदनिर्विशेषम ।
तद्युक्तमीशेन तदोरगाणा
धुरीणद्वह. कुण्डलितो यदासीत ॥ २४ ॥

निजेनेति । अस्मिन् तिम्मभूपे । निजेन । दोष्णा भुजेन । निखिला समस्ताम् । धरित्रीं भूमिम् । अङ्गदनिर्विशेष अङ्गदतुल्य यथा तथा । वहति सति । ईशन परमेश्वरेण । उरगाणा सर्पाणाम् । कुलोद्वह कुलश्रेष्ठ

स्फुटीचकारास्य पुनर्वितीर्य

शौर्यं तथौदार्यमवार्यचर्यम् ॥ २९ ॥

महीति । महीपतिः नृसिंहनृपतिः । मानवनाम दुर्गम् । शकाधिनाथेन सम तुरुष्कराजेन सह । गृहीत्वा । अस्य सम्बन्धसामान्ये षष्ठी अस्मै इत्यर्थः । अस्येत्यस्य स्फुटीचकारेत्यत्रान्वयो वा । पुनः । वितीर्य दत्त्वा । अवार्यचर्यं अनिवारितप्रक्रमम् । शौर्यम् । तथा । औदार्यं दातृत्वं च । स्फुटीचकार प्रकाशयामास ॥

प्रायोऽर्णवे सेतुकृतोऽवतारः

प्राग्जन्मसंस्कारवशादिवैषः ।

सेतुं विधायाम्भसि सह्यजायाः

श्रीरङ्गपूर्वां नगरीं जहार ॥ ३० ॥

प्राय इति । प्रायः प्रायेण । । अर्णवे समुद्रे । सेतुकृतः सेतुनिर्मातुः श्रीरामभद्रस्येत्यर्थः । अवतारः । एषः नरसिंहराजः । प्राग्जन्मसंस्कारः पूर्वजन्मवासना तद्वशादिव । सह्यजायाः कावेर्याः । अम्भसि जले । सेतुम् । विधाय । श्रीरङ्गपूर्वां नगरीं श्रीरङ्गपट्टणम् । जहार वशीचकार । उत्प्रेक्षा ॥

कंसं यथा कैटभजिद्बलेन

समन्वितः सैनिकमल्लहन्ता ।

मदप्रवृत्तं मरवं मथित्वा

महीमहेन्द्रो मधुरामहार्षीत् ॥ ३१ ॥

कंसमिति । महीमहेन्द्रः नृसिंहभूपतिः । बलेन सैन्येन पक्षे बलरा

मेण च । समन्वित । सैनिकमल्लानां सैन्येषु बलवतां हन्ता व्यापादक, पक्षे सैनिकमल्लस्य चाणूराख्यस्य मल्लस्य हन्ता सन्। मदेन दर्पेण प्रवृत्त युद्धाय प्रवृत्त अथवामत्त वा। मरव मरवजातीय तदातन नृपतिम्। कैटभजित् कृष्ण। कम यथा कंसमिव। मथित्वा हत्वा। मधुरां पाण्ड्य-राजधानीं दक्षिणदेशस्थां मधुरापुरीम्, पक्षे सुप्रसिद्धां मथुरानगरीम्। अहार्षीत् हृतवान्। उपमा ॥

> महेन्द्रलोकं मरवाय दत्त्वा
> मध्येसमीकं मधुरां स जह्रे ।
> महीयसामेष महीपतीनां
> नयो विपक्षेष्वपि नान्यथा स्यात् ॥ ३२ ॥

महेन्द्रेति ॥ स नृसिंहभूपतिः। मध्येसमीकं युद्धमध्ये। मरवाय। महेन्द्रलोकं स्वर्गम्। दत्त्वा। मधुरां मधुरानगरम्। जह्रे हृतवान्। महीयसां श्रेष्ठानां महीपतीनां राज्ञाम्। एष नय स्वल्पस्वीकारपूर्वकमधिकप्रदानरूपा रीतिः। विपक्षेषु शत्रुष्वपि। अन्यथा। न स्यात्। युद्धे मृतानां वीराणां स्वर्गो भवतीत्यागम। 'कावेरीमाशु बद्ध्वा बहुलजलरयां तां विलङ्घ्यैव शत्रु जीवग्राहं गृहीत्वा गमिति भुजबलात्तच्च राज्य तदीयम्। कृत्वा धीरप्रपूर्वं तदपि निजयशे पदप यो बभाज कीर्तिस्तम्भ निखाय त्रिभुवनभवनस्तूयमानापदान ॥ चेर चोल च पाण्ड्य तमपि च मधुरावल्लभ मानभूष वार्योदम तुरुष्क गजपतिनृपतिं चापि जित्वा तदन्यान्। आगङ्गातीरलङ्काप्रथमचरमभूभृत्तटान्त नितान्त ख्यातः क्षोणीपतीनां स्रजमिव शिरसां शासन यो व्यतानीत् ॥' इति श्रीरङ्गगयताप्रशस्ते नृसिंहराजवर्णनम् ॥ अर्थान्तरन्यासः ॥

क्रुधापतन्तं सह कुञ्जरौघै-
कोनेटिराजं क्षुभितान्यसैन्यः ।
जग्राह पाणौ जगदेकवीरो
जयाब्धिकन्यामपि जन्यभूमौ ॥ ३३ ॥

क्रुधेति ॥ जगदेकवीरः लोकैकशूरो नृसिंहराजः । बाहुलकात् 'एक-वीर" इति साधु । यद्वा एकेषु मुख्येषु वीरयते पराक्रमते इति व्युत्पत्तिः कार्या । क्षुभितानि क्षोभं प्राप्तानि अन्यसैन्यानि शत्रुसेना येन तथोक्तः सन् । कुञ्जरौघैः गजसमूहैः सह । क्रुधा कोपेन । आपतन्तं योद्धुमागच्छन्तम् । कोनेटि(रि) राजं कोनेरिनामकं नृपम् । जयाब्धिकन्या जयलक्ष्मीमपि। जन्यभूमौ युद्धभूमौ पितृगृहे च । पाणौ जग्राह करे गृहीतवान्, युद्धे भयेन पलायमानस्य कोनेटिराजस्य हस्तमग्रहीत्, अन्यत्र जयलक्ष्म्या पाणिग्रहणमकार्षीदित्यर्थः । 'जन्यं हट्टे परीवादे संग्रामे च नपुंसकम् । जन्या मातृवयस्यायां जन्यः स्याज्जनके पुमान् । त्रिषूत्पाद्ये जनिजोश्च नवोढाज्ञातिभृत्ययोः । वरस्निग्धेऽपि' इति विश्वः । **तुल्ययोगिता** ॥

प्रयाणमाशाविजयाय तस्य
प्रायो गृहप्राङ्गणभूविहारः ।
दानान्यहो षोडश विश्रुतानि
जातानि दैनदिनमेव कृत्यम् ॥ ३४ ॥

प्रयाणमिति ॥ तस्य नृसिंहराजस्य । आशानां दिशां विजयाय । प्रयाणम् । प्रायः । गृहस्य प्राङ्गणभुवि चत्वरप्रदेशे विहारः लीला, लीला

समरणमदशामित्यर्थ । विश्रुतानि प्रसिद्धानि । षोडश । दानानि । दिने दिने दिने भव, प्रतिदिवसमनुष्ठीयमानामि यर्थ । कृत्य कर्म । जातानि । अहो इत्याश्चय । षोडश दानानि च 'भूम्यासन जल वस्त्र प्रदीपोऽन्न तत परम् । ताम्बूलच्छत्रगन्धाश्च माल्य फलमत परम । शय्या च पादुका गाव काञ्चन रजत तथा ।' इत्युक्तानि ॥

तत्स्वातिवर्षेण तथा बुधाना
पूर्णासु जाता करशुक्तिकासु ।
मुक्ता यशोमूर्तिजुषो निभूषा
कण्ठेष्वभूवन्ककुबङ्गनानाम ॥ ३५ ॥

तत्स्वेति ॥ तस्य स्वाना धनाना अतिवर्ष अतिशयित दानमेव स्वातिवर्ष स्वातीनक्षत्रयुक्तकालोत्पन्ना वृष्टि तेन । बुधाना विदुषाम् । करा हस्ता एव शुक्तिका मुक्तास्फोटा तासु । तथा । पूर्णासु भर्तासु । जाता । यशोमूर्तिजुष कीर्तिरूपधारिण्य । मुक्ता मुक्ताफलानि, तन्वीनिय एव मुक्ताफलानीति भाव । ककुभ दिश एव अङ्गना स्त्रिय तासाम् । कण्ठेषु । विभूषा आभरणानि । अभूवन् । स्वातीवर्षं शुक्तिकासु पतिता अम्बुधारा मुक्ताफलानि भवन्तीति प्रसिद्धि । 'स्वात्या सागरशुक्तिमध्यपतित तन्मौक्तिक जायते ।" इति भर्तृहरिसुभाषितम् । "स्वातौ सपत्नी किल तार काणां मुक्ताफलानां जननीति रोषात् । सा रोहिणी नीलमसूत रत्न कृता स्पदं गोपवधूकुचेषु ॥' इति श्रीकृष्णकर्णामृतम् । रूपक उत्प्रेक्षा च ॥

गौरिल्वटव्यां गवयं प्रकाश्य
पय प्रदोहं प्रति याच्यमाना ।

कूलंकषक्षुत्तरलैः कुमारै-
　　र्व्रीडामवापुर्विमतास्तदीयाः ॥ ३६ ॥

गौरिति ॥ तदीया नृसिंहराजसंबन्धिन । विमता शत्रव । कूलंकषया समधिकया क्षुधा बुभुक्षया तरलैः चपलै दुरवस्थैरित्यर्थ । कुमारैः बालकै । अटव्या वने । गवय गोसदृश मृगविशेषम् । गौः इति इव धेनुरिति । प्रतार्य गवयमानीय प्रदर्श्य त दर्शयित्वेत्यर्थ । पय-प्रदोह प्रति क्षीरदोहनमुद्दिश्य । बाध्यमाना मुहुर्मुहुर्निबन्धेन क्लेश्यमाना सन्त । व्रीडा लज्जाम् । अवापु प्राप्तवन्तः । **भ्रान्तिमदलङ्कारः** ॥

प्रयातुमेतत्प्रतिभूपतीनां
　　प्राणानिलो नाक्षमताहवेषु ।
व्यलम्बतैषां वदनेषु तृण्यां
　　विलोक्य किं वाहमृगोऽदसीयः ॥ ३७ ॥

प्रयातुमिति ॥ आहवेषु युद्धेषु । एतस्य नरसिंहराजस्य ये प्रतिभूपतय शत्रुराजा तेषाम् । प्राणानिल प्राणवायु । प्रयातु निर्गन्तुम् । न अक्षमत न शक्तोऽभवत् । तत्र हेतुमुत्प्रेक्षते — **व्यलम्बतेति** । अदसीय अमुष्य वायोः संबन्धी । वाहमृगः वाहनभूतो हरिण । एषा शत्रुनृपाणाम् । वदनेषु मुखेषु । तृण्यां तृणसमूहम् । विलोक्य । (लोभेन) व्यलम्बत विलम्बमकरोत्किम् । वायोर्वाहन मृग इति पुराणेषु । अत एव पृषदश्व इति तस्य नाम । तृणदर्शनेन तद्भक्षणाय प्रवृत्तस्य स्ववाहनस्य हरिणस्य विलम्बात् न शत्रुनृपतीना वदनात्प्राणानिल प्रचचालेति विशिष्टोत्प्रेक्षा । युद्धेषु तृणमुखानभयार्थियो नृपतीनयं ररक्षेति तात्पर्यम् । अत्र क्लान्ता मुखेन तृणवहन शरणागतिचिह्नमिति युद्धसंप्रदायः ॥

प्रकाशमानादिशि तत्प्रतापा-
त्प्रायेण लब्ध्वा परिभूतितापम् ।
पतिस्त्विषा पङ्कजकोरकेषु
कालं नयत्येष करं निधाय ॥ ३८ ॥

प्रकाशमानादिति ॥ एष । त्विषा पति सूर्यः । दिशि । प्रकाशमानात् दीप्यमानात् । तस्य प्रतापात् कोशदण्डजतेजस । परिभूत्या पराजयेन जात य ताप तम् । लब्ध्वा । (शैत्यापचाराय) पङ्कजकोरकेषु पद्ममुकुलेषु । करं हस्त किरण च । निधाय निक्षिप्य । कालम् । प्रायेण । नयति गमयति । उत्प्रेक्षा । तद्व्यञ्जक प्रायेणेति पदम् । एवमन्यत्रापि ॥

वस्त्वोकसारेव विभोर्वसूना
बलाभियातेरमरावतीव ।
विशापुरी विस्मयभूरमुष्य
विशिष्य राज्ञोऽजनि राजधानी ॥ ३९ ॥

वस्त्वोकसारेति ॥ अमुष्य । राज्ञ । विशिष्य विशेषत । विस्मयम् आश्चर्यस्थानम् । विशापुरी । वसूनां धनानाम् । विभो प्रभो कुबेरस्यत्यर्थः । वस्वोकसारा अलकापुरीव । बलाभियाते इन्द्रस्य । अमरावतीव । राजधानी । अजनि जाता । जनी प्रादुर्भावे इत्यस्मात्कर्तरि लुङि "दीपजन " इति चिण् ।

धिलेशयेशं विममिन्यपेत्र
गृह्णन्ति यत्स्वैयहृतावगाहा ।

आलोक्य तन्मौलिमणीनलात-
मोहेन मुञ्चन्ति पुनर्मदेभाः ॥ ४० ॥

विलेशयेति ॥ यस्या. विद्यापुर्याः खेयेषु परिखासु कृतः अवगाहः प्रवेशः यैस्ते तथोक्ताः । मदेभाः मत्तगजाः । विले शेरत इति विलेशयाः सर्पाः तेषां ईश श्रेष्ठम् । विस मृणालम् । इति अवेत्य मत्वा । गृह्णन्ति । पुन, पश्चात् । तस्य विलेशयेशस्य मौलिमणीन् फणारत्नानि । आलोक्य । अलातमोहेन अङ्गारखण्डभ्रमेण । मुञ्चन्ति विसृजन्ति । **भ्रान्तिमान् उदात्तं च** ॥

सुधाभुजो यत्सदनध्वजेषु
स्वैरं नभोलङ्घनजाङ्घिकेषु ।
न जानते नन्दनवल्लरीणा-
मुपघ्नविन्यासभुव. प्रयासान् ॥ ४१ ॥

सुधेति ॥ यस्या सदनध्वजेषु गृहकेतुदण्डेषु । स्वैरं स्वेच्छया निष्प्रतिबन्धमित्यर्थः । नभस आकाशस्य लङ्घने तरणे जाङ्घिकेषु जङ्घालेषु आकाशतरणपर्याप्तेष्वित्यर्थः, आकाशादुपर्यपि सुदूरं गच्छत्स्विति यावत् । सुधाभुज देवा । नन्दनवल्लरीणां नन्दनोद्यानलतानाम् । उपघ्नाना आश्रयभूतवृक्षाणां विन्यासभुव. स्थापनेन जायमानान् । प्रयासान् । न जानते न विदन्ति । **अतिशयोक्तिः** ॥

कपोलकापात्करिणो वलारेः
श्लथासु यत्सौधमणिच्छटासु ।

मदाम्बुरेखाजुषि तत्प्रदेशे
मग्ना द्विरेफा मणयो भवन्ति ॥ ४२ ॥

कपोलेति ॥ यस्या सौधाना प्रासादाना मणिच्छटासु रत्नपङ्क्तिषु । वलारे, करिण ऐरावतस्य । कपोलकषात् गण्डस्थलघर्षणात् । श्यासु गलितासु सतीषु । मदाम्बुरेखाजुषि मदजलरेखायुते । तत्प्रदेशे तस्मिन् स्थले । मग्ना गन्धलोभेन निलीना । द्विरेफा भ्रमरा । मणय रत्नानि । भवन्ति ॥

सयत्ननिर्यत्नगतिर्गवाक्ष-
मार्गे यदुच्चैर्मणिहर्म्यरुद्ध ।
प्रायेण पक्षद्वितये प्रवृद्धि-
परिक्षयौ निन्दति नन्दतीन्दु ॥ ४३ ॥

सयत्नेति ॥ इन्दु चन्द्र । यस्या उच्चैर्मणिहर्म्यै उन्नते रत्नमयैर्धनिनां वासगृहै रुद्ध गमने प्रतिबद्ध । गवाक्षमार्गे वातायनपथे । सयत्ना शुक्लपक्षे वृद्धे सप्रयासा निर्यत्ना कृष्णपक्षे ह्रासात् निष्प्रयासा च गति गमन यस्य स तथाक्त सन् । पक्षद्वितये शुक्लकृष्णपक्षयो । (क्रमेण) प्रवृद्धिपरिक्षयौ पुष्टिनाशौ । प्रायेण निन्दति । नन्दति च । अत्र सम्भावनामात्रमिति नोत्प्रेक्षा ॥

सौधाग्रकेल्या यदणूदरीषु
शाखार्पितप्रस्मृतभूषणासु ।
ऐश्वर्यवन्तस्तरव सुराणा-
मौदार्यमुद्रा ध्रुवमाश्रयन्ते ॥ ४४ ॥

सौधेति ॥ यस्यां विद्यमाना अणूदर्य कृशोदर्य स्त्रिय तासु ।

सौभाग्यकेल्या प्रासादाग्रविहारकाले । शाखासु अर्पितानि लम्बितानि प्रसृतानि विस्मृतानि भूषणानि याभिस्तासु तथोक्तासु सतीषु । (तैर्भूषणै) ऐश्वर्यवन्त समृद्धिमन्त । सुराणा तरव कल्पवृक्षा । औदार्यमुद्रा दातृत्व प्रसिद्धिम् । आश्रयन्ते भजन्ति । ध्रुवम् । उत्प्रेक्षातिशयोक्ती ॥

मदावलाना कटमध्यवान्तै-
मदैर्नदीमातृकता प्रयाता ।
यन्नेतुरुर्वीकमितुर्यशोभि-
रशोभि भूराश्रितसस्यलास्या ॥ ४५ ॥

मदावलेति ॥ मदावलाना गजानाम् । कटमध्यवान्तै गण्डस्थल मध्यगान्तै । मदै मदजलै । नदी माता पालिका यस्या सा नदीमातृका तस्या भाव नदीमातृकता ता जलसमृद्धिमित्यर्थ । प्रयाता । भू भूमि । आश्रित सस्याना लास्य नर्तन अभिवृद्धि या सा तथोक्ता सती। यन्नेतु यस्य नायकस्य। उर्वीकमितु राज्ञ । यशोभि कीर्तिभि । अशोभि शोभिता ॥

मखावतीर्णेषु महीसुराणा
मरुत्सु शून्या नगरी मघोन ।
प्रजासमाजै परिणाहिलक्ष्म्या
प्रयाति यस्या न समानकक्ष्याम् ॥ ४६ ॥

मखेति । मरुत्सु देवेषु । महीसुराणा ब्राह्मणानाम् । मखावतीर्णेषु याग प्रत्यागतेषु सत्सु । शून्या जनशून्या । मघोन पुरी इन्द्रनगरी अमरावती । प्रजासमाजै प्रजासमूहै । परिणाहिना विस्तारवती लक्ष्म्या श्री

यश्या तथोक्ताया । यस्या । समानकक्ष्या सम्बन्धस्थितिं सादृश्यमित्यर्थ । न प्रयाति । काव्यलिङ्गमतिशयोक्तिश्च ॥

उपर्यध. पुष्पफलैरुदग्र-
मुद्यानमामोद्य दिव भुव च ।
आवालवारिण्यनुबिम्बदम्भा-
द्रसातल रञ्जयतीव यस्याम् ॥ ४७ ॥

उपरीति । यस्याम् । उद्यान आराम । उपरि उपरिभागे । अध अधोभागे च । (क्रमेण) पुष्पाणि फलानि च तै । उदग्र श्लाघ्य सत् । दिव स्वर्गम् । भुव भूमि च । आमोद्य वासयित्वा सतोष्य च । आवालवारिणि आलवालजल । अनुबिम्बदम्भात् प्रतिबिम्बव्याजात् । रसातल पातालम् । रञ्जयति रक्त करोति सतापयतीव । पुष्पफलसमृद्धिमन्तोऽद्युमनाश्च तस्या पुरि वृक्षा इति भाव । अपह्नुति उत्प्रेक्षा उदात्त च ॥

वियत्तरूणा व्यतिघट्टितासु
शाखाञ्चलै सौधपताकिकासु ।
साधर्म्यभाजा शतमन्युपुर्या-
सदण्डलास्येन समीक्ष्यते या ॥ ४८ ॥

वियदिति । या नगरी । सौधपताकिकासु प्रासादध्वजदण्डेषु । वियत्तरूणा कल्पवृक्षाणाम् । शाखाञ्चलै शाखाग्रै । व्यतिघट्टितासु सघर्षं प्राप्तासु सतीषु । साधर्म्यभाजा सादृश्य प्राप्तया । शतमन्युपुर्या इन्द्रनगर्या सह । सदण्डलास्या दण्डलीलासहितेव नृत्यादपि कुर्वाणेवेत्यर्थ । समीक्ष्यते दृश्यते । उत्प्रेक्षा ॥

पूषोत्पलेशावपि पुष्पवन्ता
विर्तीव यत्रोपवनी कृतेर्ष्यौ ।
प्रवर्द्ध्य चैतद्रिपुमन्तरन्ध
पादार्पण न क्षमते तदीयम् ॥ ४९ ॥

पूषेति ॥ यत्र नगर्याम् । उपवना उद्यानम् । पूषा सूर्य उत्पलेश चन्द्र तावुभावपि । पुष्पवन्तौ पुष्पसहितौ पुष्पवच्छब्दवाच्यौ । इति । कृतेर्ष्यौ ईर्ष्यायुतेव । अ त स्वा त प्रदेशे । एतयो सूर्याच द्रमसो रिपु शत्रुम् । अन्ध तम । प्रवद्ध्य प्रकषण पाषयित्वा । तदीय सूर्यान द्रम स्सवन्धि । पादार्पण चरणवि यास किरणप्रवेश च । न क्षमत न सहते । 'एकयोक्त्या पुष्पव तौ दिवाकरनिशाकरौ ।' 'अन्ध तमस्यपि । इत्यमर ॥

स्पृशत्युदस्तेन विधावुदग्र
पादेन यत्सौधपितामहाण्डम् ।
समन्तत कन्दलतीन्दुकान्त
निष्यन्दसन्दोहनिभाद्द्युसिन्धु ॥ ५० ॥

स्पृशतीति ॥ विधौ च द्र एव विष्णौ । उदस्तेन प्रसारितेन ऊर्ध्वा क्षिप्तेन च । पादन किरणनैव चरणन । उदग्र उन्नतम् । यस्या सौध एव पिता महाण्ड ब्रह्माण्ड तत् । स्पृशति सति । सम तत समन्तात् । इ दुका तनि ष्यन्दनिभात् च द्रकान्तनिष्य दव्याजेन । द्युसिन्धु गङ्गा । कन्दलति प्रस्रवति । **रूपक अपह्नुतिश्च** ॥

आद्यैरपि क्षोणिपतिप्रकाण्डै-
राकाङ्क्षणीयस्त्वयशोऽवतार ।

वसन्स तस्यां वसुधापतीना
कन्यामणी काञ्चनपर्यणैपीत् ॥ ५१ ॥

आद्यैरिति ॥ आद्यं क्षोणिपतिप्रवाण्डै पुरातनैर्नलनहुषरामादिभि र्नृपतिश्रेष्ठैरपि । आकाङ्क्षणीय स्पृहणीय स्वयशोऽवतार निजकीर्तिप्र सरो यस्य स तथोक्त । स नृसिंहराज । तस्या विद्यापुर्याम् । वसन् सन् । वसुधापतीना राज्ञाम् । काञ्चन । कन्यामणी प्रशस्ता कन्यका पर्यणैषीत् पारणीतवान् ।

तिस्रो नृपस्यैत्यभवन्नभीष्टा-
स्तिप्पाम्बिका तासु च नागमाम्बा ।
पट्टाभिषिक्ता पतिदेवताना-
मुत्तंसभूपामणिरोबमाम्बा ॥ ५२ ॥

तिस्र इति ॥ तासु परिणीतासु राजकन्यकासु । तिप्पाम्बिका नागमाम्बा । पट्टाभिषिक्ता महिषी । पतिरेव देवता यासा तासां पतिदेवताना पतिव्रतानाम् । उत्तंसभूषामणि चूडामणिभूता । ओबमाम्बा च । इति तिस्र । नृपस्य नरसिंहराजस्य । अभीष्टा प्रिया । अभवन् ॥

तिप्पाम्बिकाया द्विजसंपदेऽभू-
द्विख्यातिमान्वीरनृसिंहराय. ।
नागाम्बिकायां नरसावनीन्द्रो.
र्कीर्तिकरोऽजायत कृष्णराय ॥ ५३ ॥

तिप्पाम्बिकायामिति ॥ नरसावनीन्द्रो नरसिंहराजस्य । द्विजाना ब्राह्मणानां संपदे संपदर्थम् । तिप्पाम्बिकायाम् । विख्यातिमान् प्रसिद्ध ।

प्रयों नीलिम्न नैल्यस्य अपदेशात् व्याजात् । मुषित चोरित । कैतवापह्नुतिः ।

उदरास्थितमुत्पलेक्षणाया
कुलदीप कुमुदिन्यधीश्वरेण ।
अभिरक्षितुमर्भक विसृष्टा
रजनीवाजनि रोमराजिरखा ॥ ३ ॥

उदरेति॥ उत्पलेक्षणाया इन्दीवराक्ष्या । अस्या राज्ञ्या । रोमराजि रोमावलि । उदरास्थित कुक्षिस्थम् । कुलदीप वंशप्रदीपकम् । अर्भक शिशुम् । अभिरक्षितुम् । कुमुदिन्या अधीश्वरेण चन्द्रेण । विसृष्टा प्रेषिता । रजनी रात्रिरिव । अजनि जाता । उत्प्रेक्षा ॥

अवतार इति स्वय मुरारे-
रुदरस्थ शिशुरुत्पलेक्षणायाः ।
वलिवैभववञ्चनानुकूल
वपुषा वृद्धिजुषा विभाव्यते स्म ॥ ४ ॥

अवतार इति ॥ उत्पलेक्षणायाः । उदरस्थ । शिशु । वलीना त्रिवल्या वैभवस्य गुरुत्वस्य प्रकर्षदर्शनस्येति यावत् , वञ्चनाया प्रतारणाया तदपनयनस्येत्यर्थ , अनुकूल अनुगुण यथा तथा । पक्षे वबयो रभेदात् बले विरोचनसुतस्य दानवस्य यत् वैभव महिमा तस्य वञ्चना या प्रतारणाया तदपनोदनस्येत्यर्थ , अनुकूल यथा तथा । वृद्धि जुषते भजते इति तेन । वपुषा शरीरेण । स्वय आत्मना । मुरारे विष्णो । अवतार त्रिविक्रमावतार । इति । विभाव्यते स्म अमन्यत । काव्य लिङ्गम् ॥

उचकोकमुखे निधाय कार्ष्ण्यं
मुखश श्वेतिमकौमुदीं तथाङ्गे ।
नियतं कुलनेतुरन्वकार्षी-
ज्जठरस्थो जगदीशसूनुरिन्दो ॥ ५ ॥

कुचेति ॥ जठरस्थ उदरस्थित । जगदीशसूनु राजकुमार । कुचौ स्तनावेव कोको चक्रवाकौ तयो मुखे अग्रभाग एव वदन तस्मिन् । कार्ष्ण्यं नैल्यमेव दु खजनित वैवर्ण्यम् । विधाय कृत्वा । तथा । मुखश ओवसम्वाया । अङ्गे । श्वेतिमा धावल्यमेव कौमुदी चन्द्रिका ताम् । विधाय । कुलनेतु वशनायकस्य कुलकूटस्थस्येत्यथ । इन्दो । नियत ध्रुवम् । अन्वकार्षीत् अनुकरोति स्म । अनुकरोति प्रयोगे कर्मणि षष्ठी करणे महाकविशैली । यथा अनुकरोति भगवतो नारायणस्य ' इति कादम्बरी । उपमा ॥

प्रसमीक्ष्य पयोधरं मृगाक्ष्या
मुखत श्यामलिमानमश्नुवानम् ।
अपि गर्भघनोदये व्यरंसी-
दजहत्प्रीतिरहो स राजहंस ॥ ६ ॥

प्रसमीक्ष्येति ॥ स । राजहंस राजश्रेष्ठो नरसिंहभूपतिरेव हंस विशेष । गर्भस्य घन सान्द्र य उदय अभिवृद्धि स एव घनोदय मेघाविर्भावसमय वर्षाकाल इति यावत् , तस्मिन्नपि । मुखत अग्र भागे । श्यामलिमान नैल्यम् । अश्नुवान आप्नुवन्तम् । पयोधर कुच मेव मेघम् । प्रसमीक्ष्य विलोक्य । अजहती अत्यजन्ती प्रीति य स

वीरनृसिंहराय । नागाम्बनाम्नाम् । कीर्त्याकर यशोनिधि । कृष्णरायश्च । अजायत जात ॥

अनन्यसामान्यतया धरायां
दानेन तौ ख्याततरावभूताम ।
आद्यस्तयोर्दैन्यमुषा द्विजाना-
मन्योऽपि वैगुण्यपुषा परेषाम् ॥ ५४ ॥

अनन्येति ॥ तयो वीरनृसिंहरायकृष्णराययो । आद्य वीरनृसिंहराय । अन्य कृष्णरायोऽपि । तौ । (क्रमेण) द्विजानाम । दैन्य कार्पण्य मुष्णाति अपनयतीति तेन । दानेन । परेषा शत्रूणाम् । वैगुण्य विगुणत्व वैकल्यमित्यर्थ, तत् पुष्णातीति तेन दु खजनकेनेति यावत् । दानेन छेदनेन । ददातेर्द्यतेश्च ल्युटि दानशब्दो निष्पन्न । अनन्यसामान्यतया असाधारण्येन । धराया भूमौ । ख्याततरौ अत्यन्त प्रसिद्धौ । अभूताम । एतावत्पर्यन्त प्रायणोपजाति । क्वचिदिन्द्रवज्रोपेन्द्रवज्रे अपि ॥

मणिमिव खनिभूर्महीसुराशी
रभिमतमर्थमिवाम्बुराशिवेला ।
उडुरमणमिवेयमोबमाम्बा
भुवनहिताय बभार गर्भभारम ॥ ५५ ॥

मणिमिति ॥ खनिभू आकरभूमि । मणि रत्नमिव । महीसुराशी ब्राह्मणाशीर्वाद । अभिमत इष्टम् । अर्थ इव । अम्बुराशे समुद्रस्य वेला अम्बुविकृति । उडुरमण चन्द्रमिव । इय ओबमाम्बा । भुवनस्य लोकस्य हिताय । गर्भभारम् । बभार धृतवती । मालोपमा । पुष्पिताग्रा वृत्तम ॥

इति प्रथम सर्ग ॥

द्वितीयः सर्गः ।

शरकाण्डविपाण्डुना मुखेन
स्तनयोरप्युपजातमेचकिम्ना ।
परिणेतृमुदा सम तदासी
त्प्रकट दौहदलक्ष्म पक्ष्मलाक्ष्या ॥ १ ॥

अथ गर्भचिह्नानि वर्णयति— शरेत्यादिना । तदा । पक्ष्मले अक्षिणी यस्यास्तस्याः पक्ष्मलाक्ष्याः ओवमाम्बायाः । दौहदलक्ष्म गर्भचिह्नम् । शरकाण्डवत् काशगुच्छवत् विपाण्डुना गौरेण । मुखेन वदनेन । उपजात मचकिमा नैल्य यस्य तन तथोक्तेन । स्तनयो कुचयो , मुखेन अग्रभागेणापि । परिणतु नायकस्य । मुदा मन्तोषेण । सम साकम् । प्रकटं व्यक्तम् । आसीत् । अनुमानम् ॥

तनयानुपलम्भसभवो यो
नृपतेरैक्ष्यत नीलिमा मुखेन्दौ ।
कुचयो स युगेन कोमलाङ्ग्या
मुषितश्चूचुकनीलिमापदेशात् ॥ २ ॥

तनयेति ॥ तनयस्य पुत्रस्य अनुपलम्भेन अनुत्पत्त्या सम्भव यस्य तथाक्त । य । नीलिमा श्यामत्व वैवर्ण्यमिति यावत् । नृपते । मुखेन्दौ मुखचन्द्र । ऐक्ष्यत दृष्ट । स नीलिमा । कोमलाङ्ग्या सुकुमारगात्र्या ओवमाम्बाया । कुचयो स्तनयो । युगेन युग्मेन । चूचुकस्य स्तना-

तथोक्तः सन् । व्यलासीत् विलसति स्म । अहो इत्याश्चर्ये । हंसस्य घनोदये प्रीत्याविर्भावो विस्मयस्थानमिति भावः । रूपकं विरोधाभासश्च ॥

मुहुरुच्छ्वसितं मुखेन तन्व्या
नयनाभ्यां सह नर्तितप्रसादम् ।
अवलग्नमिवान्तरङ्गमासी-
दवनीपालशिखामणेरशून्यम् ॥ ७ ॥

मुहुरिति ॥ अवनीपालशिखामणेः राजचूडामणेर्नरसिंहराजस्य । अन्तरङ्गं मनः । तन्व्याः ओबमाम्बायाः । मुखेन (सह) उच्छ्वसितं उच्छ्वाससहितम् । आसीत् । मुखस्य उच्छ्वासः निश्वासः । हृदयस्य तु उच्छ्वासः समाश्वासः संतोष इति यावत् । नयनाभ्यां तस्याः नेत्राभ्यां सह । नर्तितः अभिवृद्धः प्रसादः प्रसन्नता दुःखकालुष्याभावः अन्यत्र धावल्यं यस्य तत्तथोक्तम् । आसीत् । (तथा) अवलग्न तस्याः मध्यमिव । अशून्य वैकल्यरहितं तत्तत्कार्यविचारचतुरं पक्षे पुष्टं च । आसीत् । सहोक्तिः उपमा च ।

उदभूज्जगदद्भुतोदयाना-
मुचितो गर्भमुपेयुषोऽर्भकस्य ।
महितो भुजधामविभ्रमाणां
महिलारत्नमनोरथप्रचारः ॥ ८ ॥

उदभूदिति ॥ जगति लोके अद्भुतानां आश्चर्याणां उदयाः उत्पत्तयः तेषाम् । उचितः अनुगुणः । गर्भम् । उपेयुषः प्राप्तवतः । अर्भकस्य शिशोः । भुजयोः यत् धाम तेजः तस्य विभ्रमाणां विलासानाम् । महितः

पूजितं तं पूजितं तदनुरूपं ज्ञानं यावत् । यद्वा जगदद्भुतादयानां श्रुतधा मविभ्रमाणां उचितं । महितः श्रेष्ठः । महिमारसस्य श्रीमदस्य आत्म साम्याया मनोरथस्य दोहदस्य प्रचारः प्रसारः । उदभूत् उत्पन्नः ।

सुदती महतीषु सिन्धुमुक्ता-
स्वनवाप्यादरमाहवाजिरेषु ।
कमितुः करवालखण्डितानां
करिणां कुम्भमणीगणानकाङ्क्षीत् ॥ ९ ॥

सुदतीति ॥ शोभना दन्ता यस्याः सा सुदती राज्ञी । महतीषु श्रेष्ठासु । सिन्धोः समुद्रात् आनीता या मुक्ताः मुक्ताफलानि तासु । आदरं प्रीतिम् । अनवाप्य अलब्ध्वा । आहवाजिरेषु युद्धाङ्गणेषु । कमितुः भर्तुः । करवालेन खड्गेन खण्डितानां मस्तकस्थले दारितानाम् । करिणां गजानाम् । कुम्भेषु शिरःसु विद्यमाना ये मणयः मौक्तिकानि तेषां गणान् समूहान् । अकाङ्क्षीत् आकाङ्क्षितवती ॥

ललनाव्यजनानिलैर्न किञ्चि-
च्चक्रमे सौधगता श्रमं विनेतुम् ।
अलमैहत कन्धराधिरूढा
श्रवणोपान्तसमीरणैः करेणोः ॥ १० ॥

ललनेति ॥ (सा) सौधगता प्रासादमारूढा राज्ञी । श्रमं तदारोहणजन्यं परिश्रमं तदुद्भूतं स्वेदजलमिति यावत् । ललनाभिः परिचारिकाभिः स्त्रीभिः वीज्यमानानां व्यजनानां तालवृन्तानां अनिलैः वातैः । विनेतुं अपनोदयितुम् । किञ्चित् ईषदपि । न चक्रमे न

इच्छति स्म। (किंतु) कन्धरा करेणोर्ग्रीवा तत्पृष्ठमित्यर्थः, अधिरूढा अधिष्ठिता सती। करेणोः गजवध्वाः। श्रवणोपान्ताभ्यां कर्णाञ्चलाभ्यां जायमाने समीरणे वायुभिः। श्रमं अपनेतुम्। अत्र अत्यर्थम्। ऐहत अभ्यलष्यत् ॥

पदमर्पयितु नच प्रसून-
प्रकरेष्वीषदपि प्रगल्भमाना ।
महिषी भृशकर्कशेषु चूडा-
मणिषु द्वेषिमृगीदृशामियेष ॥ ११ ॥

पदमिति ॥ प्रसूनप्रकरेषु कुसुमोच्चयेषु (अपि) पदं चरणम्। अर्पयितुं विन्यसितुम्। ईषदपि किंचिदपि। न च प्रगल्भमाना न शक्नुवती। महिषी पट्टाभिषिक्ता ओबमाम्बा। भृशकर्कशेषु नितान्तकठिनेषु। द्वेषिमृगीदृशां शत्रुस्त्रीणाम्। चूडामणिषु शिरोरत्नेषु। पदं अर्पयितुम्। इयेष वाञ्छति स्म ॥

मुकुरेऽभिमुखीकृते सखीभि-
र्मुखमालोकि न मुद्रितेन्दुगर्वम् ।
विमतैणदृशां विनीतवाचा
विपुलाक्ष्या विमले कपोल एव ॥ १२ ॥

मुकुर इति ॥ विपुलाक्ष्या विशालनयनया राज्ञ्या। मुद्रितः नियमितः निरस्त इत्यर्थः, तादृशः इन्दुगर्वः चन्द्रमदः येन तादृशम्। मुखम्। सखीभिः। अभिमुखीकृते पुरतो धृते। मुकुरे दर्पणे। न आलोकि न दृष्टम्। (किंतु) विनीता विनयसम्पन्ना वाक् यासां तासां तथोक्तानाम्। विमतैणदृशां रिपुस्त्रीणाम्। विमले निर्मले। कपोले गण्डस्थल एव। आलोकि वीक्षितं वीक्षितुमभिलषितमिति वा ॥

अवधीर्य नदीरतिप्रसन्ना
हरिणाक्ष्या मुहुरालुलोकिषासीत् ।
परिपन्थ्यबलाश्रुवाहिनीषु
प्रथमानाञ्जनयोगपङ्किलासु ॥ १३ ॥

अवधीर्येति ॥ अतिप्रसन्ना अत्यन्तस्वच्छा । नदी । अवधीर्य तिरस्कृत्य विहायेत्यर्थः । प्रथमानेन वर्द्धमानेन समधिकेन अञ्जनयोगेन कज्जलसम्पर्केण पङ्किलासु कलुषासु । परिपन्थिनां शत्रूणां अबलानां स्त्रीणां अश्रुवाहिनीषु नयनजलनदीषु विषये । हरिणाक्ष्याः राजमहिष्याः । मुहुः । आलुलोकिषा आलोकितुमिच्छा । आसीत् ॥

कदली ललितोरुकाण्डसाम्ये
जनयामास न जातु सौमनस्यम् ।
अदसीयविखण्डनैकशौण्डा
करिशुण्डैव नृसिंहकम्बुकण्ठ्याः ॥ १४ ॥

कदलीति ॥ कम्बु शङ्ख इव कण्ठः यस्याः सा कम्बुकण्ठी नृसिंहस्य कम्बुकण्ठी स्त्री तस्याः । ऊरुकाण्डसाम्ये ऊरुदण्डसादृश्यविषये । ललिता मनोहरा । कदली रम्भा । सौमनस्यं प्रीतिम् । जातु कदाचिदपि । न जनयामास न उत्पादितवती । (परं तु) अदसीयविखण्डनैकशौण्डा कदलीसम्बन्धि (कदलीकर्मक) खण्डनविषये यथा सादृश्यप्रश्नेन विख्याता या । करिशुण्डा गजहस्त एव । सौमनस्यं जनयामास ॥

अपहाय सुमानि हास्यपात्रा-
ण्यपि पादाब्जलताडनास्पदानि ।

प्रमदं परमाणुमध्यमाया
सुदतीगीतिसुधोचितानि तेनु ॥ १५ ॥

अपहायेति ॥ परमाणुवत् अतिसूक्ष्मं मध्यम मध्यं यस्यास्तथा छाया तया । हासस्य स्मितस्य पात्राणि गोचरभूतानि स्मितेन विकासमानानीत्यर्थः, परिहासपात्राणि च । सुमानि चम्पककुसुमानि । (तथा) पादाघलेन पादाग्रेण यत् ताडनं तस्य आस्पदानि विषयान् स्त्रीणां पादाघातेन पुष्प्यन्तीत्यर्थः, तिरस्कार्याणीति च । सुमानि अशोकपुष्पाण्यपि । अपहाय परित्यज्य । सुदतीनां स्त्रीणां गीतिसुधया गानामृतेन उचितानि परिचितानि गीतिसुधाया उचितानि अनुगुणानीति वा, गानेन विकसन्तीत्यर्थः, उपचारार्हाणि चेति गम्यते । सुमानि नमरुकुसुमान्येव । प्रमदं सन्तोषम् । तेनु चक्रुः । अपहाय विद्यमानानीति योजनया स्वयुपपत्तिः । महाकविप्रयोगाणामेव बहुशः उपलम्भात् समानकर्तृकत्व प्रायिकमिति बहवः । 'स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति बकुलः शीधुगण्डूषसेकात्पादाघातादशोकस्तिलककुरबकौ वीक्षणालिङ्गनाभ्याम् । मन्दारो नर्मवाक्यात्पटुमृदुहसनाच्चम्पको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्कर्णिकारः ॥'

अथ पुसवनादिकं यथाव-
द्विहितं कर्म विशामधीश्वरेण ।
तनयस्य तदीयगर्भभाजो
विभवस्येव नयो विवृद्धयेऽभूत् ॥ १६ ॥

अथेति ॥ अथ अनन्तरम् । विशां अधीश्वरेण जनाधिपेन नृसिंहराजेन । यथावत् यथाशास्त्रम् । अर्हार्थे वतिः । विहितं अनुष्ठितम् ।

पुंसवनादिकं पुमान् सूयतेऽनेनेति पुंसवनं नाम कश्चन संस्कारः, तत्प्रवृति । कर्म । तदीयगर्भभाज ओवमान्वागर्भजुष । तनयस्य सूनो । नय नीति । विभवस्य ऐश्वर्यस्येव । विवृद्धये अभ्युदयाय । अभूत् । उपमा ॥

> अथ वैजनने दिने शुभयौ
> हरिणाक्षी नृपतेरसूत सूनुम् ।
> वसुधातिभरापनोदहेतु
> वसुदेवप्रमदेव वासुदेवम् ॥ १७ ॥

अथेति ॥ अथ पश्चात् । वैजनने सूतिमासे । शुभ अस्यास्तीति शुभयु तस्मिन् । दिने । नृपते हरिणाक्षी राज्ञी । वसुधाया भूमे य अतिभर अधिको भार तस्य अपनोदस्य अपनयनस्य हेतु कारणभूतम् । सूनु पुत्रम् । वसुदेवप्रमदा देवकी । (तादृश) वासुदेव कृष्णमिव । असूत प्रसूतवती । उपमा ॥

> सुदृशामजनिष्ट सूतिगेहे
> सुतजन्मोत्सवसूचनो निनाद ।
> उदयत्युडुपान्धवे किमब्धे-
> र्धृतमौखर्यविपर्यया लहर्य ॥ १८ ॥

सुदृशामिति । सूतिगेहे प्रसवगृहे । सुदृशां स्त्रीणाम् । सुतजन्मोत्सवसूचन पुत्रोत्पत्तिमहोत्सवसूचक । निनाद कलकल । अजनिष्ट जात । उडुपान्धवे चन्द्रे । उदयति उदयमाने सति । अब्धे समुद्रस्य । लहर्य वीचय । धृत मौखर्यस्य मुखरताया कोलाहलस्येत्यर्थ विपर्यय अभाव

याभिस्तास्तथोक्ता । (भवन्ति) स्म । न भवन्त्येवेत्यर्थः । दृष्टान्तालङ्कारः ॥

अवनीरमणैर्वितीर्णमाद्यै-
रगमत्प्राक्तनतां यशोदुकूलम् ।
तदिदं नवमेष दास्यतीति
प्रमदेनेव दिशो दश प्रसेदुः ॥ १९ ॥

अवनीति ॥ आद्यैः अवनीरमणैः प्राक्तनैः राजभिः । वितीर्णं दत्तम् । यशः कीर्तिरेव दुकूलं क्षौमम् । प्राक्तनतां जीर्णताम् । अगमत् गतम् । एष उत्पन्नः कुमारः । नवं नूतनम् । तदिदं यशोदुकूलम् । दास्यति । इति । प्रमदेन सतोषेणेव । दश दिशः । प्रसेदुः प्रसन्ना बभूवुः । उत्प्रेक्षा ॥

अपनीतरजःकणानुषङ्गाः
परितोषाश्रुभरैरिव प्रजानाम् ।
मरुतो व्यवलन्त मन्दमन्दं
नवगन्धोदयनर्तितद्विरेफाः ॥ २० ॥

अपनीतेति ॥ मरुतः वाताः । प्रजानाम् । परितोषाश्रुभरैः आनन्दबाष्पप्रवाहैरिव । अपनीतः निरस्तः रजःकणानुषङ्गः धूलीकणसंबन्धः येषां ते तथोक्ताः । नवः नूतनः अनाघ्रातः इत्यर्थः, तादृशः यः गन्धः परिमलः तस्य उदयेन प्रसारणेन नर्तिताः मोदिताः ताण्डिता वा द्विरेफाः भ्रमराः यैस्ते तथोक्ताश्च सन्तः । मन्दमन्दम् । व्यवलन्त वान्ति स्म । उत्प्रेक्षा ॥

नरपालकनन्दनो रिपूणां
नगरीरेष गरीयसीर्वितीर्य ।

परितोषयिता ममेति नूनं
प्रननर्त ज्वलनः प्रदक्षिणार्चिः ॥ २१ ॥

नरेति ॥ एषः नरपालकनन्दनः राजकुमारः । गरीयसीः बृहत्तराः । रिपूणां शत्रूणाम् । नगरीः पुराणि । वितीर्य प्रदाय । मम । परितोषयिता परितोषकः । (भविष्यति) इति । ज्वलनः अग्निः । प्रदक्षिणाः अर्चिषः शिखाः यस्य स तथोक्तः सन् । प्रननर्त जजृम्भे । नूनं ध्रुवम् ॥

अचिरेण दिशाममुष्य जेतुः
कमलां कल्पितविभ्रमां कटाक्षे ।
अपि कल्पतरुं करेऽक्षिलक्ष्यं
करवाणीति किमम्बुधिर्जजृम्भे ॥ २२ ॥

अचिरेणेति ॥ अचिरेण अविलम्बम् । दिशां विजेतुः दिग्विजय कुर्वाणस्य । अमुष्य राजकुमारस्य । कटाक्षे नेत्रान्ते । कमलां लक्ष्मीम् । कल्पितः कृतः विभ्रम विलासः यया तां तथोक्ताम् । करे हस्ते । कल्पतरु कल्पवृक्षमपि । अक्षिलक्ष्य दृश्यम् । करवाणि कुर्याम् । इति । अम्बुधिः समुद्रः । जजृम्भे जृम्भते स्म किम् । एतावता कल्पवृक्षः केवल श्रुतः, दानशौण्डस्य तदीयहस्तस्य दर्शनं तु साक्षात्कल्पतरुविलोकनमेवेति भावः। तथाचोच्यते 'त्वां पश्यता मया लब्ध कल्पवृक्षनिरीक्षणम् ।' इति ॥

निखिलोऽपि परिष्क्रियाकलापो
जगृहेऽन्तःपुरचारिणा जनेन ।
तनयोदयशंसिना तदानीं
पुलकाः पुरस्सरस्य भूषणानि ॥ २३ ॥

निखिल इति ॥ तदानीम् । तनयोदयशासना पुत्रोत्पत्तिनिवेदकेन । अन्तःपुरे चरितुं शीलमस्येति तेन जनेन । निखिल समस्त । परिष्क्रिया कलाप आभरणसमूह । जगृहे गृहीत । भूषणानि । अस्य परिगृहीतुर्जनस्य । पुलका रोमाञ्चा (इव) पुस्फुरु स्फुरिता स्म । उत्प्रेक्षा ॥

अधिगम्य गिरामतीतमूल्या
श्रुतिभूषा सुतजन्मसूचकस्य ।
प्रवितीर्णपरिष्क्रियाविशेषो-
ऽप्ययमात्मानममन्यताधमर्णम् ॥ २४ ॥

अधिगम्येति ॥ अय राजा । सुतजन्मसूचकस्य तनयोत्पत्तिनिवेदकस्य जनस्य । गिरा वाचमेव । वाचादिशब्दवत् टावन्तो गिराशब्द । 'गीर्भणितिर्गिरा ।' इति त्रिकाण्डशेष । 'ता गिरा करुणा श्रुत्वा' इति प्रयोगश्च । अतीतमूल्या मूल्यातीता अमूल्यामित्यर्थ । श्रुतिभूषा कर्णाभरणम् । अधिगम्य लब्ध्वा । प्रवितीर्ण दत्त परिष्क्रियाविशेष आभरणातिशयो येन स तथोक्त सन्नपि । आत्मानम् । अधम ऋण यस्य स अधमर्ण ऋणधारी तम् । अमन्यत मेने । सर्वाभरणदानमपि पुत्रोत्पत्तिसूचनाया अपर्याप्तमवाप्यममनुतेति भाव ॥

विहितस्नपनो विशामधीशो
वसने हंसविचित्रिते वसान ।
अवलोकितुमर्भकं प्रमोदा-
दवकृष्ट प्रययावरिष्टगेहम् ॥ २५ ॥

विहितेति ॥ विशां अधीश राजा । विहित कृत स्नपन स्नान येन

स तथोक्तः । गिजर्थोऽत्राविवक्षितः । यद्वा विहितं स्नपनं यस्मै सः । हसेन दसासारेण चिह्नेन विचित्रिते विचित्रे । वसने वस्त्रे । वसानः धारयन् । अर्भकं शिशुम् । अवलोकितुं वीक्षितुम् । प्रमोदात् सतोषेण । अवकृष्टः आकृष्टः सन् । अरिष्टगेहं सूतिकागृहम् । प्रययौ यातः ॥

अमुमर्भकमङ्कसीम्नि धात्र्याः

शयितं सातिशयश्रियं स पश्यन् ।

विभवेन विडौजसोऽनुकुर्व-

न्नपि नेत्रैरनुकर्तुमाद्दतोऽभूत् ॥ २६ ॥

अमुमिति ॥ *विभवेन ऐश्वर्येण । विडौजसः इन्द्रस्य इन्द्रमित्यर्थः ।* अनुकुर्वन् अनुसरन् तत्सदृश इत्यर्थः । स नृसिंहराजः । धात्र्याः उपमातुः । अङ्कसीम्नि उत्सङ्गप्रदेशे । शयितं शयानम् । सातिशया सविशेषा श्रीः शोभा यस्य तं तथोक्तम् । अमुम् । अर्भकम् । पश्यन् विलोकयन् । नेत्रैः नयनैरपि । (विडौजसः) अनुकर्तुम् । आदृतः आदरवान् । अभूत् । *निर्निमेषमर्भकमपश्यदित्यर्थः* ॥

परिचर्य्य स जातकर्मणा तं

परिणेता धरणेः प्रमोदमानः ।

वसुधाविबुधान्वसुप्रकर्षै-

र्वसुधानन्दधुरन्धरानतानीत् ॥ २७ ॥

परिचर्य्येति ॥ धरणेः भूमेः । परिणेता नायकः राजा । प्रमोदमानः सन्तुष्यन् । स अर्भकम् । जातकर्मणा जातकर्माख्येन संस्कारेण । परिचर्य्य परिपोष्य, *जातकर्मसंस्कारः शिशोरायुष्कर इति भावः ।* वसुधाविबुधान्

ब्राह्मणान् । वसुप्रकर्षैं धनसमृद्धिभि । आनन्दधुरधरान् आनन्दभार वाहिन । अतानीत् अकरोत् ॥ २७ ॥

चरणेन समेत्य शङ्खपद्मौ
मकराङ्केन मनीषिणा निधाने ।
उदिते तनये तदा पितॄणा-
मृणमुर्वीरमणस्य रीणमासीत् ॥ २८ ॥

चरणेनेति ॥ शङ्खपद्मौ शङ्खपद्माकारौ रेखाविशेषौ निधिविशेषौ च । समेत्य प्राप्य (स्थितन) मकर मीनविशेष तदाकारा रेखा कश्चन निधिश्च अङ्क चिह्न यस्य तेन तथोक्तेन । चरणन । (उपलक्षिते) मनीषिणां विदुषाम् । निधाने निधौ निधिसदृश इत्यर्थ । तनये पुत्रे । उदिते उत्पन्ने सति । तदा । उर्वीरमणस्य राज्ञ । पितॄणा ऋण पितृविषयक ऋणम् । रीण शून्यम् । आसीत् । पुत्रजननेन पितृऋणान्मुक्तोऽभूदित्यर्थ । 'ऋण देवस्य यागेन ऋषीणा दानकर्मणा । सन्तत्या पितृलोकाना शोधयित्वा परिव्रजेत्' । श्लेष परिकर, काव्यलिङ्ग च ॥

कमलाकरपीडनक्षमेऽस्मि-
न्नुदिते राजशिशौ मुदे जगत्या ।
शिथिलाजनि सागसा नृपाणा
चिरकारासदनान्धकारपीडा ॥ २९ ॥

कमलेति ॥ कमलाया लक्ष्म्या करपीडन विवाह स्वीकरणमिति यावत् तस्य क्षमे योग्य, कमलाकरस्य पद्मसरस पीडन उपद्रव तत्र क्षमे शक्ते च । अस्मिन् । राजशिशौ राजकुमारे, बालचन्द्रे च । 'राजा

स्यान्नृपतौ चन्द्रे' इति रभस । जगता लोकस्य । मुदे सन्तोषाय । उदिते उदयमापन्ने सति । सागसा अपराधिनाम् । नृपाणां राज्ञाम् । चिर घट्टो कालात् या कारासदने कारागृहे अन्धकारेण तमसा जाता पीडा उपद्रव सा । शिथिला गलिता । अजनि जाता । राज्ञामभ्युदय-काले बन्धनस्था मुच्यन्ते इति समुदाचार ॥

न पर प्रभया नरेन्द्रसूनो
रभिभूतार्चिररिष्टदीपिकासीत् ।
परिपन्थिवसुन्धरापतीना
हरिदन्तेष्वपि च प्रतापदीप ॥ ३० ॥

नेति ॥ नरेन्द्रसूनो राजकुमारस्य । प्रभया कान्त्या । अरिष्टे सूति कागृहे विद्यमाना दीपिका दीप केवलम् । अभिभूता निरस्कृता अचिप यस्या सा तथोक्ता । नासीत् । (पर तु) हरिदन्तेषु दिगन्तेषु । परिपन्थि वसुन्धरापतीनां शत्रुनृपतीनाम् । प्रतापदीप प्रतापात्मको दीपोऽपि । अभिभूतार्चि आसीत् ॥

मणिमञ्चसमश्रितोऽथ धात्र्या
मधुरालोलिकयाजनिष्ट हृष्ट ।
निनदैरिव निम्नगालहर्या
कलहस कमलान्तरालशायी ॥ ३१ ॥

मणीति ॥ मणिमञ्च रत्नपर्यंङ्क गर्भाश्रित शोभित तत्र शयान इत्यर्थ । स राजकुमार । धात्र्या उपमात्रा । मधुरया मनोहरया आलोलिकया बालस्वापनोपयोगिगीतिकया । मधुरालापिकयेति पाठे तु

तद्विशेषणम् । निम्नगालहर्या नदीतरङ्गस्य । निनदे शब्दे कमलान्तराल शायी पद्ममध्ये शयान । कलहस इव । हृष्ट सन्तुष्ट । अजनिष्ट । जात ॥

नयतो न कदाचन न्युत स्या-
दवतीर्ण स्वयमन्युतोऽयमुर्व्याम् ।
इति शोभनलक्षणै स जान
न्नकरोदात्मजमन्युताभिधानम् ॥ ३२ ॥

नयत इति ॥ अय कुमार । नयत नीतित । कदाचन कदापि । च्युत भ्रष्ट । न स्यात् । अयम् । उर्व्या भूमौ । स्वयम् । अवतीर्ण । अच्युत विष्णुरेव । इति । शोभनलक्षणै शुभनिमित्तै । जानन् विदन् । स नरसिंहराज । आत्मज पुत्रम् । अन्युताभिधान अन्युतनामानम् । अकरोत् ॥

अधिमञ्चमनुक्षण जिघृक्षु
कुरुविन्दस्तवक कुतूहलेन ।
समनह्यदय यथोदयाद्रे-
स्तटशायी तपन मृगेन्द्रशाव ॥ ३३ ॥

अधीति ॥ अय अर्भक । अधिमञ्च मञ्चे । कुतूहलेन अभिलाप चापलेन । कुरुविन्दस्तबक माणिक्यगुच्छम् । उदयाद्रे उदयपर्वतस्य । तटशायी कटके शयान । मृगेन्द्रशाव सिंहशिशु । तपन यथा सूर्यमिव । अनुक्षण क्षणे क्षण । जिघृक्षु ग्रहीतुमिच्छु । समनह्यत् उत्साहवानभूत् ।

उदयारुणमूर्तिरोपधीशो
नियत वशभुवो नृसिंहसूनो ।

व्यरुचद्व्यपदिश्य रत्नगुच्छं
शयनस्योपरि सन्ततावनाय ॥ ३४ ॥

उदयेति ॥ उदये अरुणा रक्ता मूर्तिः यस्य स तादृशः । ओषधीशः चन्द्रः । वंशभुवः स्ववंशजातस्य । नृसिंहसूनोः नरसिंहपुत्रस्य । सन्ततावनाय सततरक्षणाय । शयनस्य उपरि मञ्चोपरिभागे । रत्नगुच्छं रत्नस्तबकम् । व्यपदिश्य व्याजीकृत्य तद्व्याजेनेत्यर्थः । व्यरुचत् अशोभत । नियतं निश्चितम् । रोचते द्युतादित्वात् 'द्युद्भ्यो लुङि' इति परस्मैपदे 'पुषादि—' इति सूत्रेण अङ् ॥

वलमानललन्तिकाविभूषा-
वर्द्धमानद्युतिवर्धिताभिरूप्यम् ।
अवलीढसुधांशुलीलमासी-
दनिदानस्मितमाननं तदीयम् ॥ ३५ ॥

वलमानेति ॥ वलमाना चलन्ती या ललन्तिकाविभूषा किञ्चिल्लम्बमानकण्ठाभरणं तस्याः वर्द्धमानया प्रसरन्त्या द्युत्या कान्त्या वर्धितम् आभिरूप्यं रम्यत्वं यस्य तत् तथोक्तम् । अनिदानम् अनिमित्तं स्मितं यस्य तत् । तदीयं पुत्रसम्बन्धि । आननं मुखम् । अवलीढा ग्रस्ता सुधांशुलीला इन्दुविलासः येन तत् तादृशम् । चन्द्रसदृशमित्यर्थः । आसीत् ।

अवलम्बतया स्थितोऽपि धात्र्याः
करमालम्ब्य स कानिचित्पदानि ।
मणिनूपुरशिञ्जितेन किञ्चि-
त्कृतसंख्यानि किलाङ्गणे व्यतानीत् ॥ ३६ ॥

अवलम्बतयेति ॥ स राजकुमार । धात्र्या भूमे । अवलम्बतया आधारतया । स्थित सन्नपि । धात्र्या उपमातु । कर हस्तम् । अवलम्ब्य अवष्टभ्य । माणनूपुराशिञ्जितेन रत्नमयपादाङ्गदशब्देन । कृता गणिता सख्या येषा तानि, नूपुरध्वनिसख्यया पादविन्याससख्या अनुमीयत इति भाव । कतानचित् । पदानि चरणविन्यासान् । अङ्कणे अजिरे । किंचित् शनै शनै । व्यतानात् अकरोत् किल । **स्वभावोक्ति** ॥

किमपि क्षितिपात्मजे विवक्षौ
विमतानां विरराम वीरवाद ।
सदनाङ्कणसीम्नि सचरिष्णौ
चलितु दिक्षु यश शशाक नैषाम् ॥ ३७ ॥

किमपीति ॥ क्षितिपात्मजे राजकुमारे । किमपि अविस्पष्टवर्णम धीचारित च किंचित् । विवक्षौ वक्तुमिच्छति सति । विमतानां शत्रूणाम् । वीरवाद वय वीरा इत्येवमहकारकोलाहल । विरराम शान्त । (क्षितिपात्मजे) सदनाङ्कणसाम्नि गृहचत्वरप्रदेशे । सञ्चरिष्णौ सञ्चरणशीले । एषां विमतानाम् । यश । दिक्षु । चलितु गन्तुम् । न शशाक शक्त नाभूत् ॥

अजनिष्ट यदाधिवेश्म लौल्या-
न्मणिदीपग्रहण महीशसूनो ।
परिशीलनमेव पर्यणसी-
त्तदहो वैरिमहोहठात्क्रियाया ॥ ३८ ॥

अजनिष्टेति ॥ अधिवेश्म गृहे । महीशसूनो राजकुमारस्य । लौल्यात् बालचापलात् । मणिदीपस्य ग्रहणम् । अजनिष्ट जातम् । (इति) यदा इति यत् । अव्ययानामनेकार्थत्वादनैवमर्थ । यद्वा

यदा यास्मन्काले इति व्याख्याय उत्तरवाक्ये तदा इत्यध्याहारेण व्याख्येयम् । तत् मणिदीपग्रहणमेव । वैरिणा शत्रूणां महस तेजस इष्टक्रियाया प्रत्यादपहरणस्य । परिशीलन अभ्यास । पर्यणसीत् परिणमति स्म ॥

अवलम्ब्य शनै सचङ्क्रमोऽभू-
दवरोधप्रमदाङ्गुलीदलानि ।
पवमानशिशु प्रतानिनीना
परिगृह्णन्निव वालपल्लवानि ॥ ३९ ॥

अवलम्ब्येति ॥ स । अवरोधप्रमदानां अन्त पुरस्त्रीणां अङ्गुली दलानि पत्रतुल्या करशाखा । अवलम्ब्य । प्रतानिनीना लतानाम् । बालपल्लवानि नवकिसलयानि । परिगृह्णन् अवलम्बमान । पवमानशिशु वातपोत इव । शनै मन्दमन्दम् । चङ्क्रमेण गमनेन सहित सचङ्क्रम । अभूत् ॥

बहुशो यदशोभि रत्नभित्तौ
नृपडिम्भप्रतिबिम्बसम्प्रदाय ।
परितो विगतान्भविष्यदास्म
स्फुरणाना निरणायि पूर्वरङ्ग ॥ ४० ॥

बहुश इति ॥ रत्नभित्तौ मणिकुड्ये । नृपडिम्भस्य राजकुमारस्य प्रतिबिम्बानां सम्प्रदाय परम्परा । गुरुशिष्यपरंपरायातोपदेशवाची सम्प्रदायशब्द प्रकृते परपरामात्रलाक्षणिक । बहुश सम्यधिकम् । अशोभि अशोभत । इति यत् । अशोभीति शोभते कर्मणि लुङ् रूपम् । न तु शुभदीप्तौ भेदे कर्मणि । किन्तु दुर्लभत्वात् । राजकुमारस्यात्र कर्ता ।

(तत्) विमतान् परितः शत्रूणां समन्तात्। भविष्यता भाविनां आत्म स्फुरणानां राजकुमारविलसनानाम्। पूर्वरङ्गः प्राथमिकव्यापारः। निर णायि निश्चितम्। जनैरिति शेषः। रूपकेषु प्रथमस्तव्यक्तव्यवाची पूर्वरङ्ग शब्दः प्रकृते एवपर ॥

सुदृशामभजत्सुतोऽङ्कमङ्का
स्खलिताह्वानगिरा करं प्रसार्य।
वलदम्बुरुहा यथा मरालो
नलिनीनामलिनीविराविणीनाम् ॥ ४१ ॥

सुदृशामिति ॥ सुतः राजकुमारः। करं हस्तम्। प्रसार्य तदभि मुखं नीत्वा। स्खलिता कृता आह्वानगीः आगच्छ आगच्छेति वाक् याभि स्तासाम्। सुदृशां स्त्रीणाम्। अङ्कात् उत्सङ्गात्। अङ्कं उत्सङ्गम्। मरालः हंसः। अलिनीविरावेणीनां भ्रमरीझङ्कारवतीनाम्। वलदम्बुरुहां चलत्पद्मानाम्। नलिनीनां पद्मिनीनाम्। अङ्कात्। अङ्कं यथा मध्यमिव। अभजत् प्राप्त ॥

मुखरीकृतमुग्धकिङ्किणीकं
मुहुरङ्कुरितकेलिरङ्गणेषु।
तनुलग्नरजोभरस्तदानी
मवनीधारणसाधनामतानीत् ॥ ४२ ॥

मुखरीकृतेति ॥ अङ्गणेषु। मुखरीकृताः शब्दाय्यमाना मुग्धा मनोहरा किङ्किण्यः क्षुद्रघण्टिका यस्मिन् कर्मणि तद्यथा भवति तथा। मुहुः पुनः पुनः। अङ्कुरिता उन्मिषिता केलिः लीला यस्य सः। (सः) तदानीं लीलाकाले। तनौ शरीरे लग्नः सम्बद्धः रजोभरः धूलिभार

यस्य स तथोक्तः सन् । अवनीधारणसाधना भूधरणाभ्यासम् । अतानीत् तनोति स्मेत्यर्थः । गम्योत्प्रेक्षा ॥

अवनीवलहन्तुरङ्कमध्ये
विहरन्व्यञ्जितचापलो व्यलासीन् ।
अधिसानु यथानुकूलकेलि
कनकक्षोणिभृत करीन्द्रशाव ॥ ४३ ॥

अवनीति ॥ अवनीवलहन्तु भूमीन्द्रस्य नृसिंहराजस्य । अङ्कस्य उत्सङ्गस्य मध्ये । विहरन् क्रीडन् । व्यञ्जित प्रकटित चापल बाललौल्य येन तथोक्त । (स) कनकक्षोणिभृत मेरुपर्वतस्य । अधिसानु सानुनि । अनुकूला स्वैर क्रियमाणा केलि क्रीडा येन स । करीन्द्रशाव करिकलभ इव । व्यलासीत् विललास ॥

अपमार्ज्य दुरक्षराण्यवन्या
रजसो विस्तृतिलक्ष्यत कुमार ।
वलदङ्गुलिनीतवर्णरेखो
व्यलिखत्किं स्वकलत्रभावरेखाम् ॥ ४४ ॥

अपेति ॥ कुमार । रजस धूल्या । विस्तृतिलक्ष्यत प्रक्षेपप्रसारणादिव्यापारेण । अवन्य भूमे । दुरक्षराणि मत्प्रमा लिखितानि क्लेशानेव दर्शानि दुरक्षराणि । अपमार्ज्य परामृश्य अपनीय । वलन्तीभि प्रवलन्तीभि अङ्गुलीभि नीता कृता वर्णरेखा यदृच्छया वर्णस्वरूपसूचकरेखाविशेषा येन तथोक्त सन् । स्वकलत्रभावरेखा स्वपरिग्रहत्वम् चिह्न रेखाम् । व्यलिखत् लिलेख किमित्युत्प्रेक्षा ॥

अथ कैश्चिदहोभिरेव विद्या-
गुरुरध्यापयति स्म तं कुमारम् ।
मधुरुन्मिषितालिमञ्जुघोषः
परपुष्टं किल पञ्चमप्रपञ्चान् ॥ ४५ ॥

अथेति ॥ अथ । तं कुमारम् । गुरुः आचार्यः । कैश्चित् अहोभिः कतिपयैर्दिवसैरेव । विद्याः । उन्मिषितः उज्जृम्भितः अलीनां भ्रमराणां मञ्जुघोषः मनोहरध्वनिः यस्मिन् तादृशः । मधु वसन्तः । परपुष्टं कोकिलम् । पञ्चमप्रपञ्चान् किल पञ्चमस्वरभेदानिव । अध्यापयति स्म अध्यापयामास । किलशब्द इवार्थकः । तथा च यादवाभ्युदये 'निखिलचेतन...' इति पद्यव्याख्याने 'आपगाः किल सरित इव' इति दीक्षिताः ॥

नृपवर्यशिशोर्निसर्गजानां
निखिलानामपि देशिकः कलानाम् ।
परमुल्लसनाय पर्यणंसी-
त्सवितेवाम्बुजकोशसौरभाणाम् ॥ ४६ ॥

नृपेति ॥ देशिकः गुरुः । नृपवर्यशिशोः राजपुत्रस्य । निसर्गजानां स्वाभाविकीनां जन्मान्तरवासनावशादनुवर्तमानानाम् । निखिलानां समस्तानामपि । कलानां विद्यानाम् । सविता सूर्यः । अम्बुजकोशसौरभाणां कमलमुकुलगन्धानामिव । उल्लसनाय परं केवलमुल्लासाय उद्बोधमात्रायेत्यर्थः । पर्यणंसीत् पर्यणमत् उपयुक्तोऽभूदित्यर्थः । 'स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ।' इति कुमारसम्भवः ॥

तरलीकृतखड्गवल्लरीक-

खुरलीसीम्नि सखेटक कुमार ।

समशोभत सचलत्तरङ्गो

जनितावर्त इवाकरो जलानाम ॥ ४७ ॥

तरलीकृतेति ॥ खुरलीसाम्नि शस्त्रविद्याभ्यासभूभागे । तरलीकृता चञ्चलीकृता सर्वत स्फोरितेत्यर्थ खड्गवल्ली कृपाणलता येन स । खेटेन प्रतिभटखड्गपातनिवारणार्थं धृतेन चक्राकारेण चर्मणा सहित सखेटक । कुमार । सचलन्त तरङ्गा ऊर्मय यस्य स । जनित उत्पादित आवर्त अम्भोभ्रम येन स तादृश । जलाना आकर समुद्र इव । समशोभत शुशुभे ॥

अधिरोपयतीन्दुवंशरत्ने

सचमत्कारतया शरासने ज्याम् ।

अतिचित्रममित्रपार्थिवाना-

मवरूढाजनि सेयमंसकूटात् ॥ ४८ ॥

अधीति ॥ इन्दुवंश चन्द्रकुलमेव वंश वेणु तस्य रत्ने मुक्तामणौ राजकुमारे । शरासने धनुषि । ज्या मौर्वीम् । सचमत्कारतया सविस्मयतया । अधिरोपयति आरोपयति सति । अमित्रपार्थिवाना शत्रुराज्ञा नाम् । सा इय ज्या भूमि मौर्वी च । अंसकूटात् अंसशिखरात् । अवरूढा अवतीर्णा । अजनि जाता । इद अतिचित्र अत्याश्चर्यम् । अस्य शत्रवो विहाय राज्य वन्यामागुरिति भाव ॥

परिरक्षणतो वर हि शिक्षा

प्रकृतानेन विगण्डित पटिम्ना ।

मणिचामरहेममानितो य
ध्रियते वन्दिजनेन लोहदण्ड ॥ ४९ ॥

परीति ॥ परिरक्षणत रक्षणादपि । प्रकृता प्रमाता । शिक्षा ाह दण्डेनैव । वर मनाक ाप्रयम् । यत् यत । अनेन राजकुमारण । पाप्मना पटुमावन वलनेत्यथ । ावरा ण्डत भाञत । लाहदण्ड अया दण्ड । माणभि रत्नै चामरण हेम्ना स्वर्णेन च मानित पूजित तद्युक्त सानत्यथ । वन्दिजनन स्तुतिपाठकै ध्रियत । तस्य सामर्थ्य प्रकृन्नाय तन साम्नि लाहदण्ड रत्नादिभिवहुमान्य यता वन्दिना धारयन्ति तता वर शिक्षा रक्षण दिति भाव ॥

मरुत सुहृद मदीयधाम
ज्वलनस्य ज्वलत पुरीष्वरीणाम् ।
निरुणद्धितरा निजान्तरित्था
हितरोपोऽभिनदेप चर्मभस्त्राम् ॥ ५० ॥

मरुतमिति ॥ अरीणा शत्रूणाम् पुरीषु नगरषु ज्वलत ज्वाल ष्यत । वतमानसामीप्ये शता । मदीयधाम मदीय तज एव ज्वलन अग्नि तस्य । सुहृद सहायभूतम् । मरुत वायुम् ।नजान्त स्वस्य अन्त प्रदेशे । निरुणद्धितरा सम्यक् प्रतिबध्नाति । इति । आहित उपन राप कोपा यस्य स तथोक्त (इव) एष राजकुमार । चमभस्त्र अग्निभास्त्र काम् । अभिनत् भिनत्ति स्म । चमभस्त्रभदन महाबलसाध्यम् । तचाप्यय कृतवान् । तत्र हतुरुत्प्राक्षत ॥

अधिगत्य गतित्वरा हयाना
मधिवाह्याल्यमुना प्रचालितानाम् ।

परिपालयतीव भक्तिमुद्रां
पवमान पदरेणुधारणेन ॥ ५१ ॥

अधीति ॥ अधिवाह्यालि वाह्यानि पुराद्बहिर्विद्यमाना विहारप्रदेशा तेषा आलि पङ्क्ति तस्याम् । अमुना राजकुमारेण । प्रचालिताना धावितानाम् । हयाना अश्वानाम् । गतित्वरा गमनवेगम् । अधिगत्य अधीत्य । अधिकृत्येति पाठोऽपि स एवार्थ । पवमान वायु । पदरेणो पादपरागस्य धारणेन । भक्तिमुद्रा भक्तिचिह्न गाढा भक्ति वा । परिपाल्यति रक्षतीव ॥

अधिरोपयति स्म हस्तिकण्ठे
जनता तोपमिषेण जातमात्र. ।
अधुना पटुतामनेकपेन्द्रे
व्यवृणोदित्यपि किंनु विस्मयाय ॥ ५२ ॥

अधिरोपयतीति ॥ स । जातमात्र जात एव । जनता जनसमूहम् । तोपमिषेण सतोषव्याजेन । हस्तिकण्ठे गजोपरि । आरोपयति स्म आरोपयामास । अधुना साम्प्रतम् । अनेकपाना गजाना इन्द्रे श्रेष्ठे, गजराजविषय इत्यर्थ । पटुता तदारोहणसामर्थ्यम् । व्यवृणोत् स्फुटी चकार । इत्येतदपि । विस्मयाय आश्चर्याय किं नु । जातमात्रस्यान्यस्य गजस्कन्धमारोपयत सांप्रत स्वय गजाधिरोहण न विस्मयकरमिति भाव । मनोपस्य परा काष्ठा लोके गजस्कन्धाधिरोहणमपि व्यवह्रियते । तथा च 'एप नामानुग्रहीत । य शुल्कादवतार्य हस्तिस्कन्धे प्रतिष्ठापित ।' इति शाकुन्तलम् । एतस्मिन् वसन्तमालिका वृत्तम् ॥

विद्याः समेत्य विविधा नृपतेस्तदासी-
दानन्दहेतुरतिवाहितशैशवोऽयम् ।
यातः क्रमाद्विलसितानि यथा कलानां
पाथोनिधेः किमपि पार्वणशर्वरीशः ॥ ५३ ॥

विद्या इति ॥ तदा । विविधाः समस्ताः । विद्याः । समेत्य प्राप्य अधीत्येत्यर्थः । अतिवाहितं यापितं शैशवं येन सः । अयं राजकुमारः । क्रमात् । कलानाम् । विलसितानि विलासान् समस्ताः कला इत्यर्थः । यातः प्राप्तः । पर्वणि भवः पार्वणः संपूर्ण इत्यर्थः, तादृशः शर्वरीशः चन्द्रः । पाथोनिधेः यथा समुद्रस्येव । नृपतेः नरसिंहराजस्य । किमपि वक्तुमशक्यतया । आनन्दहेतुः संतोषकारणम् । आसीत् । **वसन्ततिलकं** वृत्तम् ॥

इति द्वितीयः सर्गः ॥

तृतीयः सर्गः ।

अथावनीवासवसूनुरभ्यगा-
दनङ्गराद्धान्तमलंक्रिया तनो ।
वधूजनस्वान्तवशक्रियौषध
वयो नव शैशववासनासहम् ॥ १ ॥

अथेति ॥ अथ । अवनीवासवसूनु पृथिवीन्द्रपुत्र । अनङ्गराद्धान्त कामसिद्धान्तम् । तनो शरीरस्य । अलंक्रिया अलङ्कारम् । वधूजनानां स्त्रीणां स्वान्तस्य मनस वशक्रियौषध वशीकरणभेषजम् । शैशववासना शैशवगन्ध शैशवसंस्कारो वा शैशववार्तामात्रमर्थ, न सहत इत्यसह शैशववासनाया असह शैशववासनासह अतीतशैशवमित्यर्थ । नव नूतनम् । वय तारुण्यम् । अभ्यगात् उपययौ । शैशववासना सहत इति तादृशम् । नव वय बाल्यतारुण्ययो साधर्म्यमिति वा । रूपकम् ॥

चमत्कृत यौवनशिल्पिना तदा
समञ्चितभ्रूलतया सतोरणम् ।
अभूत्प्रवेशार्हमनङ्गभूपते-
रद पुर कान्त्यमृतात्तसेचनम् ॥ २ ॥

चमत्कृतमिति ॥ तदा । समञ्चिता सविभ्रमा या भ्रूलता तया । सतोरण वन्दनमालिकामाहित बहिर्द्वारमाहित वा । कान्त्यमृतेन कान्ति

न्मेन कान्तिसुधया वा आप्तं कृतं सचनं यस्य तत्। यौवनं तारुण्यमेव शिल्पी कारुः तेन। चमत्कृतं सविशेषरमणीयीकृतम्। अद पुरं अमुष्य पुरं शरीरमेव नगरम्। 'पुरं नगरदेहयोः' इति विश्वः। अनङ्गभूपते मन्मथराजस्य। प्रवेशार्हं प्रवेशयोग्यम्। अभूत्। परिणामः ॥

वचोऽधिदेव्या वदनाश्रितस्थिते-
र्वतंसकर्णोत्पलवर्णधोरणी ।
व्यराजतामुष्य कपोलमण्डले
विकस्वरश्मश्रुमिषेण विम्बिता ॥ ३ ॥

वच इति ॥ वदने मुखे अश्रिता पूजिता स्थितिः यस्यास्तस्याः वचोधिदेव्याः सरस्वत्याः। वतंसः अलङ्कारभूतं यत् कर्णोत्पलं तस्य वर्णधोरणी कृष्णवर्णरेखा। विकस्वरस्य विलसतः श्मश्रुणः मिषेण व्याजेन। अमुष्य राजकुमारस्य। कपोलमण्डले गण्डमण्डले। विम्बिता प्रतिफलिता सती। व्यराजत विरेजे। सापह्नवोत्प्रेक्षा ॥

वहत्यविच्छिन्नतयैव कर्णिका
मणिप्रभास्रोतसि मांसलोदये ।
महीवलाकृच्छमतीयेव त
त्कपोलभूः श्मश्रुकरम्बिताभवत् ॥ ४ ॥

वहतीति ॥ मांसलः सान्द्रः उदयः अभिवृद्धिः यस्य तस्मिन्। कर्णिकयोः कर्णालङ्कारयोः मणीनां रत्नानां प्रभास्रोतसि कान्तिप्रवाहे अविच्छिन्नतया अविच्छिन्नेव। वहति प्रवहति सति। श्मश्रुकरम्बिता श्मश्रुव्याप्ता। तत्कपोलभूः तस्य कपोलप्रदेशः। शैवलाङ्कुरधर्मकमि,

शैवाललेशेन जायमाना या चमत्क्रिया शोभा त सहितेव । अभवत् । रूपक उत्प्रेक्षा च ॥

विधि सरोजं व्यधित स्वमन्दिर
तुषारपातोऽपि न तेन सह्यते ।
इतीव सानन्दममुष्य वन्धुर
भुजान्तर मन्दिरमिन्दिरातनोत् ॥ ५ ॥

विधिरिति ॥ विधि ब्रह्मा । सरोज पद्मम् । स्वस्य आत्मन मन्दिर गृहम् । व्यधित कृतवान् । तेन सरोजेन । तुषारपात हिमपतनमपि, अस्त्राभिघातोऽपीति च । न सह्यते । इतीव इति मत्वा । इन्दिरा लक्ष्मी । सानन्द आनन्दसहित यथा तथा । वन्धुर मनोहर सर्वं गृहमिति यावत् । अस्य । भुजान्तर वक्ष । मन्दिर गृहम् । अतनोत् अकुरुत । **उत्प्रेक्षा** ॥

फणाधरेन्द्र परिहृत्य भीषण
दृढादरामसतटाधिरोहणे ।
महीतुमस्य प्रभुतावित्र क्षमा
व्यराजता जानुविलम्बिनौ भुजौ ॥ ६ ॥

फणेति ॥ अस्य । जानुविलम्बिनौ आजानुदीर्घौ । भुजौ । भीषण भयकरम् । फणाधरेन्द्र आदिशेषम् । परिहृत्य विहाय । असतटे भुज शिखरप्रदेशे अधिरोहणे । दृढ निश्चल आदर प्रीति यस्यास्ताम् । क्षितिं भूमिम् । महीतु उपर्यारोपणाय हस्तावलम्बन कर्तुम् । प्रभुतौ प्रभुताविव । व्यराजता अशोभेताम् । परिकरः उत्प्रेक्षा च ॥

समानतादुर्विधतां जहार य-
　　द्विभूतिमान्यस्य विजृम्भणं हि तत् ॥ ११ ॥

प्रमृष्टेति ॥ दर्पणः मुकुरः । प्रमृष्टः निरस्तः कन्दर्पमदः मन्मथस्य गर्वः येन तस्य । तस्य अच्युतराजस्य । प्रतिबिम्बानां प्रतिच्छायानां सदृशानां च सम्पदं समृद्धिम् । प्रकाश्य प्रदर्श्य । समानतायां सादृश्यविषये दुर्विधतां दारिद्र्यम् । जहार अपनीतवान् । इति यत् । तत् । विभूत्या ऐश्वर्येण मृजागसना च मान्यस्य माननीयस्य मृजासंस्कारेण वैमल्यं प्रापणीयस्य च । विजृम्भण विलासः । तदेव हि विभूतेः फलं यद्दारिद्र्यहरणमिति भावः । **अत्रापि श्लेषः अर्थान्तरन्यासश्च** ॥

अतत्समानब्जभवः स्मरादिमा-
　　न्व्यधत्त रूपव्ययलोभवानिव ।
तदेकरूपव्ययदुर्विधः स किं
　　तनोति तन्न्यूनतनुश्रियोऽपरान् ॥ १२ ॥

अतदिति ॥ (यः) अब्जभवः ब्रह्मा । रूपव्यये लोभवान् लुब्ध इव रूपव्ययभीरुरिवेत्यर्थः । स्मरादिमान् मन्मथप्रभृतीन् । अतत्समान् । अच्युतराजस्य विसदृशानेव । व्यधत्त निर्मितवान् । सः तादृशो ब्रह्मा । तदेकरूपव्ययदुर्विधः तस्याच्युतराजस्यैकस्यैव निर्माणे समुपयुक्तेन रूपव्ययेन दरिद्रः सन् । अपरान् अन्यान् । तन्न्यूनतनुश्रियः अच्युतराजापेक्षया न्यूनशरीरलक्ष्मीकान् । तनोति सृजति किम् । रूपेणतत्सदृशः कोऽपि न भूतो न भवति चेति भावः ॥

करम्बितं यौवनकान्तिसंपदा
　　कुमारमालोक्य कुतूहलान्नृपः ।

अथानियायास्य विवाहकर्मणे

महीभुजा मन्त्रिमुखेन कन्यका ॥ ८३ ॥

करम्बितमिति ॥ अथ । नृप नृसिंहराज । यौवनश्रीसम्पदा तारुण्यानतशोभातिशयेन । करम्बित पूर्णम् । कुमार पुत्रम् । कुतूहलात् अभिलाषेण । आलोक्य । अस्य अच्युतराजकुमारस्य । विवाहकर्मणे परिणयविधये । मन्त्रिमुखेन मन्त्रिद्वारा । महीभुजा राज्ञाम् । कन्यका पुत्री । आनिनाय आनीतवान् ॥

करेण सूनोः क्षितिपालकन्यका-

करानय ग्राहयति स्म भूपति ।

प्रकाशिताम्र्ण्यरुचेः पयोजिनी

प्रसूनपालीर्दिवसो यथा रवेः ॥ ८४ ॥

करणेति ॥ अथ भूपति नृसिंहराज । प्रकाशिनी प्रकाशवती तारुण्यरुचि यौवनकान्ति यस्य तस्य । सून पुत्रस्य । करेण हस्तेन । क्षितिपालकन्यकाकरान् राजकुमारीहस्तान् । दिवस अह । प्रकाशित आरुण्य रक्तिमा यया सा प्रकाशितारुण्या तारुणी रुचि प्रभा यस्य तस्य । रवे सूर्यस्य । करेण किरणेन । पयोजिनी प्रसूनपाली यथा पद्मनी पद्मपङ्क्ती । ग्राहयति स्म ग्राहयामास ॥

कुलोद्वहाम्बर्यकुमुद्वतीशयो

र्वधूषु देवी वरदाम्बिकाभिधा ।

अमुष्य सतोपमपुष्यदान्तरं

विशिष्य तारास्विव रोहिणी विधोः ॥ ८५ ॥

समानतादुर्विधता जहार य

द्विभूतिमान्यस्य विजृम्भण हि तत् ॥ ११ ॥

प्रमृष्टेति ॥ दर्पण मुकुर । प्रमृष्ट निरस्त कन्दर्पमद मन्मथस्य गर्व यन तस्य । तस्य अच्युतराजस्य । प्रतिबिम्बाना प्रतिच्छायाना सदृशाना च सम्पद समृद्धिम् । प्रकाश्य प्रदर्श्य । समानताया सादृश्य विषये दुर्विधता दारिद्र्यम् । जहार अपनीतवान् । इति यत् । तत् । विभूत्या ऐश्वर्यण मृजाभस्मना च मान्यस्य माननीयस्य मृजासत्कारेण वैमल्य प्रापणीयस्य च । विजृम्भण विलास । तदेव हि विभूते फल यद्दारिद्र्यहरणमिति भाव । **प्रतीप श्लेष अर्थान्तरन्यासश्च** ॥

अतत्समानब्जभव स्मरादिमा-

न्व्यधत्त रूपव्ययलोभवानिव ।

तदेकरूपव्ययदुर्विध स किं

तनोति तन्न्यूनतनुश्रियोऽपरान् ॥ १२ ॥

अतदिति ॥ (य) अब्जभव ब्रह्मा । रूपव्यय लोभवान् उब्ध इव रूपव्ययभीररिवेत्यर्थ । स्मरादिमान् मन्मथप्रभृतीन् । अतत्समान् । अच्युतराजस्य असदृशानव । व्यधत्त निर्मितवान् । स तादृशा ब्रह्मा । तदेकरूपव्ययदुर्विध तस्याच्युतराजस्यैकस्यैव निर्माण समुपयुक्तन रूपव्ययन दरिद्र रान् । अपरान् अन्यान् । तन्न्यूनतनुश्रिय अच्युत राजापेक्षया न्यूनशरीरलक्ष्मीकान् । तनोति सृजति किम् । रूपेणैतत्स दृश कोऽपि न भूतो न भवति चति भाव ॥

करम्बित यौवनकान्तिसपदा

कुमारमालोक्य सुतद्दलान्नृप ।

निमुक्तमर्यादतया विजृम्भित
नवाभिरूप्य न कदापि वर्तनम् ॥ ९ ॥

करेति ॥ करारविन्दे हस्तपद्मे एव । कठिने अनवरतव्यायामवशात् कर्करो । मानस मनस्तु । न कठिनम् । भ्रुवौ च । च एवार्थे । कौटिल्य-भुवौ भुग्नताभूमी । वाङ्मय वाक् तु । *कौटिल्यभू कौटिल्यस्य अनार्जवस्य* भू स्थानम् । न । नव नूतन आभिरूप्य रामणायकम् । विमुक्तमर्यादतया स्वक्तादधिकतया अतिशयेनेत्यर्थः । विजम्भित उत्थमितम् । वर्तन *आचारस्तु । कदापि । विमुक्तमर्यादतया स्वकम्भिभिकतया । न विजृम्भि*तम् । **परिसंख्या** ॥

निर्गलायामनिरोधवर्त्मना
विना निदान श्रवणे विरोधिनी ।
इतीव रोषातिशयस्पृशोर्दृशो-
रशोभि कोणेन विशोणिमाणिमा ॥ १० ॥

निरर्गलेति ॥ निदान विना निष्कारणम् । निरर्गल निष्प्रतिबन्ध समधिक य आयाम दैर्घ्य तस्य निरोध प्रतिबन्ध तस्य वर्त्मना *मार्गेण स एव वर्त्म तेनेति वा तनिरोधद्वारत्यर्थ । श्रवणे कर्णौ ।* विरोधिनी शत्रुभूते । इति । रोषातिशयस्पृशा कोपाधिक्यभाजोरिव । दृशो नयनयो । विशोणिम्न आरुण्यस्य अणिमा स्वल्पता । कोणेन प्रान्तेन । अशोभि अशोभ्यत । शोभयते कर्मणि लुङ् । 'कोणेऽस्य' इति पाठान्तरम् ॥

प्रमृष्टकन्दर्पमदस्य दर्पण
प्रकाश्य तस्य प्रतिबिम्बसम्पदम् ।

समानतादुर्विधता जहार य

द्विभूतिमान्यस्य विजृम्भण हि तत् ॥ ११ ॥

प्रमृष्टेति ॥ दर्पण मुकुर । प्रमृष्ट निरस्त कन्दर्पमद मन्मथस्य गव यन तस्य । तस्य अच्युतराजस्य । प्रतिबिम्बाना प्रतिच्छायाना सदृशाना च सम्पद समृद्धिम् । प्रकारय प्रदश्य । समानताया सादृश्य विषय दुर्विधता दारिद्र्यम् । जहार अपनीतवान् । इति यत् । तत् । विभूत्या एश्वर्येण मृजाभस्मना च मान्यस्य माननीयस्य मृजासंस्कारेण वमल्य प्रापणीयस्य च । विजृम्भण विलास । तदव हि विभूत फल यद्दारिद्र्यहरणमात भाव । **प्रतीप श्लेष अर्थान्तरन्यासश्च** ॥

अतस्समानब्जभव स्मरादिमा-

न्व्यधत्त रूपव्ययलोभवानिव ।

तदेकरूपव्ययदुर्विध स किं

तनोति तन्न्यूनतनुश्रियोऽपरान् ॥ १२ ॥

अतदिति ॥ (य) अब्जभव ब्रह्मा । रूपव्यय लोभवान् लुब्ध इव रूपव्ययभीरुरावलय । स्मरादिमान् म मथप्रभृतीन् । अत समान् । अच्युतराजस्य विसदृशानिव । व्यधत्त निर्मितवान् । स तादृश ब्रह्मा । तदेकरूपव्ययदुर्विध तस्याच्युतराजस्यैकस्यैव निर्माण समुपयुक्तन रूपव्ययन दारद्र सन् । अपरान् अन्यान् । तन्न्यूनतनुश्रिय अच्युत राजापेक्षया न्यूनशरीरलक्ष्मीकान् । तनोति सृजति किम् । रूपणतत्स दृश कोऽपि न भूतो न भवति चेति भाव ॥

करम्बित यौवनकान्तिसंपदा

कुमारमालोक्य कुतूहलान्नृप ।

अथानियायास्य विवाहकर्मणे
महीभुजा मन्त्रिमुखेन कन्यका ॥ १३ ॥

करम्वितमिति ॥ अथ । नृप नृसिंहराज । यौवनकान्तिसम्पदा तारुण्यजानतशोभातिशयेन । करम्बित पूर्णम् । कुमार पुत्रम् । कुतूहलात् अभिलाषेण । आलोक्य । अस्य अच्युतराजकुमारस्य । विवाहकर्मणे परिणयविधये । मन्त्रिमुखेन मन्त्रिद्वारा । महीभुजा राज्ञाम् । कन्यका पुत्री । आनिनाय आनीतवान् ॥

करेण सूनो क्षितिपालकन्यका-
करानय ग्राहयति स्म भूपति ।
प्रकाशितारुण्यरुचे पयोजिनी-
प्रसूनपालीर्दिवसो यथा रवे ॥ १४ ॥

करणेति ॥ अथ भूपति नृसिंहराज । प्रकाशिनी प्रकाशवती तारुण्यरुचि यौवनकान्ति यस्य तस्य । सूनो पुत्रस्य । करेण हस्तेन । क्षितिपालकन्यकाकरान् राजकुमारीहस्तान् । दिवस अह । प्रकाशित आरुण्य रक्तिमा यया सा प्रकाशितारुण्या, तादृशी रुचि प्रभा यस्य तस्य । रवे सूर्यस्य । करेण किरणेन । पयोजिनीप्रसूनपाली यथा पद्मिनी पद्मदलानीव । ग्राहयति स्म ग्राहयामास ॥

कुलोद्वहास्वर्कक्षुमुद्वतीशयो-
र्वधूषु देवी वरदाम्बिकाभिधा ।
अमुष्य सतोषमपुष्यदान्तर
विशिष्य तारास्विव रोहिणी विधो ॥ १५ ॥

कुलेति ॥ अर्ककुमुद्वताशयो सूर्याचन्द्रमसो । कुले द्भवासु कुलोत्ता रिकासु सूर्यचन्द्रवंशनालाक्षितर्थ । वधूषु पत्नीषु । वरदाम्बिकाभिधा वरदाम्बिकानाम्नी । देवी । अमुष्य अच्युतराजकुमारस्य । विधो चन्द्रस्य । *ताराषु नक्षत्रेषु । रोहिणी इव । विशिष्य विशेषत । आन्तर मानसि* कम् । सतोषम् । अपुष्यत् पुपोष ॥

तनूभुवस्त्रीनपि तादृशश्रिय
समीक्ष्य साम्राज्यपदार्हलक्षणान् ।
अमन्यतैवान्तरदन्वदम्बरा
परम्पराभोज्यतया पति क्षिते ॥ १६ ॥

तनूभुव इति ॥ क्षिते पति नृसिंहराज । तादृशा श्री यषा तान् । साम्राज्यपदस्य चक्रवर्तित्वस्थानस्य अर्हाणि उचितानि लक्षणानि येषा तान् । त्रीन् अपि । तनूभुव पुत्रान् । समीक्ष्य विलोक्य । अन्त मनसि । उदन्वान् समुद्र अम्बर यस्या सा ताम् समुद्रपर्यन्ता भूमिम् । परम्पराभोज्यतया स्वपुत्रपौत्रपरपरया स्वकुलोपभोगार्हतया । अमन्यत मेने एव । यद्वा भोज्यता रक्षणीयता । अखण्डापि भूमि स्ववंश्यैरनायासेनैव रक्ष्यत इत्यमनुतेति तात्पर्यम् ॥

समेत्य साम्राज्यरमा मनोरमा
विनीतिमान्वीरनृसिंहभूपति ।
बहिर्व्यधाद्भिन्धनमन्दिरादरी-
न्धरासुरान्कि च दरिद्रताभिधात् ॥ १७ ॥

समेत्येति ॥ विनीतिमान् विनयसपन्न । वीरनृसिंहभूपति । मनो

रमा श्लाध्याम् । साम्राज्यरमा साम्राज्यलक्ष्मीम् । समेत्य प्राप्य । अरीन् शत्रून् । बन्धनमन्दिरात् कारागृहात् । बहि व्यधात् चकार मुमोचेत्यर्थ । रिं च । धरामुरान् ब्राह्मणान् । दरिद्रताभिधान् दारिद्र्यनाम्न । बन्धनमन्दिरात् । बहि व्यधात् ।

अनन्तर कीर्तिधुरधरोऽदधा-
स कृष्णराय सकला वसुन्धरा ।
अमुष्य शीर्णैरभिषेकवारिभि
शशाम विद्वेषणशौर्यपावक ॥ १९ ॥

अनन्तरमिति ॥ अनन्तरम् । कीर्तिधुरधर यशस्वी । स प्रसिद्ध । कृष्णराय । सकला वसुन्धरा समस्ता भुवम् । अदधात् अधारयत् । शीर्णै पतित कार्णै । अमुष्य कृष्णरायस्य । अभिषेकवारिभि अभिषेकजले । विद्वेषणाना शत्रूणा शौर्यपावक शौर्याग्नि । शशाम शान्त ॥

स कोण्डवीटिप्रमुखानि सगरे
महान्ति दुर्गाणि मतगजेशितु ।
पुरा गृहीत्वा पुट्टपेट्टनूपुरे
न्यधादथ स्तम्भमसौ महाबल ॥ ८१ ॥

स इति ॥ महत् बल सैन्य शक्तिर्वा यस्य स । स असौ कृष्णराय । सगरे युद्धे । मत गजेशितु गजपतिराजस्य । कोण्डवीटिप्रमुखानि । महान्ति । दुर्गाणि । पुरा प्रथमत । गृहीत्वा । अथ पश्चात् । पुट्टपन्नूपुरे तन्नाम्नि नगरे । स्तम्भ जयस्तम्भम् । न्यधात् निचखान ॥

पयोधिकाञ्चीपरिणेतृतास्पदे
पदेऽभिषेक्तु तमथाच्युतप्रभुम् ।
कुलाद्रिकूर्मोरगकुञ्जराग्रणी
श्रमापहृत्यै समनाहि मन्त्रिभि ॥ २० ॥

पयोधीति ॥ अथ । पयोधि समुद्र काञ्ची मेखला यस्यास्तस्या पयोधिकाञ्च्या भूमे परिणेतृतासदे नायकतागोचरे । पद स्थाने भूप तित्वस्थान इत्यर्थ । अच्युतप्रभु अच्युतरायम् । अभिषक्तुम् । कुलाद्रीणा भूभार वहता कुलपर्वताना कूर्मस्य आदिकूर्मस्य उरगस्य शेषस्य कुञ्ज राग्रण्या गजश्रेष्ठाना दिग्गजाना च य भूभारवहनेन जात श्रम तस्य अपहृत्यै अपनोदनाय । मन्त्रिभि सचिवै । समनाहि समुद्युयुजे ॥

प्रचोदितास्तै परिचारकास्तत-
स्तपात्ययेन स्तनयित्नवो यथा ।
अशेषतीर्थार्णववाहिनीजला
न्यनैपुराज्ञासमकालमग्रत ॥ २१ ॥

प्रचोदिता इति ॥ तत अनन्तरम् । तै मन्त्रिभि । प्रचोदिता प्रेरिता । परिचारका भृत्या । तपात्ययेन वर्षाकालेन । प्रचोदिता । स्तन यित्नवो यथा मेघा इव । अशेषाणा समस्ताना तीर्थाना प्रभासादितीर्थानां अर्णवाना समुद्राणा वाहिनीनां कावेर्यादिनदीना जलानि । आज्ञासमकाल आज्ञाक्षण एव । अग्रत पुरस्तात् । अनैषु नीतव त ॥

युवानमाजानुभुजायतिं ततो
निशाम्य सर्वैर्निरचायि मन्त्रिभि ।

भुजङ्गराजन्यधृतां भुवं कृती
भुजाङ्गदीकर्तुममौ भवेदिति ॥ २२ ॥

युवानमिति ॥ सतः । आजानु जानुपर्यन्तं विद्यमाना भुजयोः आयतिः दैर्घ्यं यस्य तं तथोक्तम् । युवानं तरुणं अच्युतराजम् । निशाम्य विलोक्य । कृती धन्यः । असौ अच्युतराजः । भुजङ्गराजन्यधृतां सर्पराजेन धृताम् । भुवम् । भुजाङ्गदीकर्तुं हस्तयोः केयूरीकर्तुम् । भवेत् प्रभवेत् शक्नुयात् । इति । सचिवैः मन्त्रिभिः । निरचायि निश्चितम् ॥

प्रणामशीलः फणिशैलशासितु
कदाचिदग्रे करसङ्गवारिणा ।
पयोधिकाञ्चीपरिणेतृतास्पदे
पदेऽभिषिक्तः स परम्परागते ॥ २३ ॥

प्रणामेति ॥ प्रणामशीलः प्रणमनपरः । सः अच्युतराजः । कदाचित् । फणिशैलशासितुः भगवतः शेषाचलनायकस्य । अग्रे पुरतः । करे विद्यमानात् शङ्खात् गलितेन वारिणा जलेन । परम्परागते कुलक्रमागते । पयोधिकाञ्चीपरिणेतृतास्पदे पदे भूपतित्वस्थाने । अभिषिक्तः ॥

प्रणीय विश्वानगरीं पतिं क्षिते-
रहीन्द्रशैलाधिभुवास्य कल्पिताम् ।
उदारवृत्तेरुदयुङ्क्षतात्मवं
विधित्सवस्ते सचिवा विशेषतः ॥ २४ ॥

प्रणीयेति ॥ अहीन्द्रशैलाधिभुवा शेषगिरिनायकेन । कल्पितां निर्मापिताम् । विश्वानगरीम् । क्षितेः पतिं अच्युतराजम् । प्रणीय

नीत्वा । ते । सचिवा. मन्त्रिण । उदारवृत्ते गम्भीरस्य । अस्य । उत्सवम् । विशेषत विशेषेण । विधित्सव. विधातुमिच्छवः सन्तः । उदयुञ्जत उद्युक्ता अभूवन् ॥

निशान्तसंदानितवैजयन्तिका-
निरन्तरच्छायनिराकृतातपम् ।
परिष्कृतानेकविधप्रतोलिकं
पुरं विभोरैक्ष्यत पुङ्खितोत्सवम् ॥ २५ ॥

निशान्तेति ॥ विभो पुर विद्यानगरी । निशान्तेषु गृहेषु सदानिताना बद्धाना वैजयन्तिकाना ध्वजाना निरन्तरया निबिडया छायया निराकृत निरस्तः आतप. यस्मिंस्तत् तथोक्तम् । निरन्तरा छाया यस्मिंस्तत् अत एव निराकृतातपमिति वा । परिष्कृताः अलंकृता. अनेकविधाः प्रतोलिका रथ्या यस्य तत् । पुङ्खित. वर्द्धित उत्सव. यस्मिंस्तत् तादृशम् । ऐक्ष्यत अदृश्यत ॥

विचित्रकौशेयवितानमण्डली-
विलम्बिमुक्तामणिदामचामरम् ।
परस्परप्रस्तुततर्कशिल्पवि-
त्प्रवर्तितात्यद्भुतचित्रपुत्रिकम् ॥ २६ ॥

विचित्रेति ॥ इत. पर सप्तश्लोकी एकान्वया । एतादृश महीपतेः मन्दिर अलक्षीति सम्बन्धः । विचित्राणां आश्चर्यकराणां नानावर्णानां वा कौशेयवितानानां दुकूलोल्लोचानां मण्डल्यां विलम्बीनि लम्बमानानि मुक्तामणिदामानि मौक्तिकमालाः चामराणि च यस्मिंस्तत् । परस्परेण

अन्योन्येन प्रस्तुत प्रक्रान्त तत्र शिल्पकौशलविषये विवाद स्पर्धा वा यैस्ते तादृशी शिल्पविद्भि शिल्पिभि प्रवर्तिता निर्मिता चित्रा विचित्रा पुत्रिका प्रतिमा चित्रे आलेख्य पुत्रिका वा यस्मिंस्तत् तथोक्तम् ॥

विशुद्धमुक्ताफलधूलिपालिका-
तरङ्गितप्राङ्गणरङ्गवल्लिकम् ।
इतस्तत क्लृप्तहिमाम्बुसेचन
प्रशान्तबाह्याङ्कणचन्द्रधूलिकम् ॥ ७७ ॥

विशुद्धेति ॥ विशुद्धा विशदा या मुक्ताफलधूलिपालिका मौक्तिकचूर्णपङ्क्तय ताभि तरङ्गिता सर्वत प्रवर्तिता प्राङ्गणेषु आजिरेषु रङ्गवल्ल्य भक्तिरचना यस्मिंस्तत् । इत तत सर्वत । क्लृप्तेन आचरितेन हिमाम्बुसेचनेन प्रशान्ता अनुत्पतन्त्य बाह्याङ्गणेषु बहिश्चत्वरेषु विकीर्णा चन्द्रधूलय कर्पूरपरागा यस्मिंस्तत् ॥

समञ्चितारट्टवधूनखाञ्चल-
प्रपञ्चितारावविपञ्चिकाञ्चितम् ।
सकङ्कणप्रेङ्खणकोङ्कणाङ्गना-
मृदङ्गसताडनभङ्गिसंगतम् ॥ ७८ ॥

समञ्चितेति ॥ समञ्चितानां श्रेष्ठानां आरट्टवधूना आरट्टदेशस्त्रीणां नखाग्रै नखाग्रे प्रपञ्चितारावा विस्तारितध्वनय या विपञ्चिका वीणा ताभि अञ्चित मनोहरम् । सकङ्कणप्रेङ्खणानां कटककम्पनाविशेषम हिताना कोङ्कणाङ्गनानां कोङ्कणस्त्रीणां मृदङ्गसताडनस्य मृदङ्गवादनस्य भङ्ग्या शोभया संगत सहितम् ॥

कलिङ्गसारङ्गदृगालिघूर्णितो-
त्तरङ्गसौरभ्यकुरङ्गनाभिकम् ।
पटीरकर्पूरविमेलनाभटी-
निरूढलाटीकरहाटकोरकटम् ॥ २९ ॥

कलिङ्गेति ॥ कलिङ्गसारङ्गदृशां कलिङ्गदेशमृगाक्षीणां आलिभिः समूहैः घूर्णिता मर्दिता उत्तरङ्गसौरभ्या अतिसुगन्धय कुरङ्गनाभय कस्तूरिका यस्मिंस्तत् । पटीरकर्पूरविमेलनाभट्या चन्दनकर्पूरसंयोजनरीत्या निरूढाना कुशलाना लाटीनां लाटदेशस्त्रीणां करहाटकै पद्मकन्दै (इद सुगन्धकन्दानामुपलक्षणम्) उत्कटम् अधिकं व्याप्तमित्यर्थ ॥

विराटसौराष्ट्रवधूटिकालिका-
सटावचूडीकृतचारुवीटिकम् ।
त्रिगर्तपाठीनविवर्तलोचना-
प्रवर्तितारात्रिकपात्रवर्तिकम् ॥ ३० ॥

विराटेति ॥ विराटसौराष्ट्रवधूभिः विराटदेशोत्पन्नाभिः सौराष्ट्रदेशोत्पन्नाभिश्च स्त्रीभिः कालिकाना जगामासीना सटाभिः जटाभिः चूडाकाभिः अवचूडीकृता अलङ्कृता ताभिर्बद्धा इत्यर्थः चारवः वीटिका सज्जोपकरणकानि ताम्बूलानि यस्मिंस्तत् तथोक्तम् । पाठीनविवर्तवत् मीनोद्वर्तनवत् तरलानि लोचनानि नयनानि यासां ताः पाठीनविवर्तलोचनाः स्त्रियः यद्वा पाठीनविवर्ताः मत्स्यपरिणामाः मीनसदृशानीत्यर्थः तादृशानि लोचनानि यासामिति विग्रहः, त्रिगर्तपाठीनविवर्तलोचनाभिः त्रिगर्तदेशस्त्रीभिः प्रवर्तिता कृता सत्कृता वा आरात्रिकपात्रवर्तिका नीराजनार्थं पात्रे निक्षिप्ता वर्तयः यस्मिंस्तत् ॥

अवन्तिकुन्त्यान्ध्रपुरन्ध्रिकाकरा-
नुबन्धिसौगन्धिकदाममदन्तुरम् ।
विदर्भसुभ्रूकरशिल्पवैदुषी-
विकल्पजल्पाकसिताभ्रगर्भकम् ॥ ३१ ॥

अवन्तीति ॥ अवन्तिकुन्त्यान्ध्रपुरन्ध्रिकाणां अवन्त्यादिदेशयुवतीनां करानुबन्धिभिः हस्तसम्बन्धवद्भिः ताभिः स्वहस्तेन ग्रथ्यमानैरित्यर्थः, सौगन्धिकदामभिः कह्लारमालाभिः दन्तुरं व्याप्तम् । 'पुरन्ध्रिकाकरानुगन्धि' इति पाठान्तरम् । विदर्भसुभ्रुवां विदर्भदेशस्त्रीणां नरशिल्पवैदुष्या माल्यादिग्रथनविषये हस्तकौशलस्य विकल्पानां भेदानां जल्पाकाः निवेदयितारः सिताभ्रगर्भकाः धवलेन अभ्रकाख्येन लोहविशेषेण क्रियमाणानि 'ताण्डा' इति द्राविडभाषया व्यवह्रियमाणानि शिरोमाल्यानि यस्मिंस्तत् । 'जल्पाकमदभ्रगर्भकम्' इति पाठान्तरम् । तदा जल्पाकमित्येतदपि महीपतिमन्दिरस्य विशेषणम् । अदभ्राः अधिकाः गर्भकाः शिरोमाल्यानि यस्मिन्निति व्याख्येयम् । 'केशमध्ये तु गर्भकः ।' इति अमरः ॥

अपारनेपालनृपालबालिका-
कलापसम्पादितधूपनैपुणम् ।
अलक्षि माङ्गल्यमयं किलाखिलं
महीपतेर्मन्दिरमिन्दिरास्पदम् ॥ ३२ ॥

अपारेति ॥ अपारेण अधिकेन नेपालनृपालबालिकाकलापेन नेपालराजकुमारीसमूहेन सम्पादितं निर्वर्तितं धूपनैपुणं अगुरुधूपादुत्पादनसामर्थ्यं यस्मिंस्तत् । अपारेति सम्पादनक्रियाविशेषणं वा । माङ्गल्यमयं

मङ्गलप्रचुरम् । अखिलं निःशेषम् । महीपतेः मन्दिरं राजसदनम् । इन्दिरायाः लक्ष्म्याः आस्पदं निवासः । अलक्षि दृष्टम् । किलेति प्रसिद्धौ ॥

पराकृतैरम्मदपाटवानक-
प्रणादपारीणदरीप्रतिश्रुता ।
हरिष्यति क्ष्माभरमेष इत्यमी
कुलाचलाः क्ष्वेलनमाचरन्निव ॥ ३३ ॥

पराकृतेति ॥ इरमदस्य मेघज्योतिषः वज्राग्नेः इदं ऐरम्मदं यत् पाटवं शब्दविषये सामर्थ्यं निर्घोष इति यावत् तत् पराकृतं निरस्तं यैस्तेषां आनकानां पटहानां यः प्रणादः निस्वनः तस्य पारीणा. पारगता. तत्परिपूर्णा इत्यर्थः. या. दर्यः गुहाः तासां प्रतिश्रुता प्रतिध्वनिना । कुलाचलाः महेन्द्रमलयादयः । एष. अच्युतराजः । क्ष्माभरं भूभारम् । हरिष्यति अपनेष्यति । इति । क्ष्वेलनं सन्तोषेण सिंहनादम् । आचरन् अकुर्वन्निव । उत्प्रेक्षा ॥

समञ्चितं कञ्चुकिनां जयारवैः
सहाप्तराजन्यजनेन केनचित् ।
अलंकृतं साङ्ग इवाङ्गजः शनै-
रसावयासीदभिषेकमण्टपम् ॥ ३४ ॥

समञ्चितमिति ॥ असौ अच्युतरायः । केनचित् केनापि । आप्तः इष्टः यः राजन्यजनः सत्कुलजातक्षत्रियलोकः तेन सह । साङ्गः मूर्तिमान् । अङ्गजः मन्मथ इव । कञ्चुकिनां सौविदल्लानां । जयारवैः जयघोषैः । समञ्चितं शोभितम् । अलंकृतं परिष्कृतम् । अभिषेकमण्टपम् । शनैः मन्दमन्दम् । अयासीत् ययौ । 'समञ्चितं' इत्यपि पाठः ॥

अनादि नान्दीभिरनर्दि मर्दलै
रराणि वीणाभिरभाणि वेणुभि ।
अरेभि भेरीभिरगर्जि जर्झरै-
रगारि शृङ्गै समकालि काहलै ॥ ३५ ॥

अनादीति ॥ (तदा) नान्दीभि वाद्यविशेषै । अनादि शब्दितम् । अत्र सवत्र भावे लुङ् । मर्दलै । अनर्दि । नर्द शब्दे । वीणाभि । अराणि । वेणुभि वंशै । अभाणि भणित शब्दितमित्यर्थ । रणभणौ शब्दार्थौ । भेरीभि दुन्दुभिभि । अरेभि अशब्दि । रेभृ शब्दे । जर्झरै तन्नामकैर्वाद्यविशेषै । अगर्जि गर्जितम् । गर्ज शब्दे । शृङ्गै वाद्यविशेषै । अगारि शब्दितम् । गॄ शब्दे । काहलै । समकालि शब्दितम् । कल शब्द सख्यानयो ॥

कृताभिषेक कृपया पुरा हरे
स एष साम्राज्यपदेऽभ्यषिच्यत ।
अथाम्बुदेशव्यपदेशतो मही
तदाजनि स्विन्नतनुस्तदादरात् ॥ ३६ ॥

कृतेति ॥ हरे विष्णो । कृपया अनुग्रहेण । पुरा प्रथमत । कृताभिषेक अभिषिक्त । स एष अच्युतराय । साम्राज्यपदे चक्रवर्तिपदस्थाने । अभ्यषिच्यत अभिषिक्त । तदा पट्टाभिषेककाले । मही भूमि । तस्मिन् अच्युतराये आदरात् प्रीते । अथवा विकीर्णा ये अम्बुलेशा जलकणा तेषां व्यपदेशेन व्याजेन । स्विन्ना सात्त्विकभावस्वेदवती तनु मूर्ति यस्यास्तथोक्ता । अजनि जाता । सापह्नवोत्प्रेक्षा ॥

समाप्य सर्वा समनन्तरक्रियां
नृपासनस्थो नृपतिर्निरैक्ष्यत ।
सुमेरुसङ्गीव सुरेन्द्रपादपः
श्रियः सखेव श्रितभानुमण्डलः ॥ ४१ ॥

समाप्येति ॥ सर्वां समनन्तरक्रिया समस्तमपि अनन्तरकरणीयम् । समाप्य निर्वर्त्य । नृपासनस्थ. सिंहासने स्थित । नृपतिः अच्युतराज । सुमेरुसङ्गी मेरुपर्वते विद्यमान । सुरेन्द्रपादपः कल्पवृक्ष इव । श्रित अधिष्ठित भानुमण्डल सूर्यबिम्ब येन स तादृश । श्रियः सखा लक्ष्मीपति नारायण इव । निरैक्ष्यत दृष्टः ॥

प्रचालितोऽग्रे परिचारिकाजनै-
र्नृपस्य नीराजनदीपिकोत्करः ।
दिगन्तरभ्रान्तिमिषान्नटिष्यतो
दधौ प्रतापस्य स पूर्वरङ्गतां ॥ ४२ ॥

प्रचालित इति ॥ (य) नीराजनदीपिकाना आरात्रिकदीपिकाना उत्कर समूह । नृपस्य । अग्रे पुरस्तात् । परिचारिकाजनैः । प्रचालित भ्रमित । सः नीराजनदीपिकोत्कर । दिगन्तरभ्रान्तिमिषात् दिगन्तरेषु भ्रमणव्याजेन । नटिष्यत नर्तिष्यत । प्रतापस्य । पूर्वरङ्गता प्राथमिकता आरम्भकृत्यतामित्यर्थ । दधौ दधार । 'दिगन्तरे भ्रान्तिमिषात्' इति पाठे तु भ्रान्तिमिषात् दिगन्तरे नटिष्यत इत्यपि व्याख्यातु शक्यम् ॥

अरालकेशीभिरनाटि मेदिनी-
स्वयंवरप्रेयसि शोभिते श्रिया ।

वलाहके दर्शितवार्षिकोदये
न किं शिखिन्यो नटनं वितृण्वते ॥ ४३ ॥

अरालेति ॥ मेदिन्या भूमेः स्वयंवरप्रेयसि स्वयंवृतपतौ अच्युतराये । श्रिया राजलक्ष्म्या । शोभिते सति । अरालाः कुटिलाः भ्रमिमा इत्यर्थः केशाः यासां ताभिः स्त्रीभिः । अनाटि नटितम् । भावे लुङ् । वलाहके मेघे । दर्शितः वार्षिकोदयः वर्षाकालिकसम्पत्तिः येन तस्मिन् तथोक्ते सति । शिखिन्यः मयूर्यः । नटनं नर्तनम् । न वितृण्वते किं न कुर्वन्ति किम् । दृष्टान्तालङ्कारः ॥

विनीतसामन्तविधूतचामर-
द्वयान्वितोऽलक्ष्यत धूर्वहः क्षितेः ।
तुषारशैलो दृषदाहतिद्विधा-
पतत्सपक्षधुनीपयसा इव ॥ ४४ ॥

विनीतेति ॥ विनीतैः विनयसम्पन्नैः सामन्तैः विधूतं वीजितं यत् चामरद्वयं तेन अन्वितः युतः उभयतश्चामराभ्यां वीज्यमान इत्यर्थः । क्षितेः भूमेः । धूर्वहः भारोद्वहः अच्युतरायः । दृषत्सु शिलासु आहत्या सघट्टनेन द्विधापतन्तीपतत् द्विधा विभज्य प्रवहत् नाकधुनीपयः गङ्गाजलं यस्य सः तथोक्तः । तुषारशैलः हिमवत्पर्वत इव । अलक्ष्यत दृष्टः । पतीपतदिति पततेर्यङ्लुगन्ताच्छता ॥

मनुक्रमो रक्षति तत्कुलक्षमा-
पतीनितीवानुजिघृक्षया गतौ ।

अपाङ्गितप्रेङ्खदभीशुवीचिका-
कृतावलम्बैरिव गन्धवारिभिः ।
कराब्जसौवर्णघटापवर्जितै-
स्तमभ्यषिञ्चत्तरलेक्षणाजनः ॥ ३७ ॥

अपाङ्गितेति ॥ तरलेक्षणाजनः स्त्रीजनः । अपाङ्गितैः नेत्रान्तवलनैः प्रेङ्खता प्रसरता अभीशुना कान्तीनामेव रज्जुना वीचिकाभिः तरङ्गपरम्पराभिरित्यर्थः कृतः अवलम्बः धारणं येषां तादृशैरिव स्थितैः । कराब्जेषु हस्तारविन्देषु विद्यमाना ये सौवर्णघटाः कनककलशाः तैः अपवर्जितैः विसृष्टैः । गन्धवारिभिः सपरिमलैः जलैः । तं अच्युतरायम् । अभ्यषिञ्चत् अभिषिषेच ॥

कृताभिषेकस्तुलुवक्षितिक्षितां
कुलाग्रणीः कुङ्कुमवारिधारया ।
करीव सिक्तो गिरिधातुनिर्झरैः
शशीव सायन्तनसन्ध्ययारुचत् ॥ ३८ ॥

कृतेति ॥ तुलुवक्षितिक्षितां तुलुवमहीपतीनाम् । कुलाग्रणीः कुलश्रेष्ठः अच्युतरायः । कुङ्कुमवारिधारया कुङ्कुमसहितसलिलधारया । कृताभिषेकः अभिषिक्तः सन् । गिरिधातुनिर्झरैः गैरिकधातुविमिश्रैः प्रस्रवणजलैः । सिक्तः । करी गज इव । सायन्तनसन्ध्यया सायंकालिकसन्ध्यारागेण । सिक्तः स्नपितः । शशी चन्द्र इव च । अरुचत् अशोभत । रुच दीप्तौ । 'द्युद्भ्यो लुङि' इति पाक्षिके परस्मैपदे 'पुषादिद्युताद्—' इति अङ् ॥

अलोकि लोकैर्हरिचन्दनोदक-
निजृम्भित मण्टपवेदिकाङ्कणे ।
निरीक्ष्य कान्त नृपमाशयादमा-
न्मुचोऽनुरागो बहिरुद्यतो यथा ॥ ३९ ॥

अलोकीति ॥ लोकै जनै । मण्टपवेदिकाङ्कणे अभिषेकमण्टपे नियमानाया वितर्दिकाया प्रदेशे । निजृम्भित समुल्लसितम् । हरिचन्दनोदक रक्तचन्दनतोयम् । कान्त रमणीय भर्तारम् । नृप अच्युतराजम् । निरीक्ष्य विलोक्य । (स्थिताया) भुव भूमे नायिकाया । अमान् अनन्तर्भवन् अमित इत्यर्थ । (अत एव) आशयात् हृदयात् । बहि । उद्यत निर्गत । अनुराग यथा अनुराग इव । अलोकि दृष्टम् । अनुरागो रक्तवर्ण इति सम्प्रदाय ॥

अधारयत्पाण्डरमम्बर क्षिते-
रधीश्वर स्नानविधेरनन्तरम् ।
समाप्तवर्षस्नपनो यथा गिरि
शरन्मुखे छन्ननितम्बमम्बुदम ॥ ४० ॥

अधारयदिति ॥ क्षिते अधीश्वर अच्युतराज । स्नानविधे अनन्तरम् । पाण्डर धवलम् । अम्बर वस्त्रम् । शरन्मुखे शरदारम्भे । समाप्त अवसित वर्षस्नपन वर्षाकालिकवृष्टिसेचन यस्य स तादृश । गिरि पर्वत । छन्ननितम्ब आच्छादितकटकप्रदेशम् । अम्बरेऽपि विशेषणमिद सुयोजम् । अम्बुद यथा मेघमिव । अधारयत् धृतवान् ॥

समाप्य सर्वां समनन्तरक्रिया
नृपासनस्थो नृपतिर्निरैक्ष्यत ।
सुमेरुसङ्गीव सुरेन्द्रपादप
श्रिय सखेव श्रितभानुमण्डल ॥ ४१ ॥

समाप्येति ॥ सर्वां समनन्तरकिया समस्तमपि अनन्तरकरणीयम् । समाप्य ।नवत्य । नृपासनस्थ सिंहासन ।स्थत । नृपति अच्युतराज । सुमेरुसङ्गी मेरुपत्रते विद्यमान । सुरेन्द्रपादप कल्पवृक्ष इव । श्रित आधिष्ठित भानुमण्डल सूर्यविम्ब यन स तादृश । श्रिय सखा लक्ष्मापात नारायण इव । निरैक्ष्यत दृष्ट ॥

प्रचालितोऽग्रे परिचारिकाजनै
नृपस्य नीराजनदीपिकोत्कर ।
दिगन्तरभ्रान्तिमिषान्नटिष्यतो
दधौ प्रतापस्य स पूर्वरङ्गता ॥ ४२ ॥

प्रचालित इति ॥ (य) नीराजनदीपिकाना आरात्रिकदीपकाना उत्कर समूह । नृपस्य । अग्र पुरस्तात् । परिचारिकाजनै । प्रचालित भ्रामत । स नीराजनदीपक रर । ।दग्न्तरभ्रान्तिमिषात् दिग्न्तरपु भ्रमणव्याजेन नटिष्यत नतिष्यत । प्रतापस्य । पूवरङ्गता प्राथमिकता आरम्भकृत्यतामित्यथ । दधौ दधार । दिगन्तरे भ्रान्तिमिषात् इति पाठे तु भ्रान्तिमिषात् दिगन्तर नाटष्यत इत्यपि व्याख्यातु शक्यम् ॥

अरालकेशीभिरनाटि मेदिनी
स्वयवरप्रेयसि शोभिते श्रिया ।

वलाहके दर्शितवार्षिकोदये
न किं शिखिन्यो नटनं वितृण्वते ॥ ४३ ॥

अरालेति ॥ मेदिन्या भूमे स्वयंवरप्रेयसि स्वयंवृतपतौ अच्युत राये । श्रिया राजलक्ष्म्या । शोभिते सति । अराल कुटिल भ्रङ्गिमा निखर्व केश यासा ताभि स्त्रीभि । अनाटि नटितम् । भावे लुङ् । वलाहके मेघ । दर्शित वार्षिकोदय वर्षाकालिकसंपत्ति येन तस्मिन् तथोक्ते सति । शिखिन्य मयूर्य । नटन नर्तनम् । न वितृण्वते किं न कुर्वन्ति किम् । दृष्टान्तालङ्कारः ॥

विनीतसामन्तविधूतचामर-
द्वयान्वितोऽलक्ष्यत धूर्वह क्षिते ।
तुषारशैलो दृषदाहतिद्विधा-
पनीपतन्नाकधुनीपया इव ॥ ४४ ॥

विनीतेति ॥ विनीते विनयसंपन्ने सामन्ते विधूत वीजित यत् चामरद्वय तन अन्वित युत उभयतश्चामराभ्या वीज्यमान इत्यर्थ । क्षिते भूमे । धूर्वह भारोद्वह अच्युतराय । दृषत्सु शिलासु आहत्या सघट्टनेन द्विधापनीपतत् द्विधा विभज्य प्रवहत् नाकधुनीपय गङ्गाजल यस्य स तथोक्त । तुषारशैल हिमवत्पर्वत इव । अलक्ष्यत दृष्ट । पनीपतदिति पततेर्यङ्लुगन्ताच्छता ॥

मनुक्रमो रक्षति तत्कुलक्षमा-
पतीनिलीयानुजिघृक्षया गतौ ।

प्रीति तस्य प्रस्टीक्रियाया प्रकाशनस्य अर्हया समुचितया । एतद्विशेषणद्व यमुपमानेऽपि योज्यम् । साम्राज्यपदश्रिया चक्रवर्तित्वस्थानलक्ष्म्या । वदान्य दाता स. पादप वृक्षः कल्पवृक्ष इत्यर्थ. । वसन्तलक्ष्म्या वसन्तश्रियेव । अरुचत् शोभितवान् ।

चकार यन्मेरुमनादिमः पुमान्
सुवर्णरूप सुरसंसदां वशे ।
सुवर्णमेरुं स्वयमस्य सेवको
महीसुरेभ्योऽदित मानवेश्वर ॥ ५० ॥

अकारयदिति ॥ यत् यस्मात् । न विद्यते आदिम. यस्मात्स अनादिम. सर्वादिभूत इत्यर्थ, तादृश पुमान् परमपुरुष श्रीमन्नारायण. । सुवर्णरूप स्वर्णमयम् । मेरु महामेरुपर्वतम् । सुरससदा देववृन्दानाम् । वशे अधीनतायाम् । चकार अकरोत् । (तत्) अस्य आदिपुरुषस्य नाराय णस्य । सेवक भक्त । मानवेश्वर अच्युतनृपतिः । स्वय आत्मना । महीसुरेभ्य ब्राह्मणेभ्य । सुवर्णमेरु मेरुपर्वताकार सुवर्णम् । अदित दत्तवान् ॥

फलं यदस्याः पतिसेवया प्रभोः
फणीशपर्यङ्कपदार्चया च यत् ।
चिरात्तदासीचिनवेङ्कटाद्रिरि-
त्यभिख्ययाक्ष्णोरपि दीर्घमायुषि ॥ ५१ ॥

फलमिति ॥ अस्याः वरदाम्बिकायाः । पतिसेवया भर्तृशुश्रूषया । यत् फलम् । प्रभोः अच्युतराजस्य । फणीशः आदिशेषः पर्यङ्कः खट्वा यस्य तस्य फणीशपर्यङ्कस्य भगवतो नारायणस्य पदार्चया चरणार-

बिन्दार्चनेन । यच्च फलम् । तत् फलम् । चिरात् चिरकालानन्तरम्, चिरात् चिरकालपर्यन्तमिति पूर्ववाक्यान्वयि वा । अक्ष्णोः नयनयोः । आयुष्यपि । दीर्घे सत् । 'चिनवेङ्कटाद्रि:' इति अभिख्यया नाम्ना । आसीत् अभूत् । भगवत्कृपया दीर्घायुर्दीर्घाक्षश्च चिनवेङ्कटाद्रिनामा तनयः समुत्पन्न इति भावः ॥

अनेन राज्ञा चिनवेङ्कटाद्रिर-
प्ययोजि लक्ष्मीं युवराजपूर्विकाम् ।
क्षमापतौ राज्यरमा सयौवन-
क्रमा च कौमारमसावसूचयत् ॥ ५२ ॥

अनेनेति ॥ अनेन राज्ञा अच्युतराजेन । चिनवेङ्कटाद्रिरपि । युवराजपूर्विकां युवराजशब्दपूर्विकाम् । लक्ष्मीं यौवराज्यलक्ष्मीम् । अयोजि योजितः । असौ इयम् । राज्यरमा राज्यलक्ष्मीः । क्षमापतौ राज्ञि अच्युतराये । यौवनक्रमेण यौवनाभिवृद्ध्या सहिता सयौवनक्रमा परिपूर्णेत्यर्थः तादृशी च सती । कौमारं कुमारीभावं युवराजसम्बन्धं च । असूचयत् न्यवेदयत् प्राप्तवतीति यावत् । यद्वा सयौवनक्रमा युवराजसम्बन्धेन यौवनोदयसहिता सती । क्षमापतौ चिनवेङ्कटाद्रौ कौमारं कुमारीभावं कुमारशब्दवाच्यताम् । असूचयत् अकरोत् । युवराजः कुमार इति व्यपदिश्यते ॥

यथा जयन्तेन पुरन्दरो यथा
नरोपवाह्यो नलकूबरेण च ।
अराजदव्याजसुहृत्सुतां तथा
चिरायुषा श्रीचिनवेङ्कटाद्रिणा ॥ ५३ ॥

तमीशसूर्याविव धारिते किम-
प्यराजतामातपवारणे विभो ॥ ४५ ॥

मन्विति ॥ विभो प्रभो अच्युतरायस्य । धारिते धृते । आतपवारणे छत्रे । मनुना व्यवस्थापित क्रम राज्यपरिपालनरीति । तत्कुलक्ष्मापतीन् तद्वशराजान् । रक्षति । तद्वशराजा मनुक्रमेण परिपालयन्तीत्यर्थ । इतीव । अलङ्कारो वाक्यालङ्कारे । अनुजिघृक्षया अनुग्रहीतुमिच्छया । आगतौ । तमीशसूर्यौ चन्द्रसूर्याविव । किमपि अनिर्वचनीयतया । अराजतां शोभितवन्तौ । 'मनुकुलक्ष्मापतीनतीव' इति पाठान्तरम् ॥

कलिङ्गभूमे कमिता कलाचिका
मणीनिबद्धा मगधोऽस्य पादुकाम् ।
शकाधिपश्चामरमञ्जरीमधा-
त्स्वय कृपाणीमपि सिंहलेश्वर ॥ ४६ ॥

कलिङ्गेति ॥ कलिङ्गभूमे कमिता कलिङ्गाधिप । अस्य अच्युतरायस्य । कलाचिका पतद्ग्रह भृङ्गारम् । मगध । मणीनिबद्धा रत्नखचिताम् । पादुका उपानहम् । शकाधिप । चामरमञ्जरी स्तबकसदृशवालव्यजनम् । सिंहलेश्वर सिंहलाधिपोऽपि । स्वयम् । कृपाणी खड्गम् । अधात् उवाह ॥

क्ष्मासुज काञ्चनपुष्पसम्पत
प्रकीर्य भक्त्या प्रतिपादितोपदा ।
व्यनंसिषुर्वंशमणि विधोस्त्वरा-
विघट्टितान्योन्यकिरीटकोटय ॥ ४७ ॥

क्षमेति ॥ क्षमाभुज राजान । भक्त्या । काञ्चनपुष्प हिरण्मयानि कुसुमानि । अग्रत अग्रे । प्रर्घार्य अवकीर्य । प्रतिपादिता उपदा उपायनानि यैस्तथोक्ता । त्वरया सम्भ्रमेण *विघट्टिता घर्षिता अन्योन्य* किरीटकोटि परस्परमकुटाग्रभाग येषा ते तथोक्ताश्च सन्त. । विधो चन्द्रस्य । यशसि चराजन तत्कुलश्रेष्ठ अच्युतरायमित्यर्थ । व्यनसिपु नमन्ति स्म ।

> महत्तरे मानवलोकशासितु
> र्मनोऽनुकूला महिषीपदे तदा ।
> कृताभिषेका सलगक्षितीशितु-
> र्वरात्मजासीद्वरदाम्बिकावधू. ॥ ४८ ॥

महत्तर इति । तदा तास्मन् समय । सलगक्षितीशितु सलगराजस्य । वरात्मजा श्रेष्ठपुत्री *वरलब्धा पुत्री वा* । *मानवलोकशासितु* अच्युतराजस्य । मनस हृदयस्य अनुकूला रुचिता । वरदाम्बिकावधू वरदाम्बिकानाम्नी राज्ञी । महत्तरे प्रशस्ततरे । महिषीपदे देवीस्थाने । कृताभिषेका अभिषिक्ता । आसीत् ॥

> प्रसूनसौभाग्यपुषा यशोमिषा-
> त्प्रजानुरागप्रकटीक्रियार्हया ।
> स एष साम्राज्यपदश्रियारच-
> द्वसन्तलक्ष्म्येव वदान्यपादपः ॥ ४९ ॥

प्रसूनेति ॥ स एषः अच्युतराज । यशोमिषात् कीर्तिव्याजन । प्रसूनानां कुसुमाना सौभाग्य शोभा पुष्णाति इति तया । प्रजानां य: अनुराग

यथेति ॥ मता साधूनाम् । अव्याजसुहृत् निर्व्याजबन्धु अच्युतराय । जयन्तेन तन्नाम्ना सुतेन । पुरन्दर इन्द्र । यथा (विराजते) नरऔपवाह्य वाहन यस्य स नरवाहन कुबेरश्च । नल्कूबरेण तन्नाम्ना पुत्रेण । यथा (विराजत) तथा । चिरायुषा दीर्घायुषा । श्रीचनवेङ्कटाद्रिणा स्वसुतेन । अराजत् अशोभत । एतावत्पर्यन्त **वंशस्थ** प्रायण वृत्तम् । क्वाचित्क्वाचित् **इन्द्रवशापि** ॥

अभिमतपिकवाणीपञ्चमैरञ्चितश्री

रपि च वरदमाम्बावीरुदालम्बभूत ।

पतिरञ्चदवन्या प्राप्तसाम्राज्यलक्ष्म्या

शतमखपुरशाखी चैत्रलक्ष्म्या यथैव ॥ ५४ ॥

अभिमतेति ॥ अभिमता इष्टा या पिकवाण्य स्त्रिय तासा पञ्चमै मधुरै स्वरै । अत्र पञ्चमशब्द मधुरस्वरपर । अन्यत्र अभिमताना पिकाना कोकिलाना वाणीपञ्चमै पञ्चमस्वरै । 'अभिमतसुतवाणीपञ्चमै इति पाठान्तरम् । अञ्चिता शोभिता श्री समृद्धि यस्य स तथोक्त । अपि च किंच । वरदमाम्बा वरदाम्बानाम्नी देवी सैव वीरुत् लता तस्या आलम्बभूत । अवन्या पति अच्युतराय । प्राप्ता अधिगता या साम्राज्यलक्ष्मी चक्रवर्तित्वश्री तया । शतमखपुरशाखी इन्द्रनगरवृक्ष कल्पवृक्ष इत्यर्थ । चैत्रलक्ष्म्या यथा चैत्रकालिकश्रियेव वसन्तलक्ष्म्येवेत्यर्थ । अरुचत् विललासैव । 'प्राप्तसाम्राज्यलक्ष्मा' इति पाठान्तरम् । **मालिनी** वृत्तम् ॥

इति तृतीय सर्ग ॥

चतुर्थः सर्गः ।

वासरोऽथ वसुधावलद्विपो
वल्लभेति महिषीपदे महीम् ।
आदरात्किमभिषेक्तुमाहर-
न्नम्बुवाहमणिकुम्भमाययौ ॥ १ ॥

वासर इति ॥ अथ । वासरः दिवसः । वसुधावलद्विपः भूमीन्द्रस्य अच्युतरायस्य । वल्लभा प्रेयसी । इति हेतोः । महीं भूमिम् । महिषीपदे देवीस्थाने । आदरात् प्रीत्या । अभिषेक्तुम् । अम्बुवाहः जलधरः एव मणिकुम्भः रत्नखचितघटः तम् । आहरन् आनयन् सन् । आययौ आगतः किम् । उत्प्रेक्षा रूपकं च ॥

शौर्यमारुतसखस्य सन्निधौ
कल्पितानघकरग्रहे नृपे ।
मेदिनी पुलकजालमेदुरा
नीपकुड्मलनिभादभासत ॥ २ ॥

शौर्येति ॥ नृपे अच्युतराये । शौर्यमेव मारुतसखः अग्निः तस्य सन्निधौ । कल्पितः कृतः अनघः मनोहरः निष्पापश्च करग्रहः विवाहः राजदेयद्रव्यस्वीकारश्च येन तथाभूते सति । मेदिनी भूमिः । नीपकुड्मलनिभात् नीपमुकुलव्याजेन । पुलकजालेन रोमाञ्चसमूहेन मेदुरा व्याप्ता सती । अभासत शुशुभे । सापह्नवोत्प्रेक्षा समासोक्तिश्च ॥

अस्य कर्तुमभिषेकमङ्गला-
रात्रिकश्रियमिवावनीभुजः ।
प्रावृषाप्यजनि मेघभाजन-
प्रस्तुताचिररुचिप्रदीपया ॥ ३ ॥

अस्येति ॥ प्रावृषा वर्षाकालेनापि । स्त्रीलिङ्गात् काचित्स्त्रीत्यपि गम्यते । अस्य अवनीभुजः राज्ञः । अभिषेकमङ्गले क्रियमाणस्य आरात्रिकस्य नीराजनायाः श्रियं लक्ष्मीम् । कर्तुं आचरितुमिव । मेघ एव भाजनं दीपपात्रं तत्र प्रस्तुतः प्रक्रान्तः उद्दीपित इति यावत् आचररुचिः विद्युदेव प्रदीपः यया तया तथोक्तया । अजनि जातम् । भावे लुङ् ॥

पालिता प्रतिनवेन भूभुजा
वारिराशिरशना वसुन्धरा ।
केतकीकुसुमपांसुकैतवा-
त्प्राक्तनान्परिजहास पार्थिवान् ॥ ४ ॥

पालितेति ॥ प्रतिनवेन नूतनेन । भूभुजा राज्ञा । पालिता रक्षिता सती । वारिराशिरशना समुद्रमेखला । वसुंधरा भूमिः । केतकीकुसुमपांसुकैतवात् कैतकधूलिव्याजेन । प्राक्तनान् प्राचीनान् । पार्थिवान् राज्ञः । परिजहास परिहसति स्म ॥

वर्धुकं समवलोक्य वारिदं
चातकद्विजकुलस्य हृष्यतः ।
बाष्पवर्षकृतसेचना नवा-
द्दर्पतोऽजनि पुरा वसुन्धरा ॥ ५ ॥

वर्षुकमिति ॥ वसुन्धरा भूमि । नवात् नूतनात् । वर्षत श्रेष्ठे । पुरा प्रागेव । वर्षुकं वर्षिष्यन्तम् । वारिदं मेघम् । विलोक्य । हृष्यत सन्तुष्यत । चातकद्विजकुलस्य चातकपक्षिसमूहस्य । बाष्पवर्षेण आनन्द बाष्पवृष्ट्या कृत सेचन सेक यस्यास्तथोक्ता । अजनि जाता । अत्र वारिद द्विजादिपदे मघसम्ज्ञा युक्तरायब्राह्मणादिप्रतीते **समासोक्तिः अति शयोक्तिश्च** ॥

अभ्रपङ्क्तिरकिरत्पय कणा
निर्भरोष्मणि निदाघत क्षितौ ।
गर्भिताशनितया तदुद्भव
घ्रातुमादरवतीव सौरभम् ॥ ६ ॥

अभ्रेति ॥ अभ्रपङ्क्ति मेघावलि, स्त्रालिङ्गात् कापि स्त्रीति च । गर्भित अन्त स्थित अशनि वज्र यस्यास्तस्या भावन, गर्भिणीत्वेन चेति गम्यते । तदुद्भव भूम्युद्भवम् । सौरभ सुगन्धम् । घ्रातु अनुभवितुम् । आदरवती साभिलाषेव । निदाघत ग्रीष्मेण । निर्भरोष्मणि अधिकोष्ण्या याम् । क्षितौ भूमौ । पय कणान् जलशीकरान् । अकिरत् विकिरति स्म । गर्भिण्या मृद्भक्षणमृत्तिकागन्धाघ्राणादिकं प्रसिद्धमिति तथोत्प्रेक्षा ॥

अम्बु पीतमवपत्य दुस्तरा-
दम्बरादतितरामपां निधौ ।
प्रावृषा पवनचक्रयोजिता
वारिदा ववमुरश्चितभ्रमा ॥ ७ ॥

अम्बियति ॥ दुस्तरात् तरितुमशक्यात् दुरारोहात् अत्युन्नतादिति यावत् । अम्बरात् आकाशात् । अवपत्य पतित्वा अवरुह्य च । अपां निधौ

समुद्रे । अतितरां अत्यन्तम् । पीतम् । अम्बु जलम् । (कर्म) वारिदा-मेघाः । प्रावृषा वर्षाकालेन । पवनचक्रेण मण्डलवायुना योजिताः मेलिताः, पवनचक्रे सवाते चक्राकारयन्त्रे योजिताः स्थापिताश्च । अभ्रितः कृतः भ्रमः भ्रमणं इतस्ततः संचारश्च येषां तथोक्ताः सन्तः । ववमुः उद्गिरन्ति स्म । लोकेऽपि कूपादौ पतितः पीतजलः पुरुषः कुलालचक्रयन्त्रमारोप्य परिभ्रमणेन पीतं जलमुद्वाम्यत इति स्थितिः । **समासोक्तिः** ॥

अम्भसार्द्रितमवादयन्नभा-
स्तापयन्हुतवहे तटिन्मये ।
मद्दलं मदजुषां शिखण्डिनां
ताण्डवानुगुणमभ्रमण्डलम् ॥ ८ ॥

अम्भसेति ॥ नभाः वर्षाकालः । 'नभा घ्राणे बिसतन्तौ पतद्ग्रहे । प्रावृषि श्रावणे' इति हैमः । अम्भसा जलेन । आर्द्रितं आर्द्रीकृतम् । अभ्रमण्डलं मेघसमूहमेव । मद्दलम् । तटिन्मये विद्युद्रूपे । हुतवहे अग्नौ । तापयन् विशोष्य तप्तं कुर्वन् सन् । मदजुषां मत्तानाम् । शिखण्डिनां मयूराणाम् । ताण्डवस्य नटनस्य अनुगुणं अनुकूलं यथा तथा । अवादयत् वादितवान् । **रूपकम्** ॥

चातकाः सततधारमक्षमाः
पातुमम्बु परिपीडिता मुखे ।
प्राक्सर्मीरशिथिलैः पयःकणैः
कुर्वते स्म निजकुक्षिपूरणम् ॥ ९ ॥

चातका इति ॥ चातकाः चातकपक्षिणः । मुखे । परिपीडिताः

धारापातेन आहता । मनतधार अविच्छिन्नप्रपातम् । अम्बु जलम् । पानुम् । अक्षमा अशक्ता सन्त । प्राक् प्रथमम । समीरेण वायुना शिथिलै लघूकृत्य विशीर्णे । पयःकणै जलबिन्दुभि । निजकुक्षिपूरण स्वोदरपूर्तिम । कुर्वते स्म अकुर्वन ॥

वारिदे शरमुचि प्रधाविनी
वाहिनी निविशते स्म वारिधौ ।
राजहंससदसापि दुद्रुवे
लक्ष्यमस्ति किमु जीवनत्यजाम् ॥ १० ॥

वारिद इति ॥ वारिदे मेघे । कस्मिश्चन धानुष्क इत्यपि गम्यते । शर जल बाण च मुञ्चतीति तस्मिन् शरमुचि सति । 'शरस्तु तेजने बाणे दध्यग्रे ना शर जल ।' इति विश्व । वाहिनी नदी सेना च । प्रधाविनी वेगवती पलायमाना च सती । वारिधौ समुद्रे । निविशते स्म प्रविश्य निलीना च । राजहंसाना हंसविशेषाणा राजश्रेष्ठाना च सदसा सघेनापि । दुद्रुवे पलायितम् । जीवन जल त्यजन्ति विसृजन्तीति जीवनत्यज तेषा जीवनत्यजा जलवर्षिणाम् , जीवन प्राणान् त्यजन्ति मति समये उपेक्षन्ते इति जीवनत्यज वारा तेषा च । किमु । लक्ष्य व्याज , शरव्य च । अस्ति । नास्त्येवेत्यर्थ । श्लेषसकीर्णोऽर्थान्तरन्यास' ॥

अग्रत कृतशिखण्डिताण्डवो
भीष्ममेष शुचिमुज्झितं शरैः ।
वञ्चयन्वलितजिष्णुकार्मुको
वासरोऽर्जुनविकासमासदत् ॥ ११ ॥

अग्रत इति ॥ एष वासर वर्षादिवस । वलित वक्रित प्राप्त

जिष्णो इन्द्रस्य कार्मुक धनु यस्मिन् स तथोक्त । पक्षे बलित जिष्णु जयशालि च कार्मुक येन स । अग्रत प्रथमत । कृत शिखण्डिना मयूराणा ताण्डव नटन येन यस्मिन्वा स । पक्षे अग्रत कृत पुरस्तादवस्थापित य शिखण्डी तन्नामा द्रुपदपुत्र तस्य ताण्डव उत्साह युद्धाभिनयो वा यस्य स तथोक्त । उज्झिते विसृष्टे । शरे जले बाणेश्च । भीष्म भयकर अत्युग्रमित्यर्थ । शुचि ग्रीष्मम् । पक्षे, शुचि परिशुद्धम् । भीष्म भीष्माचार्य शन्तनुपुत्र पितामहम् । वञ्चयन् शमयन् पक्षे प्रतारयन् सन् । अर्जुनाना ककुभाख्यवृक्षाणा विकास पत्रफलादिसमृद्धिम् । पक्षे, अर्जुनस्य मध्यमपाण्डवस्य विकास शोभा तत्साम्यमिति यावत् । आपदत् प्राप्तवान् । आसीदतेर्लुङ् ॥

आन्ध्यमन्तरभितापकन्दली

मश्रु निश्वसितमप्ययोगिनाम् ।

आरचय्य विववार वारिदो

धूमपावकजलानिलात्मताम ॥ १८ ॥

आन्ध्यमिति ॥ वारिद मेघ । अयोगिना विरहिणाम् । आन्ध्य अन्धत्व कर्तव्यमूढता च । अन्त मनसि । अभितापस्य सतापस्य कन्दली नवाङ्कुर समूह वा । अश्रु बाष्पम् । निश्वसित निश्वाससमाप । आरचय्य उत्पाद्य । धूमपावकजलानिलात्मता धूमाग्निजलवायुरूपत्वम् । विववार विवृतवान् । 'धूमज्योति सलिलमरुता सनिपात क्व मेघ' इति मेघसंदेशे ॥

क्रीडया दिवि तटित्कृपाणिका

बर्हिषु व्यतिहतासु वारिदे ।

विश्लथा इव विभावसो कणा
शक्रगोपनिकराश्चकाशिरे ॥ १३ ॥

क्रीडयेति ॥ वारिदे । दिवि आकाशे । क्रीडया लीलया । तडित विद्युत एव कृपाणिकाख्य लतासदृशा खड्गा तासु । व्यतिहतासु परस्पर सघट्टितासु । मेघेषु विद्युद्भि शस्त्राशस्त्रि कुर्वाणेष्वित्यर्थ । *विश्लथा* विकीर्णा । विभावसो/कणा अग्निकणा स्फुलिङ्गा इव । शक्रगोपाना तन्नाम्ना प्रसिद्धाना कीटविशेषाणा निकरा समूहा । चकाशिरे भान्ति स्म ॥

केचनानिलवशात्करोपला
द्योतलात्तरलिता दिशा मुखे ।
नासिकाभरणमौक्तिकश्रियो
नाटिका क्षणमिवाललम्बिरे ॥ १४ ॥

केचनेति ॥ अनिलवशात् वायुवेगवशात् । द्योतलात् आकाशप्रदेशात् । तरलिता चचलिता विकीर्णा इत्यर्थ । केचन । करोपला वर्षोपला करका । दिशां ककुभा कासाञ्चन स्त्रीणा च । मुखे अग्रभागे वदने च । नासिकाभरणमौक्तिकाना नासाभूषणमुक्ताफलानां श्रिय लक्ष्म्या । नाटिकां नटन तादृशमुक्तासादृश्यमित्यर्थ । क्षणमिव क्षण कालम् । आललम्बिरे आश्रयन्ति स्म । 'मौक्तिकस्रज ' इति पाठान्तरम् ।
निदर्शना उत्प्रेक्षा च ॥

विष्वगम्बुदविधुन्तुदो रुषा
चर्वति स्म रविशर्वरीविटौ ।

पङ्किले किल सशृङ्खलोऽभव-
स्प्राप्तराज्य इव मारवे पथि ॥ १९ ॥

शश्वदिति ॥ पङ्किले पङ्कभूयिष्ठ । मारवे मरुप्रदेशसम्बन्धिनि । पथि मार्गे । सशृङ्खल शृङ्खलासहित इव स्थित शृङ्खलाबद्ध इव पङ्कात् पादावुद्धृत्य चलितुमशक्त इत्यर्थ । अध्वगव्रज पथिकसमूह । वर्षत वृष्टे । मरुत वायुना च । (क्रमेण) शश्वत् मुहुर्मुहु आर्द्रित आर्द्रीकृत विशोषित च अम्बर वस्त्र यस्य स तादृश सन् । प्राप्त राज्य य स तादृश इव । अभवत् । निर्जलप्रदेशमार्गे पङ्कक्षमस्य जलस्य दर्शन राज्यप्राप्तिरिव पन्थाना सुखाकरमभूदिति भाव ॥

तिर्यगानतगल विषाणयो-
र्दीर्णवृष्टि धृतरोमविक्रियम् ।
पार्श्वदेशपरिलीनतर्णक
गोकुल निखिलमैक्ष्यताकुलम् ॥ २० ॥

तिर्यगिति ॥ निखिल गोकुल समस्तोऽपि गवा समूह । तिर्यक तिरश्चान यथा तथा आनत वक्रित गल कण्ठप्रदेश यस्य तत् । विषाणयो शृङ्गयो । दीर्णा तत्र पतनेन विशकलिता वृष्टि धारावर्ष येन तत् । धृता रोमविक्रिया रोमविकार यन तत् । पार्श्वदेशे पार्श्वभाग परिलीना सलग्ना तर्णका वत्सा यस्य तत् तादृश च सत् । आकुल विह्वल सोपद्रवमित्यर्थ । ऐक्ष्यत दृष्टम् । **स्वभावोक्ति** ॥

क्लेदसिक्तमिव वर्षसेचना-
त्किच कोमलखुर गवा कुलम् ।

संकुचत्तनु समग्रकम्पनं
तर्णकालधिवनं तदन्वगात् ॥ २१ ॥

क्लेदेति ॥ वर्षसेचनात् वृष्टिसेकात्, इद सर्वत्र हेतु । क्लेदेन धेनूना वात्सल्यपूर्वकजिह्वालेहनजनितार्द्रतया लालाजलेन वा सिक्त आर्द्रितमिव । किं च । कोमला मृदव खुरा शफानि यस्य तत् । सङ्कुचन्ती अल्पी भवन्ती तनु शरीर यस्य तत् । समग्र अधिक कम्पन वेपथु यस्य तत् तादृशम् । तत् । गवा कुल गोसमूह । अधिवन वने । तर्णकान् वत्सान् । अन्वगात् अनुचकार । तर्णकधर्मीणा क्लेदसिक्तवादी नामग्रापि विद्यमानत्वाद्गोकुल तर्णकसदृशमभूदिति भाव ॥

भानुमम्बुधरबन्धनालये
तापिन विरचयस्तपात्ययः ।
अस्य भूरिवसुभागसौ पुरे-
त्यब्जिनीं ध्रुवममज्जयज्जले ॥ २२ ॥

भानुमिति ॥ तपात्यय वर्षाकाल । तापयतीति ताप । त तापिन सन्तापकरम् । भानु सूर्यम् । अम्बुधर मेघ एव बन्धनालय काराग्रह तस्मिन् । विरचयन् कुर्वन् सन् । असौ अब्जिना । पुरा पूर्वम् । अस्य सूर्यस्य । वसून् किरणान् वसूनि धनानि च भजतीति वसुभाक् । इति एव मत्वेव । अब्जिनीं पद्मिनीम् । जले । अमज्जयत् मज्जयामास ॥

अम्बुदा न परमश्रितारवा-
स्तद्वानि तटिनीजलान्यपि ।

शक्रगोपकरकोपलच्छला-
स्सृक्वणा स विचकार तत्कणान् ॥ १५ ॥

विष्वगिति ॥ विष्वक् सर्वतोव्यापी अम्बुद मेघ एव विधुंतुद राहु । रुषा कोपेन । रवि सूर्य शर्वरीविट निशानायकश्चन्द्र एतौ । चर्वति स्म चर्वितवान् । स अम्बुदविधुंतुद । शक्रगोपकरकोपलच्छलात् शक्रगोपाना वर्षोपलाना च व्याजेन । तत्कणान् क्रमेण सूर्यचन्द्रलवान् । सृक्वणा ओष्ठप्रान्तेन । विचकार विकिरति स्म । विष्वगिति क्रियाविशेषण वा । सापह्नवोत्प्रेक्षा ॥

अम्बरान्निपतितै करोपलै-
राहतिव्यतिकरस्पृशोऽवने ।
शक्रगोपवपुषा समन्ततो
विश्लथ क्षतजविप्रुषा चय ॥ १६ ॥

अम्बरादिति ॥ अम्बरात् आकाशात् । निपतितै । करोपलै । करकाभि । आहत प्रहारस्य व्यतिकर सबन्ध स्पृशति भजतीति तस्या । अवने भूमे । क्षतजविप्रुषा रक्तबिन्दूनाम् । चय समूह । शक्रगोपवपुषा शक्रगोपशरीरेण तद्व्याजेनेत्यर्थ । विश्लथ विकीर्ण प्रसृत इत्यर्थ ॥

अब्जिनीप्रणयिना हिमद्युते-
रन्वकारि न पर निरूष्मता ।
अल्पहृद्यवपुषा पयोमुचा-
मावलीष्वपि च तत्कलात्मता ॥ १७ ॥

अब्जिनीति ॥ अब्जिनीप्रणयिना सूर्येण । हिमद्युते चन्द्रस्य । अनल्पमता पर औष्ण्याभावमात्रम् । न अन्वकारि न अनुसृतम् । किंतु पयोमुचा मेघानाम् । आवलीषु पङ्क्तिषु । अन्पदस्य निचिहृदय वपु स्वरूप येन तन तथोक्तन । अब्जिनीप्रणयिना । तत्कलामता चन्द्रकला रूपतापि च । अन्वकारि अनुकृता ।

फेनकञ्चुकजुषो विषोत्किर
प्रस्तुतोर्मिपवमानकृत्क्रिया ।
आपगा फणधरा इवाध्वगा-
न्कुर्वते स्म पथि कुण्ठितक्रमान् ॥ १८ ॥

फेनेति ॥ फेना डिण्डीरा कञ्चुका निर्मोका इव फेनकञ्चुका तान् जुषन्ते प्राप्नुवन्तीति तादृशा । पक्षे फेनानिव कञ्चुकान् जुषन्त इति तथा । विष जल उत्किरन्ति प्रवाहयन्तीति तथा । पक्षे विष गरल उत्किरन्ति वमन्तीति तथा । ऊर्मिपवमाना तरङ्गवाता कृत्क्रिया कृत्कारा इव ऊर्मिपवमानकृत्क्रिया प्रस्तुता प्रक्रान्ता ऊर्मिपवमानकृत्क्रिया याभिस्तास्तथोक्ता । पक्ष प्रस्तुता ऊर्मिपवमानवत् कृत्क्रिया यैस्ते । आपगा नद्य । फणधरा सर्पा इव । अध्वगान् पान्थान् । कुण्ठित विघ्नित क्रम गमन गमनक्रमो वा येषा तादृशान् । कुर्वते स्म अकुर्वत । मध्येपथ नदीना प्रवहनात्तदुल्लङ्घनासमर्था पथिका आसन्निति भाव । प्रयाणकाले मध्येमार्गं सर्पदर्शन दुर्निमित्तमिति तदा प्रस्थान न क्रियत इति लोकाचार ॥

शश्वदार्द्रितविशोषिताम्बरो
नर्पतोऽपि मरुतोऽध्वगव्रज ।

पङ्किले किल सशृङ्खलोऽभव-
त्प्राप्तराज्य इव मारवे पथि ॥ १९ ॥

शश्वदिति ॥ पङ्किले पङ्कभूयिष्ठे । मारवे मरुप्रदेशसम्बन्धिनि । पथि मार्गे । सशृङ्खल शृङ्खलासहित इव स्थित शृङ्खलाबद्ध इव पङ्कात् पादावुद्धृत्य चलितुमशक्त इत्यर्थ । अध्वगव्रज पथिकसमूह । वर्षत वृष्ट । मरुत वायुना च । (क्रमेण) शश्वत् मुहुर्मुहु आर्दित आर्द्रीकृत विशोषित च अम्बर वस्त्र यस्य स तादृश सन् । प्राप्त राज्य य स तादृश इव । अभवत् । निर्जलप्रदेशमार्गे पङ्कक्षमस्य जलस्य दर्शन राज्यप्राप्तिरिव पन्थाना सुखाकरमभूदिति भाव ॥

तिर्यगानतगल विषाणयो-
र्दीर्णवृष्टि धृतरोमविक्रियम् ।
पार्श्वदेशपरिलीनतर्णक
गोकुल निखिलमैक्ष्यताकुलम् ॥ २० ॥

तिर्यगिति ॥ निखिल गोकुल समस्तोऽपि गवा समूह । तिर्यक् तिरश्चीन यथा तथा आनत वक्रित गल कण्ठप्रदेश यस्य तत् । विषाणया शृङ्गयो । दीर्णा तत्र पतनेन विशकलिता वृष्टि धारावर्ष येन तत् । धृता रोमविक्रिया रोमविकार यन तत् । पार्श्वदेशे पार्श्वभागे परिलीना सलग्ना तर्णका वत्सा यस्य तत् तादृश च सत् । आकुल विह्वल सोपद्रवमित्यर्थ । एक्ष्यत दृष्टम् । **स्वभावोक्ति** ॥

क्लेदसिक्तमिव वर्षसेचना-
त्किच कोमलखुर गवा कुलम् ।

संकुचत्तनु समग्रकम्पन
तर्णकानधिवनं तदन्वगात् ॥ २१ ॥

क्लेदेति ॥ वर्षसेचनात् वृष्टिसेकात्, इद सर्वत्र हेतु । क्लेदेन धेनूना वात्सल्यपूर्वकजिह्वालेहनजनितार्द्रतया लालाजलेन वा सिक्त आर्द्रितमित्र । किं च । कोमला मृदव खुरा शफानि यस्य तत् । सङ्कुचन्ती अल्पी भवन्ती तनु शरीर यस्य तत् । समग्र अधिक कम्पन वेपथु यस्य तत् तादृशम् । तत् । गवा कुल गोसमूह । अधिवन वने । तर्णकान् वत्सान् । अन्वगात् अनुचचार । तर्णकधर्माणां क्लेदसिक्तत्वादी नामत्रापि विद्यमानत्वाद्गोकुल तर्णकसदृशमभूदिति भाव ॥

भानुमम्बुधरबन्धनालये
तापिन विरचयंस्तपात्यय ।
अस्य भूरिवसुभागसौ पुर-
स्त्वब्जिनीं ध्रुवममज्जयज्जले ॥ २२ ॥

भानुमिति ॥ तपात्यय वर्षाकाल । तापयतीति तापी त तापिन सन्तापकरम् । भानु सूर्यम् । अम्बुधर मेघ एव बन्धनालय कारागृह तस्मिन् । विरचयन् कुर्वन् सन् । असौ अब्जिनी । पुरा पूर्वम् । अस्य सूर्यस्य । वसून् किरणान् वसूनि धनानि च भजतीति वसुभाक् । इति एव मत्वेव । अब्जिनी पद्मिनीम् । जले । अमज्जयत् मज्जयामास ॥

अम्बुदा न परमश्वितारवा-
स्तद्भवानि तटिनीजलान्यपि ।

सेहिरे न तरणेर्विजृम्भण
कार्यकारणभिदा कथ भवेत् ॥ २३ ॥

अम्बुदा इति ॥ आधृत कृत आरव गर्जित यैस्त तादृशा । अम्बुदा परं मघा ग्वलम् । तरण सूर्यस्य । विजृम्भण प्रकाशम् । न सेहिरे न सोढवन्त । इति न । किं तु आधृतारवाणि । तद्ध्वनि मेघभवानि । तन्निनीजलानि नदीजलान्यपि । तरण नौकाया । विजृम्भण गमना गमनरूपम् । न सहिरे जलवशात्तदायन नद्यादिषु नौकाना प्रचारो दुष्कर मभून् इत्यर्थ । तदेव समर्थयते— कार्यति । कार्यकारणयो भिन्ना भेद कथ भवन् न भवदवेत्यर्थ । **तुल्ययोगिता श्लेष अर्थान्तरन्यासश्च** ॥

विद्युतामिव विजृम्भणासह
शार्ङ्गिणोऽपि शयनीयपन्नग ।
आतनोदधिपयोधि गाहन
पामरेषु फणभृत्सु का कथा ॥ २४ ॥

विद्युतामिति ॥ शार्ङ्गिण विष्णो । शयनीयपन्नग तल्पभूत सर्प आदिशेषोऽपीत्यर्थ । विद्युता तादृताम् । विजृम्भणासह विलसन सोढुम समर्थ इव । अधिपयोधि समुद्र । गाहन मज्जनम् । आतनोत् चकार । पामरेषु प्राकृतेषु । फणभृत्सु सर्वेषु विषय । का कथा जलावगाहनविषये किं पुनर्वक्तव्यमित्यर्थ । **उत्प्रेक्षा काव्यार्थापत्तिश्च** ॥

कामिनीनिवहमानविग्रह
कादम्बिनिकपलायितो मह ।

प्राद्रवत्प्रकटमम्बुभृद्धट
किं विभिद्य भुवि कीर्णशम्बरम् ॥ २५ ॥

कामिनीति ॥ कामिनीनिवहस्य युवतीसमूहस्य य मान ईर्ष्याकृत कोप तस्य स एव वा विग्रह यस्य स तथोक्त युवतीना प्रणयकोपस्वरूप इत्यर्थ । ग्रह पिशाच । काल वर्षाकाल एव मान्त्रिक तेन पलायित प्रद्रावित सन् । अम्बुभृद्धट मेघमेव जलपूर्ण घटम् । भुवि भूमौ । कीर्ण प्रसृत शम्बर जल यस्मिन् कर्मणि तद्यथा तथा । विभिद्य विपाट्य । प्रकट सुव्यक्तम् । प्राद्रवत् पलायामास किम् । मान्त्रिकेण *पलाय्यमाना पिशाचा भयापनाय अम्बुघट पातयन्तीति स्थिति* । यद्वा तादृशा पिशाचा दुश्चेष्टया मन्त्रपूत जलघट पातयन्तीति स्थिति । सवथा वर्षाकाल मेघेषु वर्षत्सु मानिनीना मान स्वयमेव गलित इति तात्पर्यम् । रूपक उत्प्रेक्षा च ॥

पङ्किला न पदवी पर नृणा
द्योसदामपि बभूव दुर्दिने ।
अन्तरा जलकणैरणूपमै-
रार्द्रिते रजसि नीपनि सृते ॥ २६ ॥

पङ्किलेति ॥ दुर्दिने मेघच्छन्ने दिने वर्षाकाल इत्यर्थ । नृणा मनुष्याणाम् । पदवी पर मार्ग केवलम् । पङ्किला पङ्कवती । न बभूव नासीत् । किंतु, द्योसदा देवानामपि । पदवी मार्ग आकाशपथ इत्यर्थ । *नीपेभ्य कदम्बवृक्षेभ्य नि सृते निर्गत्य ऊर्ध्वं गते* । रजसि परागे । अणूपमै परमाणुतुल्यै । जलकणै जलबिन्दुभि । अन्तरा मध्ये । आर्द्रिते आर्द्रीकृते कर्दमित इत्यर्थ । पङ्किला । बभूव । **अतिशयोक्ति** ॥

शाम्यदुच्छ्रितपयोधरश्रिया
संकुचत्कुटजदन्तसंपदा ।
प्रावृषा गलितभूरिवर्षया
प्रत्यपद्यत घनस्वरात्ययः ॥ ७७ ॥

शाम्यदिति ॥ शाम्यन्ती शमं प्राप्ता उच्छ्रितानां ऊर्ध्वस्थितानां पयोधराणां मेघानां श्रीः संपत्तिः यस्यास्तया तादृश्या । तथा शाम्यन्ती उच्छ्रितयोः उत्तुङ्गयोः पयोधरयोः स्तनयोः श्रीः शोभा यस्यास्तया च । सङ्कुचन्ती विरलीभवन्ती कुटजदन्तानां गिरिमल्लिकानिकुञ्जानां संपत् समृद्धिः यस्याः तया । तथा सङ्कुचन्ती विरला विगलितेति यावत् कुटजदन्तानां कुटजकुसुमसदृशानां दशनानां संपत् यस्यास्तया । यद्वा सङ्कुचन्ती कुटजानि गिरिमल्लिकाकुसुमान्येव दन्ताः तेषां संपत् यस्याः तयेति व्याख्येयम् । 'दन्तोऽद्रिकटके कुञ्जे दशने' इति मेदिनी । गलितं गतं भूरि अधिकं वर्षं वृष्टिः यस्यास्तया । तथा गलितं भूरिवर्षं स्वर्णवर्षं यस्याः सा तथोक्ता तया । 'भूरि स्वर्णे प्रचुरे च' इति हैमः । प्रावृषा वर्षाकालेन, सुसपत्नपूर्वया रूपवत्या सांप्रतं निस्वया वृद्धया कया चन स्त्रियेत्यपि गम्यते । घनानां मेघानां स्वरस्य गर्जितस्य अत्ययः अभावः । घनः धनरूपाद्यभिमानेन गम्भीरः साहंकारः इत्यर्थः तादृशः यः स्वरः तस्य अत्ययः अभावश्च । प्रत्यपद्यत प्रतिपन्नः । **समासोक्तिः** ॥

श्वेतमानतटिदालि संकुच-
च्छातमन्यवशरासवासनम् ।
निम्नभूमिषु निलीननिर्झरं
निर्मरन्दरसनीपकोरकम् ॥ ७८ ॥

श्वेतमानेति ॥ इत पर पद्यत्रयमेकान्वयम् । एतादृश दिन ऐक्षीत्यन्वय । श्वेतमाना धवलीभवन्ती तडिद्दालि विद्युत्पुञ्ज यस्मिस्तत् । सङ्कुचन्ती विरलीभवन्ती शातमन्यवस्य शतमन्युसबन्धिन ऐन्द्रस्य शरासस्य कार्मुकस्य वासना सस्कार ज्ञान वा यस्मिस्तत् । निम्नभूमिषु नीचप्रदेशेषु । निर्गता प्रवहन्त निर्झरा गिरिनद्य प्रवाहा इति यावत् यस्मिस्तत् । निर्मरन्दरसा मकरन्दशून्या नीपकोरका कदम्बमुकुला यस्मिस्तत् तथोक्तम् ॥

विप्रकर्षघनसंक्रमं सरि-
द्व्यज्यमानसिकताविजृम्भणम् ।
निस्वताश्रयनिपद्वरोच्चयं
नृत्तकेलिविरमच्छिखावलम् ॥ ५९ ॥

विप्रकर्षेति ॥ विप्रकर्षे विरल घनाना मेघाना सक्रम सबन्ध यस्मिस्तत् । सरिद्भि नदीभि व्यज्यमान प्रकाश्यमान सिकताना वालुकानां विजृम्भण विलास यस्मिस्तत् । यद्वा सरित्सु व्यज्यमान स्वयमेवाभिव्यक्तीभवत् सिकताविजृम्भण यस्मिन् तत् । निस्वताश्रय दारिद्र्याश्रय प्रक्षीण इति यावत् तादृश निपद्वरस्य पङ्कस्य उच्चय स्तोम यस्मिस्तत् । नृत्तकेलै नर्तनलीलाया विरमन्त शिखावला मयूरा यस्मिस्तत् ॥

वारिराशिशयनादुदस्थितुं
व्याश्रिताङ्गवलनेन्दिरासखम् ।
ऐक्षि तद्दिनममुक्तसंशयं
हंसपालिभिरपाङ्कितांम्बरम् ॥ ३० ॥

वारीति ॥ वारिरशौ समुद्रे शयनात् । उदाशतु उत्थातुम् । व्यसित कृत अङ्गचलन अङ्गपरिवर्तन यन स व्यसिताङ्ग्यस्त ताश इन्दिरासख नारायण यस्मिंस्तत् । वर्षावगमानान्तर शरदि शाङ्गपाणि रुदधिशयनादुत्तिष्ठतीत्यागम हसपालिभि हसपङ्क्तिभि । अपाङ्गत कृताक्षित अम्बर आकाश यस्मिंस्तत् । असुक्त भगत सशय वर्षाकालस दह यस्य तत् वर्षाकालचिह्नाना तत्रापि किञ्चिदनुवर्तनादात भाव । तत् । दिनम् एक्षि दृष्टम् ॥

षट्पदा पदसमर्पणासहे
प्राक्तने दलचये परिश्लथे ।
कम्पवत्तनु कदम्बसन्तते
कर्णिकोपरि कथंचिदासत ॥ ३१ ॥

षट्पदा इति ॥ षट्पदा भृङ्गा । पदसमर्पणासहे चरणार्पणक्षम सहनक्षम । कदम्बसतत नीपकुसुमसमूहस्य । प्राक्तन प्राचीन । दल चय पत्रसमूह । परिश्लथ च्युत सति । कर्णिकोपरि बीजकोश्या उपरिभाग । कम्पवती वपमाना तनु शरीर यास्मन्कर्मणि तद्यथा तथा । कथंचित् प्रयासेन । आसत आतष्ठन् ।

प्राक्तनेऽपि कुटजे पयोरुहा
मङ्कुरेऽप्यनुपलब्धशीधव ।
मारदैवतमुदे मधुव्रता
निश्चयाभिरशनव्रत दधु ॥ ३२ ॥

प्राक्तन इति ॥ मधुव्रता भृङ्गा । प्राक्तने पुरातने जीर्णे इत्यर्थ । कुटज कुटजकुसुमेऽपि । पयोरुहां पद्मानाम् । अङ्कुरेऽपि, नव समुत्प

मेघु वालेषु पद्मेष्विरयर्थ । अनुपलब्ध अप्राप्त शीधु पुष्पासव यैस्ते तथोक्ता सन्त । मार्दवतमुदे मन्मथदेवतामतोषाय । निश्चयात् दाढ्यन । निरशनव्रत निराहारनियमम । दधु धारयन्ति स्म आच रन्ति स्मेवेत्यर्थ ।

पालिताखिलभुवाम्बुवर्षत
प्रावृषाजनि शनै प्रशान्तया ।
पाण्डराम्बुदपरम्परानिभा-
द्भासते स्म दिवि तद्यशोभर ॥ ३३ ॥

पालितेति ॥ अम्बुवर्षत जलवृष्टे । पालिता पायिता आराला समस्ता भू भूमि यया तया । प्रावृषा वर्षाकालेन । शनै मन्दम् । प्रशान्तया शम गतया । अजनि जातम् । तस्या प्रावृष यशोभर कीर्तिभार । पाण्डराणा धवलाना अम्बुदाना मेघाना परम्परानिभात् पङ्क्तिव्याजन । दिवि आकाशे स्वर्ग च । भासते स्म शुशुभे । **समासोक्ति सापह्नवोत्प्रेक्षा च** ॥

आस्तिकस्तदनु हल्लकश्रिया
नास्तिक कुटजनीपसम्पदाम् ।
प्रादुरास विधुभानुमत्त्विषा
प्रत्यवायविगमो घनात्यय ॥ ३४ ॥

आस्तिक इति ॥ तदनु वर्षाकालानन्तरम् । हल्लकश्रिया रक्तकह्लार लक्ष्मीणाम् । आस्तिक अनुकूल । कुटजाना नीपाना च सम्पदा समृद्धी नाम् । नास्तिक अननुकूल । विधो चन्द्रस्य भानुमत सूर्यस्य च त्विषा

भामाम् । प्रत्यवायस्य निष्प्रकाशत्वरूपस्य पापस्य विगम अभाव निव र्तक इति यावत् । घनात्यय शरत्काल । प्रादुरास आविर्भूत । अस्ति परलोक इति नास्ति परलोक इति मतिरस्येति विग्रहे क्रमेण निष्पन्नौ आस्तिकनास्तिकशब्दौ प्रकृत सगुणत्वनिर्गुणत्वद्वारा अनुकूलाननुकूलपरौ ॥

पाथस समुदयन्प्रशुष्यत
पद्मगर्भपरिलीनषट्पद ।
दृष्टगाध इव दर्शयन् शये
कर्दम कमलिनीगणो बभौ ॥ ३५ ॥

पाथस इति ॥ प्रशुष्यत क्षीणता गच्छत । पाथस जलात् । समुदयन् समुद्गच्छन् । पद्मगर्भे पङ्कजमध्ये परिलीना निर्गता षट्पदा भ्रमरा यस्य स तादृश । कमलिनीगण पद्मिनीसमूह । गाध निम्नता स दृष्ट येन स तथोक्त इव । शये स्वशय्यास्थानभूत सलिलाशये हस्ते च । कर्दम पङ्कम् । दर्शयन् सन् । बभौ भाति स्म । लोके हि नद्यादिषु मज्जन् पुरुष अधस्तलदर्शनप्रत्यायनाय करे कर्दममादाय उदका दुन्मज्जतीति तथात्रोत्प्रेक्षितम् ॥

कुण्ठितेषु कुटजादिषु स्मर
कोरकेष्वयुतभेदनादिव ।
आददे पुनरदोन्यथाकृते
हल्लकाम्बुजमुखाञ्छिलीमुखान् ॥ ३६ ॥

कुण्ठितेष्विति ॥ स्मर मन्मथ । कुटजादिषु कुटजकारकप्रभृतिषु । कोरकेषु कुड्मलेषु । अयुताना विरहिणा दशसहस्राणा च भेदनात्

पाटलादिव । क्रोष्ट्वेषु निर्दयेषु मन्यु । पुन. । अतोऽन्यथाकृते अमीषा अयुतानां दु स्वनिमित्तम् । इत्क रक्तद्वार अम्बुज पद्म मुख प्रधान भूतं येषा तान् तथोक्तान । शिलीमुखान् बाणान् । आददे स्वीकृतवान् ॥

विद्युतामिव वियोगविह्वलाः
क्कापि मौनभरिताः क्रमात्कृशाः ।
पारणेऽपि पयसः पराङ्मुखाः
पाण्डिमानमवहन्पयोमुचः ॥ ३७ ॥

विद्युतामिति ॥ पयोमुच मेघा । विद्युता तडिता नायिकानाम । वियोगेन विरहेण विक्रया विह्वला इव । क्वापि कुत्रचित् । (क्विना) मौनेन तूष्णीभावेन भरिता पूर्णा मौनावलम्बिन इत्यर्थ । क्रमात् । कृशाः काश्यमापन्ना । पयस जलस्य । पारणे पानेऽपि । पराङ्मुखा विमुखा सन्त । पाण्डिमान धावल्यम् । अवहन् अधारयन् । **समासोक्तिः** उत्प्रेक्षा च ॥

पन्नगेन्द्रशयनान्तरे परः
पूरुषः समजनिष्ट बोधवान् ।
इत्यसंशयमपां निधिं ह्रिया
नाश्रयन्नवनवा नदीप्रिया' ॥ ३८ ॥

पन्नगेति ॥ पन्नगेन्द्रशयनान्तरे आदिशेषरूपशय्यामध्ये । परः पूरुषः परमपुरुषो नारायण. । बोधवान् प्रबुद्ध । समजनिष्ट सजात । इति । ह्रिया लज्जया । नवनवा नूतना । नद्य एव प्रिया प्रियस्य । अपा निधिं भर्तार समुद्रम् । न आश्रयन् न आश्रयन्ति स्म । असंशय ध्रुवम् ॥

शान्तिमेयुपि पुर समीरणे
कर्दमेऽपि करकोपलै सह ।
शारदागमसमन्वित कुतोऽ
प्यस्खलद्गतिरभूद्रथो विधे ॥ ३९ ॥

शान्तिमिति ॥ पुर समीरणे पौरस्त्यवात प्रातकूलवात च । कर्दम पङ्केऽपि । करकोपलै करकाभि सह । शान्ति शमम् । एयुपि प्राप्तवति सति । विधे ब्रह्मण । रथ स्यन्दनभूत हंस हंसा इत्यथ रथ अवयवश्च मुखमित्यथ । रथ पुमानवयव स्यन्दन इति मेदिनी । शारद शरत्सबन्धी य आगम आगमन तेन समन्वित शोभित शारदाया सरस्वत्या आगमन समन्वितश्च । कुतोऽपि कस्मादपि कुत्रापि वा अस्खलन्ती अप्रतिहता गति गमन यस्य स तथोक्त । अभूत् । कर्दमाद्यभाव हि रथस्य गतिर्निरङ्कुशाति तथा वर्णितम् । शरदारम्भात् हंसा मानसाद्विनिगता इति तात्पर्यम् ॥

पालनाय परिबद्धकङ्कणे
ष्वम्बुदेषु कृशतामपोहितुम् ।
अक्षमा इव भृश नमन्मुखा
शालय कणिशसभृता बभु ॥ ४० ॥

पालनायेति ॥ कणिशै सस्यमञ्जरीभि सभृता पूर्णा । शालय कलमा । पालनाय स्वपोषणाय । परिबद्ध निबद्ध कङ्कण प्रतिसर जल बिन्दुश्च यैस्तेषु । कमिति मान्तमव्यय जलार्थकम् । अम्बुदेषु मेघेषु । कृशता कार्श्यम् । अपोहितु अपनेतुम् । अक्षमा अशक्ता इव । भृश

अत्यन्तम् । नमत् म्लानन मुख वदन अग्रभागश्च येषां ते तथोक्ता । बभु भान्ति स्म । उत्प्रेक्षा ॥

सचलच्छफरलोचना स्खल-

च्चङ्क्रमा नववधूजना इव ।

अम्बुधिं पतिमशिश्रियञ्छनै-

रापगा शमितनीपदीपिका ॥ ४१ ॥

संचलदिति ॥ सचलन्त तरल शफरा मीना लोचनानीव यासा तास्तथोक्ता । अन्यत्र सचलन्ति शफरवत्स्थितानि लोचनानि यासा ता । स्खलन् चङ्क्रम गमन यासा तास्तथोक्ता । आपगा नद्य । नववधूजना मुग्धा इव । शमितानि निर्वापितानि नीपानि कदम्ब कुसुमानि दीपिका इव याभिस्ता । पक्षे शमिता नीपानीव दीपिका याभिस्ता । पतिं भर्तारम् । अम्बुधिं समुद्रम् । शनै मन्दमन्दम् । अशिश्रियन् आश्रयन्ति स्म ॥

ऐक्षवैर्मणिभिरन्तिकच्युतै

पाशयन्त्रपरिघूर्णितोज्झितै ।

पक्षिण कलमत पलायय

न्त्यस्तवेगतति शालिगोपिका ॥ ४२ ॥

ऐक्षवैरिति ॥ शालिगोपिका कलमरक्षणपरा स्त्रिय । अन्तिके समीपे च्युतै विकीर्णै । पाशयन्त्रपरिघूर्णितोज्झितै पाशयन्त्रमारोप्य भ्रमितैरनन्तर विक्षिप्तैश्च । ऐक्षवै इक्षुसम्भवै । मणिभि रत्नै मौक्तिकैरित्यर्थ । पक्षिण पक्षिण । (कम) कलमत कलमेभ्य । अस्ता धावन

सम्भ्रमेण विगलितबन्धा केशाः तति केशसमूहः यस्मिन्कर्मणि तद्यथा तथा। पलाययन् धावयामासुः। उदात्तम् ॥

कुण्ठितोर्मिभरशृङ्गमापगा
कूलदेशदलनाद्व्यरंसिषुः ।
उन्मदान्युरुगभीरनिस्वनं
तत्पुनर्वृषकुलानि तेनिरे ॥ ४३ ॥

कुण्ठितेति ॥ आपगा नद्यः। कुण्ठितानि भग्नानि ऊर्मिभराः तरङ्गपङ्क्तय एव शृङ्गाणि विषाणानि यस्मिन्कर्मणि तद्यथा तथा। कूलदेशदलनात् तीरप्रदेशपातनात्। व्यरंसिषुः विरताः। विपूर्वाद्रमतेर्लुङ्। तत् पुनः कूलदेशदलनं तु। उन्मदानि मत्तानि। वृषकुलानि वृषभगणाः। उरु समधिकं गभीरं गम्भीरश्च निस्वनः शब्दः यस्मिन् कर्मणि तद्यथा तथा। तेनिरे अकुर्वन् ॥

आत्तहर्षमनुधावितं गवां
मण्डलेन शनकैर्महोधसा ।
तूर्णमुन्नमितकर्णवालकं
तर्णका ववलिरे तदग्रतः ॥ ४४ ॥

आत्तेति ॥ महत् पीनं ऊधः आपीनं यस्य तेन। गवां धेनूनाम्। मण्डलेन समूहेन। शनकैः ऊधोभारान्मन्दमन्दम्। आत्तः स्वीकृतः हर्षः यस्मिन्कर्मणि तत् सहर्षमित्यर्थः। अनुधावितं पश्चाद्गतम्। तर्णकाः वत्साश्च। तदग्रतः तासां धेनूनां पुरोभागे। उन्नमिताः उत्क्षिप्ताः कर्णाः श्रोत्राणि वालाः पुच्छानि च यस्मिन्कर्मणि तथा। तूर्णं सवेगम्। ववलिरे वल्गन्ति स्म। स्वभावोक्तिः ॥

हंसलोकमवकल्प्य दिक्तटे-
प्वात्तचङ्क्रमणमम्बुदात्ययः ।
विश्वदिग्जयविनिर्गमे व्यधा-
द्राजहंसमपि रञ्जयदाशयम् ॥ ४५ ॥

हंसेति ॥ अम्बुदात्यय शरत्काल । दिक्तटेषु दिगन्तेषु । हंसलोक हंसपङ्क्तिम् । आत्त कृत चङ्क्रमण गमन येन त तादृशम् । अवकल्प्य कृत्वा । राजहंस राजश्रेष्ठ अच्युतरायमपि, हंसविशेष च । विश्वदिग्जयविनिर्गमे समस्तदिग्विजयार्थं प्रस्थाने । रञ्जयन् साभिलाष आशय मन यस्य त तादृशम् । व्यधात् अकरोत् ।

एकदा तु सचिवो यथाक्रमं
प्रेपितप्रणतराजराजिकम् ।
प्राप्य वेङ्कटविलासमण्टपे
प्रश्रयेण निजगाद पार्थिवम् ॥ ४६ ॥

एकदेति ॥ एकदा कदाचित्तु । सचिव मन्त्री । यथाक्रम क्रममनतिक्रम्य । प्रेपिता प्रहिता प्रणता विनता राजराजि नृपतिपङ्क्ति येन तम् । पार्थिव अच्युतरायम् । वेङ्कटविलासमण्टपे वेङ्कटविलासनाम्नि आस्थानमण्टपे । प्रश्रयेण विनयेन । निजगाद उवाच ॥

वेत्सि कार्यमखिल विशेपतो
वेदनीयमिह ते न विद्यते ।
श्रोतुमर्हसि यदुच्यते मया
मन्त्रिधर्म इति मानवेश्वर ॥ ४७ ॥

वेत्सीति ॥ हे मानवेश्वर भो राजन् । अखिल कार्य समस्तमपि कर्तव्यजातम् । वेत्सि जानासि । इह अस्मिन्कर्तव्यजाते विषये । ते तुभ्यम् । विशेषत विशिष्य । वेदनीय बोधनीयम् । न विद्यते नास्ति । विशेषतो वेत्सीत्यन्वयो वा । तथापि, मया । मन्त्रिधम सचिवकृत्यम् । इति । यत् । उच्यते । (तत्) श्रोतु अर्हसि । मन्त्रिधर्म इति बुद्ध्या श्रोतुमर्हसीति वा ॥

स्वल्पमप्यरिकुल सुमेधसा
न प्रमाद्यमिति नाथ बुध्यसे ।
ह्राससाध्यपुरसाधने किय-
त्सङ्गरोपकरणो न शकर ॥ ४८ ॥

स्वल्पमिति ॥ हे नाथ । सुमेधसा सुबुद्धिना राज्ञा । स्वल्प अल्प नि सार वापि । अरिकुल शत्रुसमूह । न प्रमाद्य न उपेक्षणीयम् । इति । (त्वमेव) बुध्यसे जानासि । शकर परमेश्वर । ह्राससाध्याना अन्ततो ह्रासेनैव साधितानां दग्धानामित्यर्थ पुराणा पुरत्रयस्य साधन निर्वहणे विषये दाह इत्यर्थ । कियन्ति सङ्गरोपकरणानि युद्धसामग्र्य यस्य स तथोक्त, न ॥

क्वापि साम भुजधाम कुत्रचि
त्कल्पते क्षितिप कार्यसम्पदे ।
कोऽपि पुष्यति गिरैव सुश्रुषा
पादपश्चरणताडनात्पर ॥ ४९ ॥

क्वापीति ॥ हे क्षितिप राजन् । कार्यसम्पदे कार्यसम्पत्तये । क्वापि कचित् । साम सान्त्वन प्रथमोपाय । कल्पते प्रभवति उपयुक्त भवती

त्वर्थः । कुत्रचित् क्वचित् । भुजधाम बाहुपराक्रमः । कार्यसंपदे कल्पते । कोऽपि पादपः काश्चद्वृक्षः मन्दारवृक्ष इत्यर्थः । मुग्धभुवां स्त्रीणाम् । गिरा नर्मवाक्येनैव । पुष्यति विकसति । परः अन्यः । पादपः वृक्षः अशोकस्तु । चरणताडनात् पादाघातात् । पुष्यति । दृष्टान्तः ॥

चारलोकविदितारिवर्तनः
　　शत्रुसाधनकृती स जायते ।
दण्डतोऽवगतगाधनिर्णयः
　　पाथसोऽवतरणे पटुर्यथा ॥ ५० ॥

चारेति ॥ दण्डतः करस्थितया यष्ट्या । अवगतः उपलब्धः गाधस्य निम्नताया निर्णयः निश्चयः येन तथाक्तः पुरुषः । पाथसः जलस्य । अवतरणे नद्यादेतरणाय तत्र अवतरणे तरङ्गने वा । यथा पटुः । (भवति) तथा, (यः) चारलोकेन प्रणिधिजनेन विदितं ज्ञातं अरिवर्तनं शत्रुस्थितिः येन स तथोक्तः । सः । शत्रुसाधने शत्रुविजये कृती समर्थः । जायते भवति । उपमा ॥

आकलय्य कलहं मिथो रुषा
　　प्रापयेत्पटुररीन्पराभवम् ।
व्यञ्जयन्व्यतिहतीरदोभुवा
　　वह्निनेव पवनो वनद्रुमान् ॥ ५१ ॥

आकलय्येति ॥ पटुः बुद्धिमान् । मिथः रुषा परस्परकोपेन । कलहं भेदम् । आकलय्य उत्पाद्य । रुषा मिथः रहास कलहं आकलय्येति वा । अरीन् शत्रून् । पवनः वायुः । व्यतिहतीः परस्परसघट्टनानि ।

व्यञ्जयन् उत्पादयन् सन् । अदोभुवा तादृशवृक्षात्पन्नेन । वह्निना अग्निना । वनद्रुमान् काननतरूनिव । पराभवं अवमानं नाशमित्यर्थः । प्रापयेत् नयेत् ॥

सामं नैव गणयेज्जडाशयः
साध्यते कृतधिया स दण्डतः ।
राघवानुनयरोपगोचरो
नीरधिर्भवति तन्निदर्शनम् ॥ ५२ ॥

सामेति ॥ जडाशयः मूढमनाः, डलयोरभेदात् जलाशयः जलनिधिश्च । साम सान्त्वनम् । नैव गणयेत् न बहुमन्येत । सः तादृशजडाशयः । कृतधिया बुद्धिमता । दण्डतः शिक्षणादेव । साध्यते नियम्यते । राघवस्य रामस्य अनुनयरोपया सान्त्वनरोपया गोचरः विषयः । नीरधिः समुद्रः । तस्य पूर्वोक्तस्य विषयस्य निदर्शनं दृष्टान्तः । भवति । अर्थान्तरन्यासः ॥

आनतस्य नृपतेर्गरीयसीं
क्ष्मां प्रदक्षिणयतः पुरीमिव ।
दिक्षु दिक्षु पुरतो भवेद्यशो-
लाजवर्षलटहा जयेन्दिरा ॥ ५३ ॥

आनतस्येति ॥ आनतस्य स्वयं विनतस्य । उत्तमस्यात पाठान्तरम् । गरीयसीं सुविस्तृताम् । क्ष्मां भूमिम् । पुरीं निजनगरीमिव । प्रदक्षिणयतः प्रदक्षिणीकुर्वतः दिग्विजयाय निखिलामपि भुवं निजनगरमिव निष्प्रयासं परिभ्रमत इत्यर्थः । नृपतेः राज्ञः । दिक्षु दिक्षु सर्वासु दिक्षु । पुरतः पुरस्तात् । जयेन्दिरा जयलक्ष्मीः । यशांसि कीर्तय एव

लाना ताभा वर्ग विकिरणे स्पृहा मनोज्ञा तत्र मामिलाषेति यावत् । भवेत् ॥

प्रत्यनीकिबलिसाधनेन य
प्रीणयेद्यदि पिशाचमण्डलम् ।
आश्रयेत्स परमाहवाङ्गणे
निर्भरं निधिमिवामलं यशः ॥ ५४ ॥

प्रत्यनीकिबलिमिति ॥ य यः कश्चित् । प्रत्यनीकिन शत्रव एव बलि उपहार तस्य साधनेन निर्वर्तनेन । पिशाचमण्डलं पिशाचसमूहम् । प्रीणयेत् तर्पयेत् यदि । स पर स एव । आहवाङ्गणे युद्धभूमौ । निर्मल विमलम् । यशः कीर्तिम् । निधि निधानमिव । निर्भरं निष्प्रयास यथा तथा । निर्भरमिति निधिविशेषण वा । आश्रयेत् प्राप्नुयात् । निधिभूतस्य बलि दत्त्वा निधि उद्धरन्तीति लोकस्थितिः ॥

त्वय्युपेतकमलोदयेऽप्यहो
तोयदा इव शरदिनागमे ।
ग्ध्यदाशुवलया यथापुर
नार्पयन्ति कतिचिन्नृपा करम् ॥ ५५ ॥

त्वयीति ॥ त्वयि । उपेत प्राप्त कमलाया लक्ष्म्या उदय सम्पत् येन तस्मिन् तादृशे सत्यपि । कमलाना पद्मानां उदय यत्र तस्मिन् तादृशे । शरदिनागमे शरत्कालारम्भे । तोयदा मेघा इव । ग्ध्यन् प्राप्स्यन् आशु सत्वर वलय नाश याभ्यां तयोक्ता सन्त । यथापुरं पूर्ववत् । कर राजदेय बलिम्, करका च । न अर्पयन्ति न ददति । अहो इत्याश्चर्ये खेदे वा ॥

पञ्चमः सर्गः ।

स समाप्य काल्यनियमं सकलं
जगदण्डलङ्घिजयशङ्खरवः ।
अधिरुह्य वाहनमहन्युचिते
नृपकुञ्जरोऽपि निरगान्नगरात् ॥ १ ॥

इत्यादिकान् शब्दान् । प्रतिरवच्छलेन प्रतिध्वनिव्याजेन । प्रतिमण्डप समस्तेष्वपि मण्डपेषु । गृहदेवता अपि च । अन्वकरोत् अनुचकार किम् ॥

परुष्य व्यराणि पटहेन तथा
　श्लथमूर्तय शिखरिणो निखिला ।
निजपक्षमात्रपरिभावि यथा
　कथयन्ति वज्रमपि कारुणिकम् ॥ ३ ॥

परुषमिति ॥ पटहेन भेर्या । परुष उग्र अत्युच्चैरित्यर्थ । तथा । व्यराणि रणितम् । यथा । निखिला समस्ता । शिखरिण पर्वता । श्लथा पटहस्वनासहनेन विशीर्णा मूर्ति स्वरूप येषा ते तथोक्ता सन्त । निजपक्षमात्रपरिभावि स्वकीयगरुत्तामेव तिरस्कारक तन्मात्रच्छेदकमित्यर्थ । वज्र अशनिमपि । कारुणिक कृपालुम् । कथयन्ति वदन्ति ॥

पटहध्वनेन पटुना ककुभ
　स्फुटदद्रिवेणुविगलन्मणय ।
प्रधनश्रिया परिणयोऽस्य भवे-
　दिति लाजभर्जनमिवारचयन् ॥ ४ ॥

पटहेति ॥ पटुना निष्ठुरेण । 'पटुस्तीक्ष्णे स्फुटे दक्ष निष्ठुरे निर्दयेऽपि च' इति रुद्र । पटहस्वनेन आनकशब्देन । स्फुटन्त विभिद्यमाना य अद्रिरेणव पर्वते विद्यमाना वशा तेभ्य विगलन्त विशीर्यमाणा मणय मौक्तिकानि यासु ता तादृश । ककुभ दिश , स्त्रिय इव स्त्रियश्च । अस्य अच्युतगयस्य । प्रधनश्रिया रणलक्ष्म्या सह । परिणय विवाह । भवेत् भविष्यति । इति एव मत्वा । (तदर्थम्) लाजाना भर्जन शरावप्रक्षेपेण तापनम् । आरचयन् अकुर्वन्निव । उत्प्रेक्षा ॥

छन्नविग्रहतया पलायित-
श्चेल्लपो वसति चेरसीमनि ।
तच्छरण्यधरणीभुजा समं
शिष्य एव स चिरायुषा त्वया ॥ ५६ ॥

छन्नेति ॥ छन्नं निह्नुतं विग्रहं शरीरं स्वरूपमित्यर्थः युद्धं च येन तस्य भावेन छन्नविग्रहतया । पलायितः प्रद्रुतः । चेल्लपः चेल्लपराजः । चेरसीमनि चेरराज्यभूभागे । वसति । तत् तस्मात् । सः । चिरायुषा दीर्घायुषा । त्वया । शरण्यः तस्य रक्षकभूतः यः धरणीभुक् राजा चेर नृपतिरित्यर्थः तेन समं सह । शिष्यः एव शिक्षणीय एव, उभावपि दण्डनीयावित्यर्थः । तच्छरण्यस्येक पदं वा । तस्य शरण्य इति तदा अर्थः ॥

प्राक्तनान्निजपदात्परिच्युतः
पालनीय इह पाण्ड्यभूपतिः ।
शिक्षणं मदवतां पुनः सतां
रक्षणं च ननु राजलक्षणम् ॥ ५७ ॥

प्राक्तनादिति ॥ अस्मात्पद्यात्पूर्वं एकस्मिन्नादर्शपुस्तके 'आश्रय न्नियतमप्रकाशतां दीपवद्विमनन्नसंनिधौ ।' इति एकमर्धं परमुपलभ्यते । प्राक्तनात् कुलक्रमागतात् । निजपदात् स्वस्थानात् । परिच्युतः प्रभ्रष्टः । पाण्ड्यभूपतिः । इह । पालनीयः रक्षणीयः । मदवतां मत्तानां दुर्जनाना मित्यर्थः । शिक्षणं दण्डना । सतां पुनः सज्जनानां तु । रक्षणं पालनं च । राजलक्षणं ननु राजचिह्नं किल राजधर्म इत्यर्थः । **काव्यलिङ्गम्** । एतदपि **रथोद्धता** वृत्तम् ॥

इत्युक्तः सचिवेन रागकणिकामीषद्दृशोरञ्चले
बिभ्राणो दलदम्बुजोदरदरप्राप्तातपश्रीमुषम् ।
सरम्भेण चमूविनिर्गमकृते संदिश्य सेनापतिं
पश्चात्तु कृतनिश्चयः समजनि प्राग्रेसरो भूभुजाम् ॥ ५८ ॥

इतीति ॥ इति एवम् । सचिवेन मन्त्रिणा । उक्तः । भूभुजां राज्ञाम् । प्राग्रेसरः अग्रगामी श्रेष्ठः अच्युतराय इत्यर्थः । दृशोः नेत्रयोः । अञ्चले प्रान्ते । दलत् विकसत् अम्बुजस्य पद्मस्य उदरेण मध्यभागेन दरं किंचित् प्राप्तः अधिगतः यः आतपः बालातप इत्यर्थः तस्य श्रियः शोभाः मुष्णाति चोरयतीति तां तथोक्तां तादृशशोभामद्दशामित्यर्थः । रागकणिकां आरुण्यलेशम् । बिभ्राणः धारयन् सन् । सरम्भेण कोपेन त्वरया वा । चमूविनिर्गमकृते सैन्यप्रस्थापननिमित्तम् । कृते इति निमित्तार्थकमव्ययम् । सेनापतिम् । संदिश्य आज्ञाप्य । पश्चात् स्वयमपि विजययात्रां कर्तुम् । कृतनिश्चयः दृढाध्यवसायः । समजनि अभूत् । शार्दूलविक्रीडितम् ॥

इति चतुर्थः सर्गः ॥

निजसंगमान्निखिलशैलदरी
फलितोदये प्रतिरवात्मभवे ।
जलधीन्विगाह्य जयतूर्यरवो
जगदण्डदानमतनुं व्यतनोत् ॥ ५ ॥

निज्जेति ॥ जयतूर्यरव विजयतूर्यध्वनि कश्चित्पुमांश्च । निजसङ्गमात् स्वसंबन्धेन । प्रतिरव प्रतिध्वनिरेव आत्मभव सुत तस्मिन् । निखिला ना समस्तानां शैलानां पर्वतानां दर्यां गुहायां स्त्रीलिङ्गात्वस्याश्चिन्नायिकायां चेति गम्यते फलित निष्पन्न उदय आविर्भाव यस्य तस्मिन् तादृशे सति । जलधीन् समुद्रान् । विगाह्य प्रविश्य तत्र निमज्ज्येत्यर्थ । जगदण्डाय ब्रह्माण्डाय जगति स्थितेभ्य सर्वेभ्योऽपीत्यर्थ दानं अभिमतवस्तुवितरणम् , जगदण्डस्य ब्रह्माण्डस्य दा शब्दसादृश्यतया विभेद च । अतनु अधिक यथा तथा । व्यतनोत् करोति स्म । पुत्रोत्पत्तौ पिता सद्य स्नात्वा दानमाचरन् इत्याचार । **समासोक्ति** ॥

महिपानवेक्षितनिजागमना
न्मकुटाञ्चलस्तबकिताञ्जलिकान् ।
विभुरन्वकम्पत विलोकनत
कमलोत्करानिव करै सविता ॥ ६ ॥

महिपानिति । विभु प्रभु अच्युतराय । अवेक्षित प्रतीक्षित निजागमन स्वस्य निगम यैस्तान् तादृशान् । मकुटाञ्चल शिरःकोटौ स्तबकित स्तबकवदाचरित तत्र न्यस्त इत्यर्थ अञ्जलि संयुतौ करौ येषां तान् । महिपान् राज्ञ । विलोकनत दृष्ट्या । सविता सूर्य । करै

किरणै । कमलोत्करान् पद्मगणानिव । अन्वकम्पत दयते स्म अनुगृहीतवा निलयर्थः ॥

अभिशङ्कय पङ्कजममुष्य मुखं
गरुतो वितत्य गगने वलतः ।
विजहास हंसमिथुनस्य विभा
विशदातपत्रयुगली नृपतेः ॥ ७ ॥

अभिशङ्क्येति ॥ विभा प्रभोरच्युतराजस्य । विशदा धवला । आतपत्रयुगली छत्रयुगमम् । विशदातपत्रेत्येकं पदं वा । अमुष्य अस्या च्युतराजस्य । मुखं वदनम् । पङ्कजं पद्मम् । अभिशङ्क्य भ्रान्त्वा । गरुतः पक्षान् । वितत्य विस्तार्य । गगने आकाशे । वलतः भ्रमतः । हंसमिथुनस्य हंसद्वन्द्वस्य । विभा शोभाम् । विजहास परिहसितवती । भ्रान्तिमान् उत्प्रेक्षा च ॥

कशया प्रचोदयितुमप्रभवः
प्रभवः स्वपार्ष्णिपरिताडनतः ।
तुरगान्प्रचाल्य तुमुलेऽपि मिथ-
स्तुहिनांशुवंशमणिमन्वगमन् ॥ ८ ॥

कशयेति ॥ प्रभवः अच्युतरायसुहृदः महत्तराः । कशया अश्वताडन्या । प्रचोदयितुं वेगेन गमयितुम् । अप्रभवः अशक्ताः सन्तः । स्वैषां पार्ष्णिभिः पादमूलैः परिताडनतः प्रहारेण । तुरगान् अश्वान् । प्रचाल्य धावयित्वा । मिथः परस्परम् । तुमुले निबिडे संघेऽपि । तुहिनांशुवंशः चन्द्रान्वय एव वंशः वेणुः तस्य मणिं मौक्तिकं चन्द्रवंशश्रेष्ठं अच्युतरायम् । अन्वगमन् अनुगतवन्तः ॥

विजयोद्यत विभुमवेक्ष्य भटा
व्यसरन्ससिंहरवसहृतय ।
उदित विधु निकृतये तमसा-
मुदधेरिवोर्मिनिकरा मुखरा ॥ ९ ॥

विजयेति ॥ विजयाय दिग्विजयाय उद्यत उद्युक्तम् । विभु प्रभु अच्युतरायम् । अवेक्ष्य विलोक्य । भटा योधा । सिंहरवसहृतया सिंहनादसततया सह वर्तन्त इति ससिंहरवसहृतय तादृशा सन्त । तमसा अन्धकाराणाम् । निकृतये परिभवाय तन्नाशायेत्यर्थ । उदित उद्गतम् । विधु चन्द्रम् । अवेक्ष्य । मुखरा शब्दायमाना । उदधे समुद्रस्य । ऊर्मिनिकरा तरङ्गपरम्परा इव । व्यसरन् परित प्रसृतवन्त ॥

अखिलैर्बलैरनुगत विशिखा
मवगाहमानमवनीरमणम् ।
हरिणीदृशोऽप्यनुययुर्हृदयै-
रवलोकनैरपि च हर्म्यजुष ॥ १० ॥

अखिलैरिति ॥ अखिलै बलै रथगजतुरगपदातिरूपै समस्तैरपि सैन्यै । अनुगत अनुसृतम् । विशिखा प्रतोलीम् । अवगाहमान प्रविशन्त तत्रागतमित्यर्थ । अवनीरमण भूपतिं अच्युतरायम् । हर्म्यजुष प्रासाद स्थिता । हरिणीदृश युवतयोऽपि । हृदयै मनोभि । अवलोकनै दृष्टिभिरपि च । अनुययु अन्वगच्छन् ॥

विपणौ बलेन निबिड वलता
विततिं चतुष्पथपथे भजता ।

स्तिमितेन तोरणमुखे महता
स विलङ्घते स्म शनकैर्नगरीम् ॥ ११ ॥

विपणाविति ॥ विपणौ पण्यवीथिकायाम् । निबिडं निरवकाशं यथा तथा । वलता सञ्चरता । चतुष्पथपथे शृङ्गाटकमार्गे । वितानं विस्तारम् । भजता प्राप्नुवता । तोरणस्य बहिर्द्वारस्य मुखे अग्रभागे । स्तिमितेन निश्चलेन । महता । बलेन सैन्येन सह । स अच्युतनगरी नगरीं विद्यापुरीम् । शनकैः । विलङ्घते स्म निर्लङ्घितवान् ॥

क्वचन प्रचण्डकरिपण्डमयं
क्वचिदप्यभङ्गुरतुरङ्गमयम् ।
क्वचनोद्भटायुधभटौघमयं
बलमैक्षि दिक्षु बहुधा विततम् ॥ १२ ॥

क्वचनेति ॥ क्वचन कुत्रचित्स्थले । प्रचण्डा तीव्रा ये करिणः गजाः तेषां पण्डमयं समूहात्मा तत्समूहप्रचुरं वा । एवमेवोत्तरत्रापि विकारे प्राचुर्ये वा मयट् । क्वचिदपि । अभङ्गुराः शक्तिमन्तः ये तुरङ्गा अश्वाः तन्मयम् । क्वचन कुत्रचित्प्रदेशे । उद्भटायुधानां तीक्ष्णशस्त्राणां भटानां योधानां यः ओघः समूहः तन्मयम् । (एवम्) बलं सैन्यम् । दिक्षु । बहुधा । विततं विस्तृतम् । ऐक्षि दृष्टम् ॥

परिकीर्णपुष्करपयःकणिका-
भ्रमरावमिश्रनिजपार्श्वयुगाः ।
करिणो ययुः कदलिकामरुता
विनिवारितश्रमवियत्पथिका ॥ १३ ॥

परिकीर्णेति ॥ करिण गजा । परिकीर्णाना विक्षिप्ताना पुष्करप यस शुण्डाग्रस्थितजलस्य कणिकाना बिन्दूना प्रसरेण व्याप्त्या अवसिक्त आर्द्रीकृत निजपार्श्वयुगल स्वपार्श्वद्वय यषा ते तथोक्ता । कदलिकामरुता ध्वजवातेन । विनिवारितश्रमा अपनीतक्लमा वियत्पथिका आकाशचारिण येषा ते तथोक्ताश्च सन्त । ययु अगच्छन् ॥

भरिता रजोभिरुपरि प्रसृतै
करिणस्तृणीकृतघनापघना ।
हरिदन्तगन्धकरिणा सरणी
रभजन्त भूभरणतन्त्रवताम् ॥ १४ ॥

भरिता इति ॥ तृणीकृत तिरस्कृत घनस्य मेघस्य अपघन अङ्ग यैस्ते तथोक्ता । करिण गजा । उपरि स्वोपरिभागे । प्रसृतै व्याप्तै । रजोभि धूलिभि । भरिता पूर्णा सन्त । भूभरणतन्त्रवता भूभारोद्वहनैककर्मणा भूभारोद्वहनसिद्धान्तिना वा । हरिदन्तगन्धकरिणा दिगन्तेषु विद्यमानाना मत्तगजानाम् । सरणी मार्गान् । अभजन्त आश्रितवन्त ॥

सृणिकोणत शिरसि हस्तिपक
प्रहरन्पुरश्चटुलतोत्रिकुलम् ।
अपथ निनाय समद द्विरद
परुषोदितेन परिधाव्य जनान् ॥ १५ ॥

सृणीति ॥ हस्तिपक आधोरण । समद मत्तम् । द्विरद गजम् । शिरसि मस्तक । सृणिकोणत अङ्कुशाग्रेण । प्रहरन् ताडयन् सन् । जनान् । परुषेण निष्ठुरेण उदितेन वचसा । परिधाव्य प्रद्राव्य । पुर

अग्रत । तोत्र गजतोदनदण्ड एषामस्तीति तोत्रिण चटुल चञ्चल धावदित्यर्थ तोत्रिणा कुल यस्मिस्तत् तादृशम् । अपथ अपन्थान मार्ग एव यो न भवति त प्रदेशमित्यर्थ । निनाय गमितवान् । चटुलतो त्रिकुलमिति क्रियाविशेषण द्विरदविशेषण वा ॥

अवटेऽवतारितभरौघ इव
द्रुतमुन्नते द्विगुणभार इव ।
शकट समे पथि चकर्ष धृता-
धृतभूरिभार इव भद्रगण ॥ १६ ॥

अवट इति ॥ भद्रगण वृषभसमूह । अवट निम्ने । पथि मार्गे । द्रुत शीघ्रम् । अवतारित अवरोपित भरौघ यस्य स तथोक्त इव । भरौघ इति पाठान्तरम् । उन्नत उच्छ्रिते । पथि । द्विगुण द्विरुक्त भार यस्य स तादृश इव । समे निम्नोन्नततारहिते । पथि । धृताधृत तथा भासमान भूरि अधिक भार यस्य स इव । शकट अनासि । चकर्ष कर्षति स्म ॥

वहमानवाहलहरीनिवहे
वसुधा निमज्ज्य बलवारिनिधौ ।
निजगाद निर्भरपरागभुजो-
न्नमनेन गाधमदसीयमिव ॥ १७ ॥

वहमानेति ॥ वसुधा भूमि । वहमान प्रवहन् वाहाना अश्वानामेव लहरीणा कल्लोलाना निवह समूह यस्य तस्मिन् । बल सैन्यमेव वारि निधि समुद्र तस्मिन् । निमज्ज्य मङ्क्त्वा । निर्भर निबिड य पराग

रत स एव भुज तस्य उनमनेन उत्क्षेपणन । अदसीय बलवारिनिधि सबन्धि । गाध निम्नताम् । निजगाद उवाचेव ॥

अभिपाति हस्तयुगलेन रजो
निखिलासु दृष्टिषु निवारयितुम् ।
अपटु शचीपतिरदूयत य-
त्फलिता किमस्य परदारगति ॥ १८ ॥

अभीति ॥ शचीपति इन्द्र । हस्तयुगलेन भुजद्वयेन । निखिलासु सर्वासु । दृष्टिषु लोचनेषु । अभिपाति अभिपतनशीलम् । रज धूलिम् । निवारयितु निवर्तयितुम् । अपटु अशक्त सन्, हस्तद्वयस्यैव सद्भावेन सकललोचनाच्छादनासभवात् देवत्वेन निमीलनासभवाच्चेति भाव । यत् यस्मात् । अदूयत विषण्णोऽभवत् । (तत्) अस्य इन्द्रस्य । परदार गति परदारगमन अहल्याव्यतिकर इत्यर्थ । फलिता दुःखोत्पादनेन फलवती किम् । परदाररतिरिति पाठान्तरम् ॥

निबिड पतत्सु रजसा निवहे-
ष्वधिनन्दनोपवनमभ्रधुनौ ।
अभिधानमर्थवददोजनुषो-
रजनिष्ट भूमिरुहपङ्कजयो ॥ १९ ॥

निबिडमिति ॥ अधिनन्दनोपवन नन्दनारामे । अभ्रधुनौ गङ्गाया च । रजसा परागाणाम् । निवहेषु समूहेषु । निबिड निरन्तर यथा तथा । पतत्सु सत्सु । अदोजनुषो । नन्दनगङ्गारामुत्पन्नयो । भूमिरुहपङ्कजयो वृक्षपद्मयो । अभिधान नाम । अर्थवत् भूमौ रोहतीति पङ्काज्जायत इति च व्युत्पत्तेरनुगमात्सार्थकम् । अजनिष्ट बभूव ॥

फणिनायक फणनिमग्नमणी-
पटलो वले परिचले प्रवले ।
असकृच्छिरोविनिमयादवनीं
वहति स्म वामनसिरालगल ॥ २० ॥

फणीति ॥ प्रवले बलीयसि । वल सैन्ये । परिचले गच्छति सति । फणिनायक सर्पराज । फणेषु स्फटासु निमग्नानि उपरिभारविमर्देन अन्त प्रविष्टानि मणीपटलानि रत्नगणा यस्य स तादृश । वामन सङ्कुचित सिराल सिराविष्ट प्रव्यक्तनाडिक इत्यर्थ गल कण्ठ यस्य स तथोक्त सन् । अवनीं भूमिम् । असकृत् पुन पुन । शिरसा मस्तकाना विनिमयात् परिवर्तनात् परिवर्तन कृत्वेत्यर्थ । वहति स्म उवाह ॥

विभुनामुना विलसता परित
सकल प्रकाश्य चतुरङ्गबलम् ।
स्फुटविश्वरूपमहिमातिशय
पुरुषोऽजनिष्ट पुनरुक्त इव ॥ २१ ॥

विभुनेति ॥ परित समन्तात् । सकलम् । चतुरङ्गबल चतुरङ्गसैन्यम् । प्रकाश्य प्रकटीकृत्य । विलसता विराजता, वीं पाक्षणि गरुड लसता च । अमुना । विभुना प्रभुणा अच्युतरायन सर्वव्यापिना च । स्फुट व्यक्त सर्वैर्ज्ञात इत्यर्थ विश्वरूपमहिमातिशय विश्वरूपदर्शन माहात्म्याधिक्य यस्य स तादृश । पुरुष परमपुरुषो नारायण । पुनरुक्त द्वि कथित इव अनुकृत इवेत्यर्थ । अजनिष्ट जात , विश्वरूपधारिण नारायण समस्तलोकप्रकाशनेनानुचकारेत्यर्थ ॥

अथ वेदिकाममरमौलिमणे-
रवधूतमन्दरमहेन्द्रगिरिम् ।
शनकैरगाहत स चन्द्रगिरिं
नगरीं श्रिया हसितनाकपुरीम् ॥ २२ ॥

अथेति ॥ अथ । स अच्युतराय । अमरमौलिमणे भगवतो देवदेवस्य । वेदिका वितर्दिका स्थानभूतामित्यर्थः । अवधूतौ औन्नत्या दिना निराकृतौ मन्दरमहेन्द्रपर्वतौ यया ताम् । श्रिया सम्पदा । हसिता परिहसिता नाकपुरी अमरावती यया ता तथोक्ताम् । चन्द्रगिरिं तन्ना म्नीम् । नगरीं पुराम् । शनकैः मन्दम् । अगाहत प्रविवेश ॥

अखिलानि तत्र विनिवेश्य बला-
न्यविलम्बितं समवरुह्य हयात् ।
हरिपादभक्तिमवलम्ब्य नृणा-
मधिपोऽध्यरुक्षदहिराजगिरिम् ॥ २३ ॥

अखिलानीति ॥ नृणा अधिप अच्युतराय । तत्र चन्द्रगिरिन गरे । अखिलानि समस्तानि । बलानि सैन्यानि । विनिवेश्य स्थापयित्वा । हयात् अश्वात् । समवरुह्य अवतीर्य । हरिपादभक्तिं नारायणस्य चरणा रविन्दयो भक्तिम् । अवलम्ब्य आश्रित्य । अहिराजगिरिं शेषाद्रिम् । अध्यरुक्षत् आरुरोह ॥

ज्वलितैर्दिवार्कमणिभिर्निशि च
स्फुटमोषधीभिरधिशृङ्गतटम् ।

सफणामणीगण इवार्थवती-
मभिधामहीन्द्रगिरिरित्ययते ॥ २४ ॥

ज्वलितैरिति ॥ य शेषाद्रि । अधिश्रृङ्गतट शिखरप्रदेशे । दिवा अहनि । ज्वलितै दीप्रै । अर्कमणिभि सूर्यकान्तै । निशि रात्रौ । (ज्वलिताभि) ओपधीभि ज्योतिर्लताभि । सफणामणीगण स्फटारत्न-सहित इव । अहीन्द्रगिरि शेषाद्रि । इात । अभिधा नामधेयम् । अर्थ-वर्ती मार्थिनाम् । स्फुट व्यक्त यथा तथा । अयते प्राप्नोति वहतीत्यर्थ । स्फुटमिति ज्वलितैरित्यन्ना-न्वेति वा ॥

क्षितिपालमण्डलकिरीटमणी-
परिशीलनादिव पदद्वितयम् ।
अयमक्षमिष्ट वृपभाद्रिशिला
स्वतिकर्कशासु निजमर्पयितुम् ॥ २५ ॥

क्षितीति ॥ अयम् । क्षितिपालमण्डलस्य नृपतिसमूहस्य किरीटम णीपु मकुटरत्नेषु परिशीलनात् परिचयादिव । अतिकर्कशासु अतिक ठिनासु । वृपभाद्रिशिलासु वृपभशैलपाषाणेषु । निज स्वकीयम् । पद-द्वितय चरणयुगम् । अर्पयितु निधातुम् । अक्षमिष्ट शक्तोऽभूत् ॥

परिणी क्षितेरथ कृतस्नपन
परिधाय धौतसिचयद्वितयम् ।
अवगाहते स्म मणिधाम हरे-
रदसीयचित्तमपि भक्तहित ॥ २६ ॥

परिणीरिति ॥ अथ । क्षिते भूमे । परिणी नायक अच्युतराय ।

कामफलद यथाभिलषितरामस्तवसुप्रद भगवन्त हारम् । अभिवन्द्य नमस्कृत्य। धरणे भूमे । आधभू नेता अच्युतराय । वर्णयितु स्तोतुम्। आरभत उपचक्रमे ॥

जनिसहृतिस्थितिकृते जगता
श्रममेक एव न भजामि पुरा ।
इति किं त्रिधैव स भवानभव
द्विधिरित्युमेश इति विष्णुरिति ॥ ३१ ॥

जनीति ॥ जगता भुवनानाम् । जनि उत्पत्ति सहृति सहार स्थात रक्षण एतन्निमित्तम् । कृत इत्यकारान्तमव्यय निमित्तार्थकम् । श्रम प्रयासम् । एक एव असहाय सन्नव । न पुरा भजामि न भक्ष्यामि न आश्रयिष्याभ । इात इात म वा । स भवान् पूज्य त्वम् । विधि ब्रह्मा इति । उमश शिव इात । विष्णु इति । त्रिधा एव अभवत किम् ॥

अनिलोऽनल सलिलमिन्दुरिन
ककुभो नभो वसुमतीत्यखिलम् ।
फणभृत्फणाग्रनटनस्य विभो
भवतो विभाति बहुरूपमिदम् ॥ ३० ॥

अनिल इति ॥ विभा ह प्रभा । अनिल वायु । अनल अग्नि । सालल जलम् । इन्दु चन्द्र । इन सूय । ककुभ दिश । नभ आकाशम् । वसुमती भूमि । इात । इद अखिल एतत्समस्तम् । फणभृत कालियसर्पस्य फणाग्र नटन नटन यस्य तस्य कालियमर्दन कृतवत

कृत स्नपन येन स तथोक्त सन् । धौत निर्मल क्षालितमित्यर्थ सिच यद्वितय वस्त्रयुग्मम् । परिधाय वसित्वा । हरे विष्णो । मणिधाम रत्न खचितम् आलयम् । अवगाहते स्म प्रविवेश । भक्तहित भक्तानुकूलो हरिरपि । अदसीय अच्युतरायसम्बन्धि चित्त मन । अवगाहते स्म ॥

वपुषा वलाहकवलारिशिला-
वहमानरोचिरवमानपुषा ।
अवतारयन्तमहिमांशुसुता-
मपरा पदादमरसिन्धुमिव ॥ २७ ॥

वपुषेति ॥ इत आरभ्य चतु श्लोकी एकान्वया । वलाहक मेघ वलारिशिला इन्द्रनीलरत्न एतयो वहमानाना प्रसरता रोचिषा कान्तीना अवमान तिरस्कार पुष्णाति करोतीति तेन । वपुषा शरीरेण । पदात् चरणात् । अमरसिन्धु गङ्गामिव । अपरा अन्याम् । अहिमांशुसुता सूर्य पुत्रीं यमुनाम् । अवतारयन्त प्रवर्तयन्तमिव स्थितम् ॥

नमतामिवान्ध्यहरणाय नृणा
नवरोचिषाञ्जनविशेषपुषम् ।
जगतीमिवार्पयितुमादधत
जठरेषु वन्ध्यसुदृशा क्रमश ॥ २८ ॥

नमतामिति ॥ नवरोचिषा नूतनकान्तिविशेषण । नमतां प्रणमता भक्तानामित्यर्थ । नृणां मनुष्याणाम् । आन्ध्यस्य अन्धत्वस्य हरणाय नाशनाय । अञ्जनविशेष विशिष्ट कज्जल पुष्णाति सञ्चिनोतीति तम् । क्रमश क्रमेण । (नमन्तीनाम्) वन्ध्यसुदृशा अनपत्यानां स्त्रीणाम् ।

जठरेषु उदरेषु । अर्पयितु निधातुम् । जगती भुवनम् । आदधत धारयन्तमिव कुर्वाणमिव वा स्थितम् । शेषाद्रिनाथो हि भक्तानन्धाननन्धान् वन्ध्याश्च पुत्रवतीरनुगृह्णातीति सुप्रसिद्धम् ॥

प्रथमानचित्फलगुरुं द्युतरुं
　मुनिमानसाम्बरचरं मुदिरम् ।
भवतारणिं प्रणमतां तरणिं
　श्रुतिशाखिकाग्रसुखिनं शिखिनम् ॥ २९ ॥

प्रथमानेति ॥ प्रथमाना वर्द्धमाना प्रसिद्ध्यन्ती वा या चित् ज्ञान तदेव फल तेन गुरु अधिक तत्परिपूर्णमित्यर्थ । द्युतरु कल्पवृक्षम् । मुनीना मानस मन एव अम्बर आकाश तत्र चरतीति तादृशम् । मुदिर मेघम् । प्रणमता भक्तानाम् । भवतारणिं ससारसमुद्रोत्तारिकाम् । तारणिशब्दोऽप्यस्तीति कल्पद्रुमे द्रष्टव्यम् । तरणिं नावम् । श्रुतिशाखिकाग्रसुखिन वेदशाखाग्रे सुखेनासीनम् । शिखिन मयूरम् उपनिषत्प्रतिपाद्यमित्यर्थः ॥

अजमव्ययमजरं जगता-
　मवनैकतानमनिदानदयम् ।
अभिवन्द्य कामफलदं धरणे-
　रधिभू समारभत वर्णयितुम् ॥ ३० ॥

अजमिति ॥ अज अजन्मानम् । अव्यपाय अनिधनम् । अजर जरारहितम् । जगता लोकानाम् । अवने रक्षणविषये एकतान अनन्यवृत्तिकम् । अनिदाना निरुपाधिका दया कृपा यस्य त तादृशम् ।

दयिने मुनीन्द्रहृदयोदयिने
हरये सुराहिततमोहरये ।
दरिणे पयोधितनयादरिणे
भवते नमो निगमलोभवते ॥ ३५ ॥

दयिने इति ॥ दयिने दयालवे । मुनीन्द्रहृदये उदयिने उदयवते । सुराहिता सुरशत्रव असुरा एव तमांसि अन्धकाराणि तेषां हरये सूर्याय तन्नाशकायेत्यर्थ । दर शङ्ख अस्यास्तीति तस्मै दरिणे । पयोधितनयाया समुद्रकन्यायां लक्ष्म्यां आदरिणे आदरवते । निगमलोभवते वेदलुब्धाय श्रुतिप्रियायेत्यर्थ । भवते तुभ्यम् । नम । अस्त्विति शेष ॥

सनकादियोगिशरणाय नमो
जगतीनिवासजठराय नम ।
निगमागमान्तनिलयाय नमो
नलिनोत्पलेशनयनाय नम ॥ ३६ ॥

सनकादीति ॥ सनकादीना सनकप्रमुखाना योगिना शरणाय शरण्यभूताय । नम । जगतीनिवास लोकनिवासभूत जठर उदर यस्य तस्मै । नम । निगमा वेदा आगमा शास्त्राणि तेषां अन्ते निलय वासस्थान यस्य तस्मै । नम । नलिनोत्पलेशनयनाय सूर्यचन्द्रनयनाय । नम ॥

मुचुकुन्दमोक्षद मुकुन्द जग
त्त्रयमूलकन्द मुनिवृन्दनिधे ।

इति तं सुपर्णरथमेष भवा-
र्णवकर्णधारमभिवर्णितवान् ॥ ३७ ॥

मुचुकुन्देति ॥ मुचुकुन्दस्य तन्नाम्नो राज्ञः मोक्षद मोक्षदायिन् । मुकुन्द मोक्षप्रद । जगत्त्रयस्य त्रयाणां लोकानां मूलकन्द मूलभूतकन्दवत्कारणभूत । मुनिवृन्दस्य मुनिगणसमूहस्य निध । इति । सुपर्णरथं गरुडवाहनम् । भवार्णवस्य संसारसमुद्रस्य कर्णधारं नाविकम् । तं भगवन्तं श्रीनिवासम् । एष अच्युतरायः । अभिवर्णितवान् स्तुतवान् ॥

महिमस्तवाभिनवमाल्यभृतो
मधुसूदनस्य मकुटाद्गलिताम् ।
स्रजमग्रहीत्सविनयं नृपतिः
समरश्रियो वरणदामसखीम् ॥ ३८ ॥

महिमेति ॥ नृपतिः अच्युतरायः । महिमस्तवः वैभवस्तुतिरेव अभिनवमाल्यं अम्लानमाला तत् बिभर्ति धारयतीति तस्य । मधुसूदनस्य भगवतो विष्णोः । मकुटात् किरीटात् । गलितां च्युताम् । समरश्रियः रणलक्ष्म्याः । वरणदाम्नः वरणमाल्यस्य सखीं वयस्यां तत्तुल्यामित्यर्थः । स्रजं मालाम् । सविनयं विनयेन सह । अग्रहीत् गृहीतवान् ॥

असहायमौक्तिकमहाभरणे
विभुनार्पिते क्व विनुमो यदिमे ।
अनघे श्रुतिद्वयमभूषयतां
श्रुतिभूषणस्य च सुपर्वमणेः ॥ ३९ ॥

असहायेति ॥ विभुना प्रभुणा अच्युतरायेन । अर्पिते उपहारी कृते । असहायमौक्तिकमहाभरणे एकमुक्तात्मके श्रेष्ठे भूषणे (वर्मणी) (वयम्) क्व विमुम कथं स्तुवीम । यत् यस्मात्। अनघे निर्दोषे। इमे असहायमौक्तिकमहाभरणे । (कर्तृणी) श्रुतिभूषणस्य वदाभरणस्य कर्णालंकारस्य च । सुपर्वणां देवानां मणेः रत्नस्य देवश्रेष्ठस्य, सुपर्वणः शोभनपर्ववत वेणो उत्पन्न मणि रत्न मौक्तिकमित्यर्थं तस्य च, भगवत श्रीनिवासस्येत्यर्थ । श्रुतिद्वय श्रोत्रयुगम्। अभूषयतां अलंकृतवन्तौ ॥

उदिताब्जमुल्लसितचक्रमसा-
वुदरस्थसर्वभुवनाभ्युदयम् ।
गुहतीर्थमत्र कुरुते स्म गिरौ
नरकापहं नलिननाभमिव ॥ ४० ॥

उदितेति ॥ उदितानि उत्पन्नानि अब्जानि यस्मिंस्तत् तथाकम, पक्षे उदित अब्ज शङ्ख यस्य तम् । उल्लसितानि सविलासानि चक्राणि चक्रवाका यस्मिंस्तत् तादृशम्, पक्षे उल्लसित विलसित चक्र चक्रायुध यस्य तम् । उदरस्थानां मध्यस्थितानां सर्वेषां सकलानां भुवनानां जलानां अभ्युदय अभिवृद्धि यस्य तत्, पक्षे उदरस्थानां कुक्षिस्थानां सर्वेषां भुवनानां जगतां अभ्युदय यस्य तम् । नरक अपहन्ति अपनयतीति तत्, पक्षे नरकं नरकासुरं अपहन्तीति तम् । नलिननाभं पद्मनाभं नारायणमिव स्थितम् । गुहतीर्थम् । अत्र अस्मिन् शेषाद्रौ । कुरुते स्म अकुरुत ॥

महता प्रभालिवलयेन मही-
पतिनार्पितेन फणिशैलपतिः ।

उपरिश्रितेन्द्रधनुरुल्लसित

हरित व्यडम्बयदिवाम्बुमुचम ॥ ४१ ॥

महतेति ॥ फणिशैलपति शेषाद्रिनाथ । महीपतिना अच्युतराजेन । अर्पितेन दत्तेन । महता गुरुणा । प्रभाल्लसल्लसन कान्तिपुञ्जसाहितेन कट केन । उपरिश्रितेन स्वोपरिस्थितेन इन्द्रधनुषा उल्लसित शोभनम् । हरित नीलम् । अम्बुमुच मेघम् । व्यडम्बयत् अनुचकार । इवो वाक्यालङ्कारे ॥

श्रवणे कथास्य मनन च मन-

श्चरणे शिर स्वयमलङ्कुरुत ।

इति कुण्डल पदकमेष हरे

किमिहार्पयन्मणिकिरीटमपि ॥ ४२ ॥

श्रवणे इति ॥ अस्य हरे । कथा पुण्यचरित सङ्कीर्तनमित्यर्थ । श्रवणे कर्णौ । अलङ्करोति भूषयति । मनन ध्यान च । मन हृदय वक्ष इत्यर्थ । अलङ्करोति । चरणे हरिपादौ । स्वयं आत्मना । शिर । अलङ्कुरुत । इति इति मत्वा । एष अच्युतराय । हरे विष्णवे । सर्वधर्मा मान्यविक्रमया धर्मा । कुण्डल कर्णाभरणम् । पदक कण्ठभूषणम् । मणि किरीट रत्नग्रथित मकुटमपि । इह । अर्पयत् दत्तवान् किम् ॥

अनुलेपमाल्यवसनाभरणै-

र्हरिमन्तरन्धतमसेमहरिम् ।

न्ययमद्गिरौ परिपरीमियमा

स्वति चिह्नानि पमिता धरणो ॥ ४३ ॥

अनुलेपेति ॥ धरणे क्षमिता पृथ्वीन्द्र । अन्त हृदये तिमिर न

॥

यत् अन्धतमस गाढान्धकार अज्ञानमित्यर्थ तदेव इभ गज तस्य हरिं सिंह तन्नाशकमित्यर्थं । हरिं श्रीनिवासम् । अनुलेपमाल्यवसनाभरणै चन्दनमालावस्त्रभूषणै । नियमात् नियत यथा तथा । परिचरन् शुश्रूषमाण सन् । कतिचित् दिनानि कतिपयदिवसपर्यन्तम् । न्यवसत् वसति स्म ॥

अवरुह्य वेङ्कटगिरे शिखरा-
दधिरुह्य वाहमतिगन्धवहम् ।
स गरीयसीं सकलमुक्तिकरी-
मपि कालहस्तिनगरीमगमत् ॥ ४४ ॥

अवरुह्येति ॥ स अच्युतराय । वेङ्कटगिरे । शिखरात् शृङ्गात् । अवरुह्य अवतीर्य । अतिगन्धवह वायुमतिक्रान्तम् । वाह अश्वम् । अधिरुह्य । गरीयसी अतिश्रेष्ठाम् । सकलमुक्तिकरीं सर्वेषामपि मोक्षप्रदाम् । कालहस्तिनगरी कालहस्त्याख्य पट्टणमपि । अगमत् प्राप ॥

निकषा सुवर्णमुखरीं लहरी
मुखरीभवद्वितततीरदरीम् ।
कृतधाम धाम निजनामपदा
ङ्कनमसीमभूम नमति स्म नृप ॥ ४५ ॥

निकषेति ॥ लहरीभि वीचिभि प्रवाहैर्वा मुखरीभवन्ती शब्दायमाना वितता विस्तृता तीरदरी कूलगुहा कूलोपान्तस्थनिकुञ्ज इत्यर्थं यस्यास्ता तथोक्ताम् । सुवर्णमुखरीं निकषा सुवर्णमुखर्याख्याया नद्या समीपे । कृत धाम स्थान येन तत् । धाम तेज उमारमणमित्यर्थं ।

नृप अच्युतराय । निजनामपदं अच्युतेति शब्दः अङ्कनं चिह्नं यस्य स तथोक्तः, तादृशं सीम्नः अवधिभूतप्रदेशस्य भूमा बाहुल्यं विस्तारः यस्मिन्कर्मणि तद्यथा तथा । समासान्तविधेरनित्यत्वान्न टच् । नमति स्म ननाम, निजनामाङ्कनपूर्वकं पूर्वाधिकं भूभागमुपहारीकृत्य प्रणतवानिति भावः । "निजनामपदाङ्कनमासमीम" इति पाठान्तरम् । तदा तेजसो विशेषण तत् ॥

द्रविणाधिपेन दृढसख्यवता
न च भिक्षुतास्य समतक्ष्यत या ।
अपवारितेयमुपहारितया
नरसात्मजेन नवभीमभुवा ॥ ४६ ॥

द्रविणेति ॥ अस्य परमशिवस्य । या भिक्षुता यत्भिक्षाकत्वं । दृढसख्यवता अत्यन्तसुहृदा । द्रविणाधिपेन कुबेरेण । न च समतक्ष्यत न निवर्तिता । इयं सैव भिक्षुता । नरसात्मजेन अच्युतरायेण । उपहारितया उपढौकितया । नवभीमभुवा नूतनावधिकेन भूभागेन । अपवारिता निवर्तिता । 'सख्यवता न च भिक्षुतास्य समशिक्ष्यत या' इति पाठान्तरम् ॥

स विनम्य चन्द्रशकलाभरणं
शिवमश्वनंभगिरिसंचरणम् ।
अभिवाञ्छितामपि विरिञ्चिमुखै-
र्हरिकाञ्चिनामनगरीमगमत् ॥ ४७ ॥

स इति ॥ स अच्युतराय । अश्वनंभगिरिसंचरणं कालहस्तिगिरिवास्तव्यम् । चन्द्रशकलाभरणं इन्दुकलावतंसम् । शिवं पार्वतीपतिम् ,

वेनम्य नमस्कृत्य । विरिञ्चिमुखैः ब्रह्मादिभिर्देवैरपि । अभिवाञ्छिता मभिलषिताम् । हरिकाञ्चिनामनगरीं विष्णुकाञ्चीपत्तनम् । अगमत् जगाम ॥

अभिजातवैधहयमेधमखा-

न्तरजातमाधिहरमानमताम् ।

कुमुदारविन्दकुलबन्धुदृश

समुदायमम्बुधिसुताक्षिमुदाम् ॥ ४८ ॥

अभिजातेति ॥ इदमनन्तरपद्य चैकान्वयम् । अभिजात रम्य यथाविधि निवृत्त इत्यर्थ य वैध ब्रह्मणा कृत हयमेधमख अश्वमेध याग तस्य अन्तरे मध्य जात उत्पन्न आत्ममध्याद्वपा मुखनादाय समु त्थितमित्यर्थ । आनमता प्रणमता भक्तानाम् । आधिहर मनोव्यथानि वर्तकम् । कुमुदारविन्दकुलबन्धुदृश चन्द्रसूर्यलोचन । अम्बुधिसुताया लक्ष्म्या अक्षिमुदा नेत्रसन्तोषाणाम् । समुदाय समुच्चयम् ॥

परिचर्यया प्रणवशीर्षमणिं

परितोष्य शार्ङ्गिणममुष्य पुर ।

अधिरूढमौक्तिकतुलापुरुषोऽ

प्यतुलोऽजनिष्ट सदभीष्टकर ॥ ४९ ॥

परिचर्ययेति ॥ प्रणवस्य शीर्षमणिं चूडामणिम् । शार्ङ्गिण वरदराजम् । परिचर्यया शुश्रूषया । परितोष्य तोषयित्वा । अमुष्य वरदराजस्य । पुर अग्रभाग । अधिरूढ आरूढ मौक्तिकतुलापुरुष मुक्तामय घटाया मारोपित पुरुष पुरुषप्रमाणानि मौक्तिकानीत्यर्थ सदृशपुरुषश्च यस्य स तादृशोऽपि । सदभीष्टकर सज्जनाना मनोरथपूरक अयमच्युतराय । अतुल तुलारहित घटाशून्य, निरुपम । अजनिष्ट जात । **विरोधाभास** ॥

पटहोम्भाकरणमन्त्रवशा-
द्गलितस्वगर्वगरलोष्मभराः ।
निभृताः किरातनिकरा नृपते-
र्निहितोपदाश्चरणयोर्न्यपतन् ॥ ५० ॥

पटहेति ॥ किरातनिकरा व्याधसमूहा एव पन्नगगणा इत्येकदेशविवर्तिरूपकम् । पटहानां भेरीणां आकरणं आकारशब्द एव मन्त्रः गरुडमन्त्रः तस्य वशा आयत्तता तस्मात् । गलितः प्रच्युतः निरस्त इत्यर्थः स्वगर्वः स्वदर्प एव गरलं विषं तस्य ऊष्मभरः औष्ण्याधिक्यं येषां ते तथोक्ताः । निभृता विनीताः । निहितोपदाः समर्पितोपहाराश्च सन्तः । चरणयोः । न्यपतन् निपतितवन्तः प्रणेमुरित्यर्थः ॥

शिखिपिच्छलाञ्छितशिखण्डभरैः
श्रितधन्वभिः सितवराटगुणैः ।
विशति स्म तैरनुगतो विनया-
दधिपो नृणामरुणशैलपुरीम् ॥ ५१ ॥

शिखीति ॥ शिखिपिच्छैः मयूरबर्हैः लाञ्छिताः चिह्निताः नद्युत्कृष्टा इत्यर्थः शिखण्डभराः चूडाभाराः येषां तैः । श्रितं गृहीतं धनुः चापं यैस्तैः । सिताः बद्धाः वराटगुणाः कपर्दकसूत्राणि यैस्तथोक्तैः । तैः किरातैः । विनयात् प्रश्रयेण । अनुगतः अनुसृतः सन् । नृणां अधिपः नराधीशोऽच्युतरायः । अरुणशैलपुरीं अरुणाचलनगरम् । विशति स्म प्रविवेश ॥

अमितानुलेपभजनेन जटा-
पटलार्चिषा च परिशीलनया ।

अविकुण्ठकण्ठरुचिधूमतया-
प्यनलात्मतामभिनयन्तमिव ॥ ५२ ॥

भसितेति ॥ इत पदत्रयमेवान्वयम् । भसितानुलेपस्य भस्मोद्धूलन रूपस्य सम्पर्कसम्पर्कस्य भजनेन आश्रयणेन । जटापटलानां जटाजूटानामेव अर्चिषां शिखानाम्, जटानुगम्य पीतत्वाद्वह्निशिखासादृश्यमिति बो ध्यम् । परिशीलनया परिचयेन तत्सम्पर्केण चेत्यर्थः । अविकुण्ठ निर्गल कण्ठरुचि गलशोभैव धूमः यस्य तस्य भावेनापि । अनलात्मता अग्निस्वरूपताम् । अभिनयन्त सूचयन्तमिव स्थितम् । अरुणाचले अग्निमयं शिवलिङ्गमिति प्रसिद्धम् ॥

वरपाशबन्धनवशाद्वशिना-
मवलम्बमानमधिहृत्सुषिरम् ।
अभिवेष्टितं गलमहोजतुना-
प्यभिमुद्रितं तमसृपोक्तिनिधिम् ॥ ५३ ॥

वरेति ॥ वर श्रेष्ठ य पाश करस्थिता रज्जु तस्य यत् बन्धन करेण स्वीकरणम्, तेन बन्धन नहन च तस्य वशात् आयत्तत्वात् । वशिना जितेन्द्रियाणाम् । अधिहृत्सुषिर हृदयकुहरे । अवलम्बमान तिष्ठन्त अवलसमान च । अवलम्ब्यमानमिति पाठान्तरम् । गलमहोजतुना क ण्ठकान्तिलाक्षया । अभिवेष्टित मण्डलाकारेण व्याप्तम् । अत एव, अभि मुद्रित अपि अभित चिह्नित च । अभिवेष्टितमिति मुद्रणक्रियाविशेषण वा । असृपोक्तीना सत्यवाचा वेदानामित्यर्थः निधि निधानम् । निधे १ पाशबन्धभूरन्ध्रनिक्षेपजतुमुद्रादिक सुप्रसिद्धमिति तथैव वर्णितम् ॥

अरुणाचलेशमभिवन्द्य किम
प्यवधार्य कार्यमथ हस्तगतम ।
तिरयन्नगाद्विजयतूर्यरवै.
कलशीभवाधिकरण ककुभम् ॥ ५४ ॥

अरुणेति ॥ एतान्शम्, अरुणाचलेश अरुणगिरिनायक परमेश्वरम् । अभिवन्द्य नमस्कृत्य । अथ । कार्यं स्वोद्देश्यकार्यम् । हस्तगत करस्थम् । किमपि बहुभि प्रकारै । अवधार्य निश्चित्य । कलशीभवाधिकरण अग स्त्यावासभूताम् । ककुभ दिश दक्षिणा दिशमित्यर्थ । विजयतूर्यरवै जयभरीध्वनिभि । तिरयन् आच्छादयन् परिपूरयन्नित्यर्थ । अगात् प्रतस्थे ॥

कदलेक्षुकेरकलमै स्वदृशो-
र्जनितोपदान जनपदाभ्युदयान ।
अवलोकयन्नतिशयादवने
कमिता समास्नुत कवेरसुताम् ॥ ५५ ॥

कदलेति ॥ अवने कमिता अच्युतराय । कदलै रम्भावृक्षै, इक्षुभि, केरै नालिकेरै, कलमै शालिभिश्च । 'कदलश्च कदल्यसौ इति व्याडि । स्वदृशो निजनेत्रयो । जनिता सपादिता उपदा उपायन यैस्तान् तथोक्तान् । जनपदाभ्युदयान् देशसम्पत्ती । अतिशयात् विशेषेण । अवलोकयन् पश्यन् सन् । कवेरसुतां कावेराम् । समास्नुत प्राप्तवान् ॥

घननालिकेरकदलीवकुल-
क्रमुकाटवीजुषि तदीयतटे ।

पृतनां मुकुन्दनमनाभिमना
निखिलां न्यवेशयदयं नृपतिः ॥ ५६ ॥

घनेति ॥ अयं नृपतिः अच्युतरायः । मुकुन्दनमनाभिमनाः श्रीरङ्गनाथमभिवन्दितुमुत्कण्ठितः सन् । निखिलां पृतनां समस्तमपि सैन्यम् । घना निबिडा या नालिकेराणाम्, कदलीनाम्, वकुलानां केसराणाम्, क्रमुकाणां पूगानां च अटवी वनं तां जुषते प्राप्नोतीति तस्मिन् । सदीयतटे कावेरीकूले । न्यवेशयत् स्थापितवान् ॥

पृथुनीतिमार्गपथिकः पृतना-
पदवीश्रमापहृति तत्पयसि ।
कृतमज्जनादिनियमः क्षितिपैः
सह कैश्चिदाश्नुत स रङ्गगृहम् ॥ ५७ ॥

पृथ्विति ॥ पृथुनीतिमार्गपथिकः महानीतिमार्गगामी । सः अच्युतरायः । पृतनायाः सेनायाः यः पदवीश्रमः मार्गखेदः त अपहरति निवर्तयतीति तस्मिन् । तत्पयसि कावेरीसलिले । कृतः रचितः मज्जनादिनियमः स्नानादिक्रियं येन तथोक्तः सन् । कैश्चित् कतिपयैः । क्षितिपैः राजभिः सह । रङ्गगृहं श्रीरङ्गनाथालयम् । आश्नुत प्राप्तः ॥

अपि जागरूकमवने जगता-
मधिभोगिभोगमजहत्स्वपनम् ।
सहजप्रसादमुखचन्द्रतया
प्रथयन्तमन्तरिव भक्तमुदम् ॥ ५८ ॥

अपीति ॥ पद्यत्रयमेकान्वयम् । जगताम् । अवने पालने । जाग-

रूक अनिद्राणमपि । अधिभोगिभोग शेषशरीरे । अजहत् अविमुञ्चत् स्वपन निद्रा य त तथोक्तम् । महत्प्रसाद नैसर्गिकप्रसन्नतावान् मुख चन्द्र वक्त्रेन्दु यस्य तस्य भावेन । अन्त हृदये (स्थिताम्) भक्तमुद भक्तविषयक सन्तोषम् । प्रथयन्त प्रकटयन्तमिव स्थितम् ॥

स्वपनानुभूतिसुखमीलितयो-
रपि चक्षुषोरविरतोल्लसितौ ।
स्फुटयन्तमिन्दुपटकिन्यधिपौ
करसङ्गवद्दरस्थाङ्गमिषात् ॥ ५९ ॥

स्वपनेति ॥ चक्षुषो नेत्रयो । स्वपनानुभूतिसुखेन निद्रानुभवान न्देन मीलितया मुद्रितया मतोरपि । करसङ्गवती हस्तस्थिते य दररथाङ्ग शङ्खचक्रे तन्मिषात् तद्व्याजेन । इन्दु चन्द्र, पुटकिन्यधिप कमलिनीपति सूर्य एतौ । अविरतोल्लसितौ नित्योदयौ सदा प्रकाशमा नाविति यावत् । स्फुटयन्त सम्यक् प्रदर्शयन्तम ॥

कलशाम्बुराशिदुहितु करयो-
र्निजपादपल्लवयुगान्निहितान् ।
अजहद्विलासकमला कमला-
मिव कल्पयन्तमनमत्स हरिम ॥ ६० ॥

कलशेति ॥ कलशाम्बुराशिदुहितु क्षीरसागरपुत्र्या लक्ष्म्या । करयो हस्तयो । निहितान् निक्षिप्तान् । निजपादपल्लवयुगात् स्वकीय चरणकिसलययुगलात् । कमलां लक्ष्मीम् । अजहत् अमुञ्चत् विलासकमल लीलारविन्द यां ता तथोक्तामिव । कल्पयन्त कुर्वाणम् । हरिं रङ्गनाथम् । स अच्युतराय । अनमत् प्रणतवान् ॥

मुकुलीकृतेन मुहुरुल्लना-
कलकङ्कणारवकलापवता ।
शयपद्मकोरकयुगेन शनै-
रचितोरुपीडनविधिं रमया ॥ ६१ ॥

मुकुलीकृतेनेति ॥ पद्यद्वयमेकान्वयम् । रमया लक्ष्म्या । मुकुलीकृतेन काशाकृतेन प्रत्येकमूर्ध्वभागे अधोभागे च निक्षिप्तेनेत्यर्थ । मुहु अभीक्ष्णम् । उल्लनया चलनेन कल मधुर य कङ्कणारव वलयध्वनि तस्य कलाप सतति स एव कलाप भूषण वा अस्यास्तीति तेन । 'कङ्कणारवकला वहता' इति पाठान्तरम् । शयपद्मकोरकयुगेन हस्तपद्ममुकुलद्वयेन । शनै मन्द मन्दम् । रचित कृत ऊरुपीडनविधि ऊरुसवाहन यस्य त तादृशम् ॥

अजमव्ययपायमजर जगता-
मवनैकतानमनिदानदयम् ।
अभिवन्द्य कामफलद धरणे-
रधिभू समारभत गन्तुमित ॥ ६२ ॥

अजमिति ॥ अजम् । अव्ययपायम् । अजरम् । जगताम् । अवनैकतानम् । अनिदानदयम् । कामफलद हरिम् । अभिवन्द्य । धरण अधिभू अच्युतराय । इत श्रीरङ्गनगरात । गन्तुम् । आरभत ॥

नलिनेक्षणाश नरपालमणे
क्षितिमण्डले तव किमस्ति सम ।
अभिगम्य एष हि मयैव विभो
रणकर्म राजति न चासमयो ॥ ६३ ॥

नलिनेति ॥ इदं पद्यं सलग्ननृपोक्तिः । हे नलिनेक्षण! अंश विष्णोरंशभूत । 'नाविष्णुः पृथिवीपतिः' इति स्मरणादिति भावः । नरपालमणे राजरत्न ! क्षितिमण्डले भूवलये । तव । समः तुल्यः । अस्ति किं नास्त्येवेत्यर्थः । हे विभो हे प्रभो । एषः चेरराजः । मयैव हि मयैव खलु, न तु भवतेत्यर्थः । अभिगम्यः अभियातव्यः । असमयोः अतुल्ययोः भवतः चेरराजस्य च द्वयोर्युवयोरित्यर्थः । रणकर्म युद्धक्रिया । न च राजति न शोभते । 'न किं समयोः' इति पाठान्तरे तु समयोः मम चेरस्य चेति व्याख्येयम् ॥

प्रेम्णा पात्रीकुरुष्व प्रियरमण भुवः प्रेषणादेष दोर्भ्यां
नेष्ये प्रेष्यं हि गर्वमहिलमिह जवाच्चेरपं चेरसीम्नः ।
प्रस्थाप्येत्युक्तवन्तं सलगनृपसुतं पद्मनाभान्तरङ्गे
रङ्गे भक्त्युत्तरङ्गः कतिचन दिवसान्स्थातुमैच्छन्महेन्द्रः ॥

प्रेम्णेति ॥ भुवः प्रियरमण हे भूपते । (माम्) प्रेषणात् प्रस्थापनेन प्रेम्णा भक्त्यतिशयस्य । पात्रीकुरुष्व विषयीकुरु । एषः अयमहम् । गर्वमहिलं मदकलुषम् । प्रेष्यं भृत्यभूतम् । चेरपं चेरनृपम् । चेरसीम्नः चेरभूभागात् । जवात् वेगेन । इह भवत्सिकटे । दोर्भ्यां भुजाभ्यां भुजबलेनेत्यर्थः । नेष्ये आनेष्यामि । इति एवं प्रकारेण । उक्तवन्तं च वदन्तं तम् । सलगनृपसुतं सलगराजपुत्रं स्वस्य श्यालम् । प्रस्थाप्य सम्प्रेष्य । महेन्द्रः महाशयः अच्युतरायः । भक्त्या उत्तरङ्गः अधिकः परिपूर्णभक्तिमानित्यर्थः । पद्मनाभस्य श्रीरङ्गनाथस्य भगवतः पद्मनाभस्य अन्तरङ्गे अन्तरङ्गस्थाने अन्तःसमीप इत्यर्थः । रङ्गे श्रीरङ्गनाम दिव्यदेशे । कतिचन दिवसान् कियतश्चिद्दिनान् किञ्चिच्चिरमित्यर्थः । स्थातुं वस्तुम् । ऐच्छत् अभिलषत् । स्रग्धरा वृत्तम् ॥

इति पञ्चमः सर्गः ॥

षष्ठः सर्गः ।

प्रहित पयोधिरशनापतिना
सलगेन्द्रसिन्धुरमणेन्दुरयम् ।
अगमाद्विलङ्घ्य मधुरा महती-
मथ ताम्रपर्ण्यभिहिता सरितम ॥ १ ॥

प्रहित इति ॥ पयाधिरशनापतिना ममुद्रमेखलाया भुव पत्या श्च्यु तरायेण । प्रहित प्रापत । अयम् । सलगन्द्र सलगराज एव सिन्धुर मण नदीश ममुद्र तम्य इन्दु चन्द्र सलगनृपपुत्र इत्यर्थ । महतीं गुर्वीम् । मधुरा मधुरापुरीम् । विलङ्घ्य आतक्रम्य । अथ । ताम्रपण्य भिहिता ताम्रपर्णी इत्यभिधानवतीम् । मरित नदीम् । अगमत् प्राप्तवान् ॥

पृथुमौक्तिकोपलचयैर्लहरी-
भरपाशयन्त्ररभसोच्चलितै ।
अभितो मृगीशुककुलाक्रमणा
दभिपालितान्तिकमहीकलमाम् ॥ २ ॥

पृथ्विति ॥ इदमनन्तरपद्य च पूवश्लाकस्थसरितो विशेषणपरम् । अभित समन्तात् । लहरीभरा ऊर्म्यतिशया एव पाशयन्त्राणि शिलादि प्ररणाय रज्जुनिर्मितानि यन्त्राणि तै रभसन वगन उच्चलितै विक्षिप्तै । पृथुमौक्तिकोपलचयै महता मुक्ताफलानामव शिलाना समूहै । मृगीशुक

कुलाक्रमणात् मृगीणां शुकानां च समूहस्य आक्रान्ते । अभिपालिता रक्षिता अनतिक्रमहीरलमा सनिकृष्टकेदारशालय यया ताम् । ताम्रपर्ण्यां मुक्ताफलोदय इति प्रसिद्धम् ॥ **समासोक्ति रूपक च** ॥

निबिडोर्मिकापवनशोधनया
  नियत पय पृषतसेचनत ।
शुचिमौक्तिकौघकुसुमप्रकरै
  स्वसमागमार्हमुपचारकरीम ॥ ३ ॥

निबिडेति ॥ निबिडाना निरन्तराणा ऊर्मिकापवनाना तरङ्गवाताना शोधनया मार्जनेन, तरङ्गवातकर्तृकावकरापनयनेनेत्यर्थ । निबिडानां ऊर्मिकाणां पवनं क्षरणं शोधनयेति वा । नियत निश्चित सम्यागत्यर्थ । पय पृषतै अम्बुबिन्दुभि सेचनत सेचनात् । शुचीनि निर्मलानि यानि मौक्तिकानि मुक्ता तान्येव कुसुमप्रकरा पुष्पविसरा तैश्च । स्वसमागमार्हं स्वागमनस्यानुगुण यथा तथा । उपचारकरीं सत्कारकर्त्रीम् । एतामर्णसरितमपश्यदिति सम्बन्ध ॥

अभिशङ्कय हास्तिककराश्चलतां
  निजभञ्जन निकटभूमिरुह ।
प्रतिबिम्बसंपदवलम्बनत
  प्रविशन्ति यत्र भयवन्त इव ॥ ४ ॥

अभिशङ्कयेति ॥ निकटभूमिरुह आसन्ना वृक्षा । हास्तिकस्य गजसमूहस्य कराश्चलता शुण्डाग्रस्य । निजभञ्जन स्वेषां भङ्गम । अभिशङ्कय शङ्कय । भयवन्त भीता इव । प्रतिबिम्बसंपदवलम्बनत प्रतिच्छाया

मपरस्याश्रयणेन प्रतिबिम्बव्याजेनेति भाव । यत्र यस्यां ताम्रपर्ण्याम् । प्रविशन्ति ॥

नभस प्रसादमवलुण्टयितु
लघु चालितालहरिभोगिमुखात् ।
अवपातितै किमभितो वरणै-
रनुबिम्बनै स्फुरति याम्बुमुचाम ॥ ५ ॥

नभस इति ॥ या ताम्रपर्णी । नभस आकाशस्य । प्रसाद नैर्मल्यम् । अवलुण्टयितु चारयितुम् । लघु द्रुतम् । चालितात् उपयुक्तात् । लहरि वीचिरव भोगिमुख उरगास्य नाम किंचिच्चौर्यसाधनमायुध तस्मात्, नख प्रयोगेणत्यर्थ । अभित समन्तात् । अवपातितै विशकलितत्वात्पातितै । वरणै कि प्राकारा किमेते इत्युत्प्रेक्ष्यमाणै, तद्वत्स्थितैरित्यर्थ । अम्बुमुचा मेघानाम् । अनुबिम्बनै प्रतिबिम्बै । स्फुरति शोभते ॥

सलिलभ्रमाविरतजृम्भिकया
तटमृत्तिकाहरणदोहलत ।
अपि फेनखण्डसितगण्डतया
विवृणोति सत्त्वमिव या विधृतम् ॥ ६ ॥

सलिलेति ॥ सलिलभ्रम जलावर्त एव आवर्त्ता सततप्रवृत्ता जृम्भिका मुखव्यादान तया । तटमृत्तिकाया तारमृद हरण कर्षणमेव मृत्तिकाया आहरण आहार तत्र दोहलत अभिलाषेण । फेनखण्डसित गण्डतया फेनखण्ड डिण्डीरपिण्ड एव सित शुभ्र गण्ड कपोल यस्या स्तस्या भावेनापि । या ताम्रपर्णी । विधृत भृतम् । सत्त्व जन्तु गर्भमि

त्यर्थ । विवृणोति प्रकाशयतीव । गर्भं विवृतमिव विवृणोतीत्यन्वयो वा । गर्भिणीचिह्नानां जृम्भादीनां विद्यमानत्वादियमपि गर्भिणीव भातीति भाव ॥

अवलोक्य यत्पयसि वारिमुचा-
मनुबिम्बमाकलितपङ्कधिय ।
अवगाहनाय पदमर्पयितु
चकिता भवन्ति मदपेचाकिन ॥ ७ ॥

अवलोक्येति ॥ मदपचकिन मत्तगजा । यस्या ताम्रपर्ण्यां पयसि जले । वारिमुचां मेघानाम् । अनुबिम्ब प्रतिबिम्बम् । अवलोक्य दृष्ट्वा । आकलिता जनिता पङ्कधी कर्दमबुद्धि पङ्कभ्रम इत्यर्थं येषां ते तादृशा सन्त । अवगाहनाय अवतरणाय मज्जनाय । पद चरणम । अर्पयितु निधातुम् । चकिता भीता । भवन्ति । भ्रान्तिमान् ।

अलिनां निशम्य कलगानसुधा-
मरविन्दसन्ततिषु कन्दलिताम ।
प्रमदेन या विवृणुते पुलका-
न्प्रथमानशैवलपलाशमिषान ॥ ८ ॥

अलिनामिति ॥ या ताम्रपर्णी । अरविन्दसन्ततिषु पद्मसमूहेषु । कन्दलितां विवृद्धाम् । अलिनां भृङ्गाणाम् । कलगानसुधां मधुरगानामृतम् । निशम्य श्रुत्वा । प्रथमानशैवलपलाशमिषान् मदे प्रकटीभवन्तीनां दल्लवाराणां जलनीलीनां व्याजेन । प्रमदेन सन्तोषेन । पुलकान् रोमाञ्चान् । विवृणुते प्रकाशयति । व्यापह्नुत्युत्प्रेक्षा ॥

अधिवारिजातमुखसमर्पयितुं
मधुपैणनाभितिलकं महितम् ।
प्रतिबिम्बितद्युमणिबिम्बमिषा-
द्वहतीव या मुकुरमूर्मिकरे ॥ ९ ॥

अधिवारीति ॥ या । अधिवारिजातमुख पद्म एव मुखे । महित श्रेष्ठम् । मधुप भ्रमर एव एणनाभितिलक. कस्तूरीविशेषक तम् । अर्पयितु न्यसितुम् । प्रतिबिम्बितद्युमणिबिम्बामिषात् प्रतिफलितसूर्यमण्डलव्याजेन । ऊर्मिकरे तरङ्ग एव हस्ते । मुकुर दर्पणम् । वहति धारयतीव । **रूपकं उत्प्रेक्षा समासोक्तिश्च** ॥

पतदुत्पतज्जलपतद्गुटिका-
विहृतिव्यपाहृतनिमेषतया ।
अभिवृद्धमश्रु किल या भजते
मकरन्दबिन्दुमरविन्ददृशि ॥ १० ॥

पतदिति ॥ या । पतन्त अवतरन्तः उत्पतन्त उड्डयमानाश्च ये जल पतन्त. जलपक्षिण त एव गुटिका गोलका ताभि या विहृति विहार तया व्यपाहृत निरासित निमेषः नेत्रस्पन्द. यस्यास्तस्या भावेन । अरविन्ददृशि पद्मरूपे नयने । अभिवृद्ध प्रवृद्धम् । अश्रु किल नेत्रजलमिव । मकरन्दबिन्दु मधुकणम् । भजते प्राप्नोति । मकरन्दबिन्दुमेव अश्रु भजते किलेति वा ॥ **रूपकं उत्प्रेक्षा च** ॥

शरधारयैव बकचामरव-
त्कुटिलोर्मिचापकुहरोद्गतया ।

प्रतिकूलभेदनकरी प्रथते

स्फुटवाहिनीविलसिता भुवि या ॥ ११ ॥

शरेति ॥ वक्रं वल्गदिव चामरं अस्यास्तीति वक्रचामरवान् कुटिलं वक्रीकृतश्च य ऊर्मिचापः तरङ्ग एव धनुः तस्य कुहरात् रन्ध्रात् मध्यादिति यावत् उद्गतया निर्गतया । शरधारया जलप्रवाहेणैव बाणवर्षेणेव, बाणाग्रेणेति वा । प्रतिकूलं सर्वस्यापि कूलस्य भेदनकरी भेदिका, प्रतिकूलानां शत्रूणां भेदनकरी भेत्री । या ताम्रपर्णी । स्फुटं व्यक्तं वाहिनीविलसितं नदीविलासः सेनाविलासश्च यस्याः सा तथोक्ता सती । भुवि भूलोके । प्रथते प्रसिद्धा भवति ॥

कुटिलभ्रमालिलगुडभ्रमणा-

च्छफरीकृपाणशतचालनतः ।

अवगर्जनान्नरपतेः सुभटा-

ननुयाति पत्रिभरणादपि या ॥ १२ ॥

कुटिलेति ॥ या । कुटिलानां वक्राणां मण्डलाकाराणामित्यर्थं भ्रमाणां आवर्तानां आलिः पङ्क्तिरेव लगुडभ्रमणं यष्टिभ्रमणं तस्मात् । शफर्यः मत्स्यविशेषा एव कृपाणाः खड्गाः तेषां शतस्य चालनतः भ्रमणात् । अवगर्जनात् साटोपध्वनेः सिंहनादाच्च । पत्रिणां पक्षिणां बाणानां च भरणात् पोषणात् धारणादपि । नरपतेः राज्ञः । सुभटान् समीचीनान् योधान् । अनुयाति अनुकरोति । उपमा ॥

अदसीयरोधसि निवेशमसा-

ववकस्य दर्पभरितस्य रिपोः ।

व्यसृजद्विमाथकरणाभिमनाः

पृतनापतिं स पुरतो नृपतिः ॥ १३ ॥

अदसीयेति ॥ सः अमौ नृपति. मलगराजकुमारः। अदसीयरोधसि ताम्रपर्णीकूले । निवेश सेनाधिवेशनम् । अवश्ल्य कृत्वा । दर्पभरितस्य गर्वपूर्णस्य । रिपोः शत्रोः । विमाथकरणे नाशने अभिमनाः उत्कण्ठितः सन् । पुरतः पुरस्तात् । पृतनापतिं सेनापतिम् । व्यसृजत् प्रेषयामास ॥

अथ निर्ययौ मतिविपर्ययतो

गिरिदर्यमेयजयतूर्यरवः ।

स च सङ्गराय चतुरङ्गबलै-

स्तिरयन्दिशस्तिरुवटिक्षितिपः ॥ १४ ॥

अथेति । अथ अनन्तरम् । सः तिरुवटिक्षितिपः तिरुवदिराजश्च । अनन्तशयननृपतीनां 'तिरुवटि' इति बिरुदनाम। गिरिदरीषु पर्वतगुहासु अमेयः मातुमशक्य· जयतूर्यरवः जयभेरीध्वनि यस्य तथोक्त.। चतुरङ्ग-बलै· रथगजतुरगपदातिरूपैः चतुर्विधै· सैन्यै । दिशः काष्ठा· । तिरयन् आवृण्वानः सन् । सङ्गराय युद्धाय । मतिविपर्ययत· बुद्धिव्यत्यासात् । निर्ययौ निर्गतवान् ॥

उभयोर्व्यराजदुरुसैनिकयोः

क्षणमन्तरालवसुधा वितता ।

विहितोऽवकाश इव वीररमा-

विबुधीस्वयंवरविहारकृते ॥ १५ ॥

उभयोरिति ॥ उभयो द्वयोः। उरुसैनिकयोः महतो सैन्ययो· ।

वितता विस्तीर्णा । अन्तरावसुधा मध्यभूभागः । वीररमा वीरलक्ष्मीः विबुध्य देवा इव वरणार्थमागता अप्सरस इत्यर्थः । तासां स्वयंवरविहारवने स्वयंवरलीलानिमित्तम् । 'स्वयंवरविवाहकृते' इति पाठान्तरम् । विहिता कल्पिता । अवकाशः प्रदेश इव । क्षणम् । व्यराजत् शुशुभे ॥

पृथगासिता पृतनयोः श्रितयो-
रवकाशभूरजनि या महती ।
युतयोर्मिथो युगपदाक्रमितु
चकितेव सा चरमभागमगात् ॥ १६ ॥

पृथगिति ॥ पृतनयोः उभयोरपि सेनयोः । पृथगासितां पार्थक्येनावस्थितिम् । श्रितयोः प्राप्तयोः स्वस्वभागावस्थितयोः सेनयोरित्यर्थः । महती विशाला । या । अवकाशभूः मध्यभूमिः । अजनि जाता । सा भूमिः । पृतनयोः । युगपत् एककाले । मिथः परस्परम् । आक्रमितुं प्रधावितुम् । युतयोः सङ्गतयोः सत्योः । चकिता भीतेव । चरमभागं पश्चाद्भागम् । अगात् गता । उत्प्रेक्षा ॥

अविकुण्ठवेगहयमण्डलिका-
गुरुखण्डताण्डवितमुण्डशतम् ।
भुजदण्डकुण्डलितचण्डधनु-
श्च्युतकाण्डहिण्डितनिशुण्डगजम् ॥ १७ ॥

अविकुण्ठेति ॥ इदं पद्यचतुष्टयमेकान्वयम् । एतादृशं जन्यं अजनीत्युत्तरेणान्वयः । अविकुण्ठवेगानाम् अप्रतिबद्धरयाणां हयानाम् अश्वानां मण्डलिकायाः चक्रभ्रमणं गुरुखण्डेन दारुणमुद्गरेण ताण्डवितानि नर्तितानि इव [illegible] मुण्डशतानि मस्तकशतानि यस्मिंस्तत् ।

भुजदण्डे बाहुदण्डे कुण्डलितेभ्य चक्रितेभ्य आरोपितमौर्वीकेभ्य इत्यथ चण्डेभ्य क्रूरेभ्यश्च धनुर्भ्य चापेभ्य च्युतं निर्गतं काण्डे बाणे छिण्डिता दूरतो निरस्ता विशुण्डा छिन्नकरा गजा यस्मिंस्तत् तथोक्तम् ॥

मदधन्यसामभवसैन्यकरो-
परिनुन्नदन्तविधृतान्यभटम् ।
शरपातवीतगुणयोधधनु-
स्त्वरिताधिरोपितसिराततिकम् ॥ १८ ॥

मदेति ॥ मदधन्या मत्ता ये सामभवा गजा तेषां सैन्येन सेनया तत्समूहेनेत्यथ करै शुण्डाभि उपरिनुन्ना ऊर्ध्वं क्षिप्ता दन्तविधृता दन्तस्यूताश्च अन्यभटा शत्रुयोधा यस्मिंस्तत् तादृशम् । शरपातेन बाणपतनेन वीतगुणानि विगतमौर्वीकाणि यानि योधधनूंषि भटचापा तेषु त्वरितं सवेगं यथा तथा अधिरोपिता मौर्वीतरेण उपयोजिता सिरा तति नाडीसतति यस्मिंस्तत् तथोक्तम् ॥

पिशितस्पृहोत्तरलगृध्रगरु-
त्पवनप्रबुद्धशरमुग्धभटम् ।
इतरेतरासिहतवीरकृत-
शुचरीकरग्रहपुन कलहम् ॥ १९ ॥

पिशितेति ॥ पिशितस्पृहया मांसलाभेन उत्तरलाना ऊर्ध्वं चलता गृध्राणा पक्षिविशेषाणा गरुत्पवनेन पक्षवातेन प्रबुद्धा चेतिता शरमुग्धा पूर्वं शरपतनेन मूर्छामधिगता भटा यस्मिंस्तत् तादृशम् । इतरेतर परस्पर इतरेतरस्य परस्परस्य वा असिना खड्गेन हता ये वीरा तै कृत आरब्ध शुचरीकरग्रहे एतस्य अप्सरसा विवाहविषय पुन कलह यस्मिंस्तत् ॥

अविचारितस्वपरयोरमना
हतजीवमस्थिरजयापजयम् ।
अजनिष्ट जन्यमनयोर्बल्यो
रपि नारदेन यददृष्टचरम् ॥ २० ॥

अविचारितेति ॥ अविचारितस्वपरयोः अनालोचितस्वपक्षपरपक्षयोः । अनात्मनीनम् अगणितप्राणम् । अस्थिरौ जयापजयौ यस्मिन् तत् । जन्यं युद्धम् । अनयोः । बल्यौः सैन्ययोः । अजनिष्ट जातम् । यत् युद्धम् । नारदेनापि । अदृष्टचरं पूर्वं न दृष्टम् ॥

अपरः सरोपमहितेन हत
पतितोऽपि कुम्भफलकात्करिणः ।
अविलम्ब्यमम्बरचराम्बुजदृ-
क्कुचकुम्भिकुम्भमवलम्बितवान् ॥ २१ ॥

अपर इति । सरोपं कोपेन सह । अहितेन शत्रुणा । हतः । अपरः भटः । करिणः गजस्य । कुम्भफलकात् गण्डस्थलात् । पतितः सन्नपि । अविलम्ब्य सत्वरम् । अम्बरचराम्बुजदृक्कुचकुम्भिकुम्भम् ... गजमस्तकं तम् । अवलम्बितवान् आश्रितवान् ॥

रिपुणा निकृत्तभुज एव परो
न्यपतत्स्वपातितपराक्रमतः ।
अनाहतु क्षणमधो भ्रमणे
स भुजो रराज युधि स दायितया ॥ २२ ॥

रिपुणेति । पर अन्य कश्चित् । रिपुणा शत्रुणा । निकृत्तभुज छिन्नबाहु सन्नेव । न्यपतत् पतितवान् । स भुज खण्डितो बाहु । धनु चापम् । अनहत् अमुञ्चन् सन् । अध भूमौ । भ्रमणै चक्रै । युधि युद्धे रणभूमावित्यर्थ । शयित पतितम् । त भटम् । स्वपातित स्वेन खण्डित य पर शत्रु तस्य आक्रमत आक्रमणात् । क्षणम् । ररक्ष पालितवान् । स्वपातिपतदाक्रमत ' इति पाठ तु स्वपातिना पतितोपरि अवतरता पतता पक्षिणा आक्रमत इति व्याख्येयम् ॥

महतो मदेभशिरसो दलिता

न्मणिभिश्च्युतै सिकतिले फलके ।

परदारणात्प्रहरण मसृण

समराय कोऽपि समशातयत ॥ २३ ॥

महत इति । कोऽपि वार । दलितात् विदारितात् । महत बृहत । मदेभशिरस मत्तगजकुम्भात् । च्युतै गलितै । मणिभि मौक्तिकै । सिकतिल वालुकावति । फलके चर्मणि । परदारणात् शत्रुखण्डनात् । मसृण कुण्ठितधारम् । प्रहरण आयुधम् । समराय युद्धाय । समशातयत सम्यगुत्तेजितवान् ॥

करकुन्तकोटिदलितात्करिण

क्षतजेन कुम्भफलकात्क्षरता ।

अपरो व्यराजदभित स्नपितो

विहिताभिषेक इव वीरपदे ॥ २४ ॥

करेति ॥ अपर अन्य कश्चित् । करकुन्तकोटिदलितात् हस्तास्थितस्य प्रासस्य अग्रेण विदारितात् । करिण गजस्य । कुम्भफलकात् फलकस

दशात् मस्तकात् । कुम्भयुगलादिति पाठान्तरम् । क्षरता प्रवहता । क्षतजेन रक्तेन । अभित समन्तात् सर्वावयवावच्छेदेनेत्यर्थ । स्नापित मज्जित सन् । वीरपदे वीरस्थाने । विहित कृत अभिषेक पट्टाभिषेक यस्य स तथोक्त इव । व्यराजत् राजति स्म ॥

समतासहं शशिकुलेशबलं
युधि केरलस्य युगपत्पृतनाम् ।
प्रसितुं समैहत मदमहिला
प्रलयाम्बुराशिपरिभाविरवम् ॥ २५ ॥

समतेति ॥ समतासह सादृश्यमसहमान अनुपममित्यर्थ । प्रलयाम्बुराशिपरिभाविरव प्रलयकालसमुद्रतिरस्कारिगर्जित च । शशिकुलेशबल चन्द्रवंशाधीशस्याच्युतरायस्य सैन्यम् । युधि युद्धे । मदमहिला दर्पकलुपाम् । केरलस्य चेरराजस्य । पृतना सैन्यम् । युगपत् एकदैव । प्रसितु भक्षयितु नाशयितुमित्यर्थ । ऐहत चक्रे स्म इयेष वा ॥

कति चित्कराल्करवालिकया
कतिचिच्च कुन्तलतया शितया ।
विशिखै. परे शितमुखैरभव-
न्विभुसेनया विदलिता विमता ॥ २६ ॥

कतीति ॥ विभुसेनया अच्युतरायसैन्येन । कतिचित् कतिपये । विमता शत्रव । करालया भयकरया । करवालिकया खड्गेन । विदलिता खण्डिता । अभवन् । कति चिच्च । शितया तीक्ष्णया । कुन्तलतया प्रासवल्ल्या । विदलिता अभवन् । परे अन्ये केचन । शितमुखै तीक्ष्णाग्रै । विशिखै बाणै । विदलिता अभवन् ॥

अवकीर्णकर्णकनकाभरणा

हननाजहत्किणगणासतटा ।

करतो विनिर्गलितखड्गधनु -

परिघादिमप्रहरणप्रकरा ॥ ७७ ॥

अवकीर्णेति ॥ पद्यद्वयमश्वान्वयम् । अवकीर्णानि परितः क्षिप्तानि कनककाभरणानि कनकमयानि कर्णभूषणानि येषां ते तथोक्ताः । हननं प्रहारेण अजहत्किणगणानि अविगतव्रणचिह्नसमूहानि असतटानि भुजशिखरप्रदेशा येषां तथोक्ताः । करतः हस्तेभ्यः । विनिर्गलितानि च्युतानि खड्गं धनुः परिघः लोहबद्धो लगुडभेदः एतदादिमानि प्रहरणानि आयुधानि येषां ते तथोक्ताः ॥

श्लथमौलिवेष्टनदुकूलशिखा

स्तरणे रणे कुणपभुक्छरणे ।

विपुलांसकूटविगलद्वलया-

श्चिरमस्वपन्सपदि वीरभटाः ॥ ७८ ॥

श्लथेति ॥ विपुलात् विशालात् असकूटात् अंसशिखरात् विगलत् स्रवमानं वलयं अङ्गदं येषां ते तथाभूताश्च स त । 'विलसद्वलया' इति पाठान्तरम् । वीरभटाः वीरानयोधाः श्लथानां शिथिलीभवतां व्यवमानानां मौलिवेष्टनदुकूलानां उष्णीषभूतक्षौमाणां शिखाः अञ्चलान्येव आस्तरणानि चित्रकम्बलानि यस्मिंस्तस्मिन् तथोक्ते । शिखाभिः आस्तरणं आच्छादनं यस्येति वा । कुणपभुजां शवभोजिनां गृध्रगोमायुप्रभृतीनां पिशाचादीनां वा शरणे रक्षितरि गृहे वा । रणे युद्धे । चिरं दीर्घकालम् । अस्वपन् सुप्तवन्तः मृता इत्यर्थः ॥

निहतावशिष्टसुभटानुगतो
विजयिष्णुसैन्यमधिजन्यममुम् ।
अभिगम्य चोलपतिनानतवा-
नपरावतारममरेन्द्रतरोः ॥ २९ ॥

निहतेति ॥ (चेरराज) । निहतावशिष्टैः हतशेषैः सुभटैः अनुगतः अनुयातः सन् । अधिजन्यं युद्धे । विजयिष्णुसैन्यं जयशीलसैन्यम् । अमरेन्द्रतरोः कल्पवृक्षस्य । अपरावतारं मूर्त्यन्तरमिव स्थितं महावदान्यमित्यर्थः । अमुं मलयनृपतिम् । चोलपतिना चोलराजेन सह । अभिगम्य प्राप्य । आनतवान् प्रणतवान् ॥

अयमर्पितस्तव पदाम्बुजयो-
रधमः स तिर्वटिरधर्मपरः ।
इति तं निगद्य समदान्द्विरदा-
नुपदीचकार रयगांस्तुरगान् ॥ ३० ॥

अयमिति ॥ अधर्मपरः अधर्मनिष्ठः । अधमः नीचः । अयं सः तिर्वटिः तिर्वटिराजः । तव । पदाम्बुजयोः पादपद्मयोः । अर्पितः त्वां शरणं गत इत्यर्थः । इति । तं मलयनृपतिसुतम् । निगद्य उक्त्वा । समदान् मत्तान् । द्विरदान् गजान् । रयगान् वेगेन गच्छतः । तुरगान् अश्वांश्च । उपदीचकार उपायनीकृतवान् ॥

अनुगृह्य नम्रमसुरक्षणतः
स्थितिमाश्रये तिर्वटिक्षितिपम् ।

अपि पाण्ड्यभूपमदसीयपदा-
भ्यधिकप्रतिष्ठमतनिष्ट नृप ॥ ३१ ॥

अनुगृह्णाति ॥ नय नीतिमार्ग । स्थितिमान् निष्ठावान् । नृप सन्यराजकुमार । नम्र विनतम् । तिरुवडिदेशात् तिरुवडिराजम् । असुर क्षणत प्राणरक्षया । अनुगृह्य । पाण्ड्यभूप पाण्ड्यराजमपि । अदसीयपदात् तिरुवाडिनृपसम्बन्धिन स्थानात् अभ्यधिका प्रतिष्ठा स्थिति यस्य तम् । अतनिष्ट अकुरुत ॥

शयने शयानमुदधिं समया
पदसौरभोर्मिपरिणाहवति ।
अथ नन्तुमच्युतमगादवने
रधिभूरनन्तशयनाभिमुखम् ॥ ३२ ॥

शयनेति ॥ अथ । अवने अधिभू पृथ्वीपति । उदधिं समया समुद्रसमीप । पदानां शब्दानां यत् सौरभं परिमल सौशब्द्यमिति यावत् तस्य ऊर्मिणा वीचीनां सपत्नीनामित्यर्थ परिणाह आभोग अस्यास्तीति तस्मिन् । शयने आदिशेष आदिशेषस्य पतञ्जलिरूपेण शब्दमाधुर्यान णायकत्वादिति भाव । शयानम् । अच्युतं पद्मनाभम् । नन्तु वा दतुम् । अनन्तशयनाभिमुख अनन्तशयननामकनगर अभिमुखीकृत्य तदुद्दिश्येत्यर्थ । अगात् गत । एतावत्पद्य त **प्रमिताक्षरा** वृत्तम् ॥

आवासभूश्चुलकदम्भमहाम्बुराशे
रन्तर्मुखस्य हयरत्नखनि सुमेपो ।

सा‍म्राज्यभूरगरुचन्दनवाटिकाया

मार्गेऽजनिष्ट मलयाद्रिरमुष्य दृष्ट्यो ॥ ३३ ॥

आवासभूरिति ॥ चुलुकदघ्न चुलुकप्रमाणक महाम्बुराशि महाम्बुद्र यस्य तस्य । 'चुम्बितोदमहाम्बुराश इति पाठान्तरम् । अयमेव च पाठ साधीयान्, द्वयसज्दघ्नचाद्यप्रमाण एव विधानात् । चुम्कितोद चुलुकीकृतजल महाम्बुराशि यस्मात तस्य व्याख्येयम् । अन्तर्मुखस्य योगिन अगस्त्यमहर्षेरित्यर्थ । आवासभू निवासस्थानम् । कुसुमेषो मन्मथस्य । हृत्यसम्नभ्यधेष्ट दक्षिणवात स एव रक्ष तस्य खनि आकर दक्षिणानिलजन्मभूमिरित्यर्थ । अगरूणां कालागरूणां चन्दनानां पटीराणां च वाटिकाया पङ्क्ते । साम्राज्यभू चक्रवर्तिवस्थान तदुत्पत्तिरपत्तिभूमिरित्यर्थ । मलयाद्रि मलयपर्वत । अमुष्य अस्य राज्ञ । दृष्ट्यो नयनयो । मार्गे पथि । अजनिष्ट जात दृष्ट इत्यर्थ । वसन्ततिलकम् ॥

वीथीष्वम्बुरुहां विहारनिरता विक्षिप्य धूलीभर

ताम्राया तरलोर्मिकाविरचितप्रेङ्खोलिकाकेलिका ।

लक्ष्यालक्ष्यरदा पय पनसिपाह्म्यालया षट्पदै

सेनाश्रान्तिमपाहरन्ति शिशव श्रीखण्डशैलानिला ॥३४॥

वीथीष्विति ॥ शिशव अर्भका । श्रीखण्डशैलानिला चन्दनाद्रिमारुता मलयवातपोता इत्यर्थ । 'श्रीगन्धशैल' इति पाठान्तरम् । अम्बुरुहां पद्मानाम् । वीथीषु पङ्क्तिषु वरसमुच्च । विहारनिरता क्रीडासक्ता सन्त । धूलीभर रज पुञ्जम् । विक्षिप्य विकीर्य । ताम्राया ताम्रपर्ण्याम् । तरलाभि चञ्चलाभि ऊर्मिकाभि वीचीभि विरचिता कृता प्रेङ्खोलिकाकेलि डोलाविहार यैस्ते तथोक्ता । लक्ष्यया धूलीभर

विक्षिप्यति वा । पय कणमिषात् नलबिन्दुव्याजेन । लक्ष्यालक्ष्यरदा दृश्यादृश्यदन्ता । षट्पद भ्रमरै । लम्बालसा लम्बमानचूर्णकुन्तला च सन्त । सनाथान्ति सैन्याना श्रमम् अपाहरन्ति अपनयान्ति । रूपक परिकरश्च । शार्दूलविक्रीडित वृत्तम् ॥

मैनाकप्रमुखैर्महीधरकुलैर्माहेन्द्रभीत्याकुलै
मत्वा शोषमपामपाङ्गितचमूराजीरजोमण्डलै ।
अभ्युत्थानमिवाचरन्तमसकृत्प्रेङ्खत्तरङ्गच्छला
दद्राक्षीन्निधिमम्भसा स नयनायाम मिमान किल ॥३५॥

मैनाकेति ॥ स नृपति । अपाङ्गित दृष्ट चमूराजीरजोमण्डल सैन्यसमूहोत्थापितधूलीपटल यैस्तस्तथाक्तै । अपा जलानाम् । शोषम् । मत्वा विचार्य । माहेन्द्रभीत्याकुलै इन्द्रागतभयेन व्याकुलै । मैनाकप्रमुख मैनकप्रभृतिभि । महीधरकुलै पर्वतसमूहै सह । महीधरकुलै अपा शोष मत्वा वा । असकृत् मुहुर्मुहु । प्रेङ्खत्तरङ्गच्छलात् चलता तरङ्गाणा व्याजेन । अभ्युत्थान अभ्युत्थाय गमनाय उद्यमनम् । आचरन्त कुर्वाण मेव स्थितम् । नयनायाम दर्शनशक्तिदैर्घ्य स्वनेत्रविपुल्य वा । मिमान किल परिमान्तमिव च स्थितम् । अम्भसा निधि समुद्रम् । अद्राक्षीत् अपश्यत् । नयनायाम मिमान किल इति पाठान्तरम् । उत्प्रेक्षा । शार्दूलविक्रीडित वृत्तम् ॥

इति षष्ठ सर्ग ॥

परिष्कृतिनिवेदनम् ।

महाशयाना नैतदाश्चर्यम्, यदमुद्रितस्य प्रथमस्य प्रत्यादर्शस्य प्रन म नादर्शुद्धीना तदशुद्धिपरिहारपूर्वक समीचीन पाठमुन्नयता तदनायत्त मानसानां व्याख्यातॄणा भूयसा मभवान्त तत्र तत्राक्षरत पदता योजना नाऽथता भावतो पाराद्धरणतश्च प्रमादा इति तादशेऽस्मिन्नच्युतराया भ्युदयेऽपि तत्र तत्र पतितानि स्खलितानीति । पर तु पुन परिशीलनाया यानि नाम साम्प्रतमस्फुरन् तानीदानी पाराहयन्ते ।

पृ०	पङ्क्ति	परिष्कृतम्	पृ०	पङ्क्ति	परिष्कृतम्
७	१७	यत्तमसो	१२८	१	रायण
	२१	भयार्थिना	,,	७	अनकृतवर्ता
८१	१०	क्रीडा यस्य	,,	१२	सिता मविभागा
१०७	७	प्रत्यर्न विचलाति			चरा
१०८	८	ध्यानपा	१३०	१७	इनसाम
	६	चालप चालराज ।	१३९	९	घ्यानप
	१३	भूपति ।		१४	चालपम् ।
११८	९	सवन्धिनम् । गाध	१४१	११	वि दुाभ गवनन
		तन्हदर्शी	१४४	१०	पतङ्ग

प्रथमसर्गे १२ पद्य या विधु विमाहिनी मूर्तिमत्य सुमनासनाय सरमन्वया वा । द्वितीयसर्गे १५ पद्य व्याख्यान चकुरित्यनन्तर अप ह मयारभ्य षट्व इत्यन्त प्रमादपतित तताऽपनयम् । २६ पद्य व्याख्यान अनुकर्तुम् । आदृत माभिलाष । अभूत् । पुत्रदर्शनाय नि नमय ग नयगहस्ताग्य।भन्नापलक्ष इति व्याख्येयम् । ४० पद्य ' प्रनिावम्ब गगनाम्बा इति पाठ इदानी मुपलब्ध । मपदा अन्ताभि इति यत्र । अभा इति व्याख्येयम् । अन्ताभीन भाव लुट् । चतुर्थसर्गे ३० पद्य अनुकरक्षायम् इति इन्रतिक्रियाविशेषण वा । पञ्चमसर्गे ४१ पद्य प्रभानेवलक्ष्य (हित्यानि इति इमिन्भस्त्या प्रवर्त्यमानन प्रभा वान्मगइन । इति व्याख्येयम् । षष्ठसर्गे १० पद्य उदर्शीनिरवा मद्दौन्यद । उभया भवाद्भूया इति व्याख्येयम् ।